# महाकाव्यम्

MASTER OF ARTS SANKRIT LANGUAGE AND LITERATURE

**M 2 3 S N 0 2 D C**

Self Learning Material



SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# महाकाव्यम्

Course Code: M23SN02DC

Semester-I

# Discipline Core Course
# Master of Arts
# Sanskrit Language and Literature
# Self Learning Material

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY


**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# Documentation

Course Code: M23SN02DC

महाकाव्यम्

Semester-I

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-966907-8-6

**Academic Committee**

Dr. Shyla C.A.
Prof. M.S. Muraleedharan Pillai
Pro. C.S. Sasikumar
Dr. K.M. Sangameshan
Dr. N.K Sundareswaran
Dr. Chandrashekaran Nair
Dr. Sreegith T.G.
Dr. J.P. Prajith
Dr. K. Unnikrishnan
Dr. C.T. Francis

**Development of the content**

Dr. Sreeja J.

**Review**

Content: Dr. G.Sahadevan
Format: Dr. I.G. Shibi
Linguistic: Dr.N. Sharmila

**Edit**

Dr. G. Sahadevan

**Scrutiny**

Dr. Vincent B. Netto, Dr.Vijayarajan K.U, Chitra Bhaskar

**Co-ordination**

Dr. I.G. Shibi and Team SLM

**Design Control**

Azeem Babu T.A.

**Production**

November 2023

**Copyright**

© Sreenarayanaguru Open University 2023

# Message from Vice Chancellor

Dear

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centers around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavors.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The post graduate programme in Sanskrit has a unique blend of language and literature. The focus of the programme is on enhancing the capabilities of the learners to undergo a deeper comprehension of the sociology of the forms in literature although the required credits are in place to learn other aspects of Sanskrit literature. Care has been taken to expose the students to recent trends in Sanskrit literature. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.

Regards,

Dr. P.M. Mubarak Pasha 01.11.2023

# CONTENTS


BLOCK -1 महाकाव्यपरिचयः 1

Unit-1महाकाव्यानां सामान्यपरिचयः 2

Unit-2 किरातार्जुनीयस्य सामान्यपरिचयः 16

Unit-3 नैषधीयचरितस्य सामान्यपरिचयः 27

Unit- 4 शिशुपालवधस्य सामान्यपरिचयः 41

BLOCK -2 किरातार्जुनीयम् 56

Unit-1प्रथमसर्गे 1-12 श्लोकाः(सुयोधनस्य प्रजापरिपालनरीतिः) 57

Unit-2 प्रथमसर्गे 13 - 24 श्लोकाः (दुर्योधनस्य भरणतन्त्रज्ञता) 75

Unit-3 प्रथमसर्गे 25-35 श्लोकाः(द्रौपद्याः वचांसि, पाण्डवानां दुरवस्था च) 91

Unit- 4 प्रथमसर्गे 36-46 श्लोकाः(द्रौपद्याः प्रोज्वलवचांसि) 105

BLOCK-3 नैषधीयचरितम् 125

Unit-1 द्वितीयसर्गे 1-14 श्लोकाः 126

Unit-2 द्वितीयसर्गे 15-30 श्लोकाः 140

Unit-3 द्वितीयसर्गे 31- 40 श्लोकाः 157

Unit-4 द्वितीयसर्गे 41- 50 श्लोकाः 169

BLOCK – 4 शिशुपालवधम् 181

Unit-1 द्वितीयसर्गे 69-88 श्लोकाः 182

Unit-2 द्वितीयसर्गे 89-98 श्लोकाः 203

Unit-3 द्वितीयसर्गे 99-108 श्लोकाः 215

Unit-4 द्वितीयसर्गे 109 -118 श्लोकाः 226

Model Question Paper (SET – A) 237

Model Question Paper (SET – B) 239

# महाकाव्यपरिचयः

# BLOCK -1

UNIT 1

# महाकाव्यानां सामान्यपरिचयः

## Learning Outcomes

- महाकाव्यविषये परिचयं प्राप्नोति।
- काव्यानां आशयं गृह्णाति।
- महाकाव्येतिवृत्तपरिचयः।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

कवेः कर्मः भवति काव्यम्। महाकाव्यं हि संस्कृत-साहित्य-जगतः सर्वोत्कृष्टरत्नम्। संस्कृतसाहित्यजगति महाकाव्यस्य विकासः कदाप्रभृत्यभूदिति तु न पार्यते निश्चयेन वक्तुम्। काव्यम्, चरित्रकाव्यम्, गद्यकाव्यम्, महाकाव्यम् इत्यादि भेदेन अनेकथा सन्ति।

संस्कृतमाहित्ये सर्वोत्कृष्टरत्नं प्रसिद्धानि महाकाव्यानि अनेकानि सन्त्यपि पञ्चमहाकाव्यानि इति विख्यातानि पञ्च। महाकाव्ये सामान्यतया अष्ठाधिकसर्गाः सन्ति। महाकाव्ये हि एको नायकः सुरो वा क्षत्रियः, बहवो वा सद्वंशक्षत्रियाभूपाः नायकाः। नायकेन हि धीरोदात्तः प्रकृतिकेन भाव्यम्। श्रृङ्गारवीरशान्तानामेकोऽङ्गी रसः अन्ये अङ्गान्येव सर्वेऽपि नाटकसन्धयः, वृत्तं त्वैतिहासिकं वा तदितरदपि सज्जनाश्रयं, चतुर्णामेव वर्गाणां साधनं फलं तु तेष्वेकं भवेत्। आशिर्नमस्क्रिया वस्तुनिर्देशो वा प्रारम्भवाक्यम्, सतां गुणसंकीर्तनं खलानां निन्दा च प्रतिसर्गं हि, भाविसर्गकथासंसूचकमवसानं भवेत्। यथायोगं सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्त वासरप्रातर्मध्याह्नमृगया शैलर्तुवनसागर वर्णना

भवेयुः। विप्रलम्भमुनि स्वर्गपुराध्वररणप्रायेणपचयममन्द्र पुत्रोदयादयः सङ्गोपाङ्गं वर्णनीयः। महाकाव्यस्य नाम वृत्तस्य कवेर्नायकस्य वा नाम्ना नाम, सर्गनाम तु सर्गोपादेयकथयैव। एतादृशलक्षणलक्षितं हि महाकाव्यं सौभाग्याय भवति। महाकाव्यविषये सामान्यपरिचयमद्यमस्माभिः सम्पादनीयः।

## Keywords

महाकाव्यम्, महाकाव्यलक्षणम्, विविधमहाकाव्यानि, पञ्चमहाकाव्यानि– रघुवंशम्, कुमारसंभवम्, किरातार्जुनीयम्, नैषधीयचरितम्, शिशुपालवधम्, केरलीयसंकृतमहाकाव्यानि।

## Discussion

आदिकाव्यं भवति रामायणम्

संस्कृतसाहित्ये अमूल्यरत्नं भवति महाकाव्यप्रस्थानम्। सर्गबन्धो महाकाव्यम् इति। संस्कृतसाहित्यजगति महाकाव्यस्य विकासः कदाभृत्यभूदिति तु न निश्चयेन वक्तुं शक्यते। आदिकाव्यं भवति रामायणम्। तत् इतिहासकाव्यमिति प्रसिद्धम्। किन्तु महाकाव्यंनाम्ना साहित्यप्रस्थानं अनन्तरंसंजायते। संस्कृतकाव्यस्योदयः प्रशान्तपावने तपोवने अजायत। केचन वाल्मीकिमहर्षिणा विरचितं रामायणम् इतिहासकाव्यमिति मन्यते। व्यासस्य महाभारतं द्वितीयं महाकाव्यम्। पाणिनेः जाम्बवतीपरिणयम्, अश्वघोषस्य बुद्धचरितं, सौन्दरानन्दं नाम द्वे महाकाव्ये काव्यलोके प्रसिद्धं प्रापुः।

### 1.1.1 महाकाव्यलक्षणम्

सर्गबन्धो महाकाव्यम्। सर्गबन्धात्मिका रचना महाकाव्यमिति। सर्गस्तु अवान्तरार्थवर्णना। रसवत्पद्यकदम्बविन्यासः। आशी:- (इष्टजनस्य शुभाशंसनम्) नमस्क्रिया (प्रणामः) वस्तुनिर्देशः तेष्वेकेन काव्यस्य प्रारम्भः स्यात्। महाकाव्यस्य प्रतिपाद्यं इतिहाससमुद्भूतं स्यात्। महाकाव्यस्य रचनया चतुर्वर्गस्य धर्मार्थकाममोक्षस्य फलप्राप्तिः सम्भवति। चतुरः,

व्यवहारकुशलः, उदात्तः, धीरोदात्तः च नायकः स्यात्। महाकाव्ये नगरार्णवपर्वतवर्णाः ऋतुचन्द्रोदयसूर्योदयोद्यानसलिलक्रीडामधुपानं, रतोत्सवचित्रिताः भवेयुः। विप्रलम्भश्रृङ्गारः, विवाहः, सन्तानोत्पत्तिः, दूतप्रेषणं, युद्धयात्रा, युद्धवर्णनं, नायकस्य विजयादयः महाकाव्ये वर्ण्यविषयाः। उक्तं च काव्यादर्शे-

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।।

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।

नगरार्णवशैलचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ।।

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ।।

अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।।

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः।।

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ।।

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः।।

वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः।।

## 1.1.2 संस्कृतमहाकाव्यस्य लघुविवरणं विकासश्च

### 1.1.2.1 कालिदासपूर्ववर्तिकालः

अस्मिन् काले संस्कृतमहाकाव्येषु भावस्यैव प्राधान्यमासीत्। कवीनां स्वरचनात्मकशक्तेः विकासाय प्रकाशनाय च सुयोग्यः अवसरः। पाणिनि-व्याडि-वररुचि-पतञ्जलीनां कालः।

### 1.1.2.2 कालिदाससमकालः

अस्मिन् काले भावस्य भाषायाश्च तुल्यप्राधान्येन काव्यरचना। अलङ्काराणां प्रयोगेण रचनापाटवं संवर्धयितुं महाकवयः यतितवन्तः। काव्यस्योत्कृष्टस्वरूपं संजातम्। कालिदासः अश्वघोषः भारविः बुद्धघोषः भट्टिः कुमारदासः माघः चास्मिन् काले अन्तर्भवन्ति।

### 1.1.2.3 कालिदासोत्तरकालः

अस्मिन् काले महाकाव्येषु स्वाभाविकत्वपेक्षया कृत्रिमत्वं संजातम्। अनुकरणवासनां संजाता। भावापेक्षया प्रतिस्पर्धिभावना उदिता। कल्पानायाः पाण्डित्यप्रकटनस्य तात्पर्यं कवयः प्रकटितवन्तः। भारविना आरब्धा शब्दालङ्कारप्रयोगनैपुणी माघं प्रप्य विकसिता वासुदेव-शिवस्मामि वेदान्तदेशिकादीनां काले मुकुलिता पुष्पिता च। केचन व्याकरणप्रभावप्रदर्शनाय काव्यरचनामकुर्वन्। भट्टिः तदर्थं बीजावापं चकार।

## 1.1.3 महाकाव्यानि

संस्कृतसाहित्ये महाकाव्यनि शताधिकानि सन्ति। कतिपयानां विवरणमेवात्र सूचयति।

1. पातालविजयस्य (जाम्बवतीविजयम्) कर्ता पाणिनिः भवति। अयं ग्रन्थः अद्य नोपलभ्यते।
2. बलचरितं नाम काव्यस्य कर्ता भवति व्याडिः। श्रीकृष्णचरितमेव प्रतिपाद्यविषयः।
3. स्वर्गारोहणं नाम महाकाव्यस्य कर्ता भवति वररुचिः।
4. बुद्धचरितनाम्नः महाकाव्यस्य कर्ता अश्वघोषः भवति। बुद्धचरिते अष्टविंशतिसर्गाः सन्ति। सम्प्रति तु चतुर्दश सर्गपर्यन्तमेव लभ्यते। काव्येऽस्मिन् गौतमबुद्धस्य जन्मत आरभ्य धातुविभाजनपर्यन्तः कथा वर्णितोऽस्ति। काव्ये हि भगवत्प्रसूतिरन्तःपुरविहारः, संवेगोत्पत्तिः, स्त्रीविधातातोभिनिष्क्रमणं छन्दकनिवर्तनं तपोवनप्रवेशोऽन्तःपुरविलापः कुमारान्वेषणं श्रेण्याभिगमनं कामविगर्हणमगाडदर्शनं मारविजयो बुद्धत्वप्राप्तिरिति चतुर्दश प्रकरणानि पूर्वभागे। बुद्धस्य काशीगमनं शिष्येभ्ये दीक्षादानं महाशिष्याणां प्रवर्ज्याऽनाथपण्डितस्य दीक्षा पितृपुत्रसमागमो जेतवनस्वीकृतिः प्रव्रज्यास्रोतः आम्रपाल्या उपवने आयुर्निर्णये

बुद्धचरितम्

निर्वाणमार्गे महापरिनिर्वाणं निर्वाणप्रशंसा धातुविभाजनमिति तावन्त्येव प्रकरणानि उत्तरभागे।

सौन्दरनन्दम्

5. सौन्दरनन्दं महाकाव्यम् अष्टादशसर्गेषु निबन्धमिदं महाकाव्यं गौतमबुद्धस्य अनुजस्य नन्दस्व तत्पत्न्याः सुन्दर्याश्च कथानकं वर्णयति। काव्योत्कर्षदृष्ट्या सौन्दरनन्दं बुद्धचरितमतिशेते। अत्र हि कविनिखिलमेव कलाकौशलं काव्यवैभवञ्च व्यनक्ति। काव्यमिदं कुमारसम्भवस्य प्रतिस्पर्धि दृश्यते।
6. पद्मचूडामणिसंज्ञकम् काव्यस्य कर्ता बुद्धघोषः आसीत्। तस्मिन् दश सर्गाः सन्ति।
7. धर्मशर्माभ्युदयं नाम काव्यस्य कर्ता हरिश्चन्द्रः भवति। काव्येऽस्मिन् एकविंशति सर्गाः सन्ति। जैनसन्यासिवर्गस्य जीवचरितं भवति इतिवृत्तम्।

भट्टिकाव्यं अथवा रावणवधम्

8. भट्टिकाव्यस्य कर्ता भवति भट्टिः। व्याकरणस्य शब्दशास्त्रस्य च नियमान् तत्त्वानि च व्याख्यातुं रचितं महाकाव्यं भवति भट्टिकाव्यम्। द्वाविशतिसर्गात्मकेऽस्मिन् काव्ये श्रीरामस्य पट्टाभिषेकं यावत् कथा वर्णिता। भट्टिकाव्यस्य रावणवधमिति च नाम अस्ति। अत्र हि रामराज्याभिषेकपर्यन्ता कथा निबन्धाऽस्ति। कविना भट्टिना सूचितं भवति यत् सः वलभीराजस्य श्रीधरसेनस्य समकालिकः इति। अतः तस्य कालः क्रिस्त्वनन्तरं सप्तमे शतके इति। भट्टिकाव्ये रसपरिपाकः अलङ्कारयोजना प्रकृति चित्रणं च सम्यक्तया सूचितमस्ति। रावणस्य वर्णना ऋतुवर्णना च अतिमनोहरं भवति।
9. कुमारदासेन विरचितं काव्यं भवति जानकीहरणम्। श्रीरामस्य चरितम् आश्रित्य रचिते काव्ये विंशतिसर्गाः सन्ति।
10. अवन्तिवर्मणः इति काश्मीरराजस्य समकालिनकः राजानकरत्नाकरः भवति हरविजयस्य कर्ता। अस्मिन् काव्ये पञ्चाशत् सर्गाः सन्ति। शिवशत्रुः भवति अन्धकः। अन्धकस्य जननं, तस्य पराक्रमं अन्त्ये अन्धकस्य वधं च अत्र वर्णयति।
11. कप्फनाभ्युदयं नाम काव्यस्य कर्ता भवति शिवस्वामी। अत्र विंशतिः सर्गाः सन्ति।
12. गौडवहनाम काव्यस्व कर्ता वाक्पतिराजः भवति। अस्मिन् काव्ये प्राकृतभाषायां श्लोकाः रचिताः सन्ति। तत्र हि कन्याकुब्जेश्वरेण यशोवर्मणा गौडराजकुमारस्य वधपर्यन्ता कथा चित्रिता।
13. रामचरितमहाकाव्यस्य कर्ता अभिनन्दः भवति। अस्मिन् काव्ये षट्त्रिंशत् सर्गाः सन्ति। इदं काव्यं अद्य नोपलभ्यते।

14. कादम्बरीकथासारनामकस्य महाकाव्यस्य कर्ता गौडाभिनन्दः भवति। अस्मिन् काव्ये अष्ट सर्गाः सन्ति। अस्मिन् बाणभट्टेन विरचितस्य कादम्बर्याः कथासारः वर्तते।
15. भुवनाभ्युदयम् नाम काव्यस्य कर्ता शङ्कुकः भवति ।
16. युधिष्ठिरविजयम् नाम काव्यस्य कर्ता वसुदेवकविः भवति। एकविंशतिः सर्गाः सन्ति।
17. नवसङ्कहसाङ्कचरितम् काव्यस्य कर्ता पद्मगुप्तः भवति। अस्मिन् काव्ये अष्टदशसर्गाः सन्ति।
18. विक्रमाङ्कदेवचरितम् काव्यस्य कर्ता बिल्हणः भवति। तत्र हि अष्टादश सर्गाः सन्ति। इदं काव्यं चरित्रकाव्यं च भवति।
19. श्रीकण्डचरितम् पञ्चविंशतिः सर्गेणाभिव्यक्तम्। अस्य काव्यस्य कर्ता मङ्खुकः भवति। शिवस्य त्रिपुरदह्नकथा भवति इतिवृत्तम्।
20. नेमिर्निवाणस्य कर्ता भवति वाग्भटः। नेमिनाथ नाम जैन सन्यासिनः चरित्रं भवति प्रतिपादविषयकः।
21. पञ्चदशसर्गेषु विभक्तमिदं सहृदयानन्दम् अथवा कृष्णानन्दम् काव्यस्य कर्ता कृष्णानन्दः भवति। नलस्य चरितमेव प्रतिपाद्यविषयः।
22. वेदान्तदेशिको नाम कविः यादवाभ्युदयम् नाम महाकाव्यं रचितवान्। चतुर्विंशतिसर्गात्मकेऽस्मिन् श्रीकृष्णस्य कथाः वर्णिताः।
23. मधुराविजयस्य कर्ता गङ्गादेवी भवति। विजयनगरस्य कम्पनस्य चरितमेव प्रतिपाद्यविषयः।
24. रसिकरञ्जनस्य कर्ता भवति रामचन्द्रः।
25. कुमारपालचरितस्य नाम चरित्रकाव्यस्य कर्ता भवति कल्हणः।
26. राघवपाण्डवीयम् कविराजेन विरचितम्। रामस्य पाण्डवानां च चरितमेव इतिवृत्तम्।
27. राघवनैषधीयम् नाम काव्यस्य कर्ता हरदत्तसूरिः भवति। रामस्य नलस्य च कथा भवति प्रतिपाद्यविषयः।
28. शिवलीलार्णवम् गङ्गावतरणं च इत्यतयोः कर्ता नीलकण्डदीक्षितः भवति। शिवलीलार्णवे द्वाविंशतिः मर्गाः सन्ति। शिवस्य अवतारः भवति प्रतिपाद्यविषयः। गङ्गावतरणे अष्टसर्गाः सन्ति।
29. रुग्मिणोकल्याणम् काव्यस्य कर्ता राजचूडामणिदीक्षितः भवति। तत्काव्यं दशसर्गेणविभक्तम्। श्रीकृष्णस्य रुग्मिण्याः विवाहमेव कथातन्तुः।
30. अष्टसर्गेण विभक्तं जानकीपरिणयम् काव्यस्य कर्ता भवति चक्रकविः।

31. अष्टादशसर्गेण विभक्तमिदं पतञ्जलीचरितम् नाम काव्यस्य कर्ता रामभद्रदीक्षितः भवति । पतञ्जलेः जीवचरित्रमेव इतिवृत्तम्।

### 1.1.4 केरलीयसंस्कृतमहाकाव्यानि

अथ केरलीयसंस्कृतमहाकाव्यान्यधिकृत्य चिन्तयामः।

1. गोविन्दपट्टाभिषेकस्य कर्ता कृष्णलीलाशुकः भवति। काव्येऽस्मिन् द्वादश सर्गाः सन्ति। अस्मिन् काव्ये श्रीकृष्णचरितमेव प्रतिपाद्यविषयः।
2. नलोदयस्य कर्ता वासुदेवः भवति। अस्मिन् काव्ये सम्प्रति चत्वारः सर्गाः सन्ति। नलस्य प्रत्यागमनं, ततः परं तस्य राजभरणं चं अत्र प्रतिपादयति। युधिष्ठिरविजयम् नाम काव्यस्य कर्ता वसुदेवकविः भवति। एकविंशतिः सर्गाः सन्ति।
3. सुकुमारकविविरचितं श्रीकृष्णविलासं महाकाव्यम्। भागवतदशमस्कन्धमाधारीकृत्य रचितमिदं काव्यम्। द्वादशसर्गात्मके अस्मिन् महाकाव्ये मनोहरवर्णनाः सन्ति। पश्य-

   **अस्ति श्रियः सद्म सुमेरुनामा**
   **समस्तकल्याणनिधिर्गिरीन्द्रः ।**
   **तिष्ठन्निदं विश्वमनुप्रविश्य**
   **स्वेनात्मना विष्णुरिवोर्जितेन ।।**
   **मिथस्तिरोभावविलोकनाभ्यां**
   **संक्रीडमानाविव बालकौ द्वौ ।**
   **पार्श्वेषु यस्याशु परिभ्रमन्तौ**
   **चन्द्रांशुमन्तौ नयतो दिनानि ।। इति ।**

4. अतुलकविनिर्मितं मूषिकवंशः इति महाकाव्यम्। अस्मिन् पञ्चदशसर्गाः। कोलत्तुनाट्टुराजवंशं तेषामपदानकीर्तनं च वर्णितमस्मिन्।
5. शङ्करकवेः श्रीकृष्णविजयम्।
6. कोलत्तनाट्टु रविवर्मणः उदयवर्मचरितं, मेल्पत्तूर् नारायणभट्टतिरिमहोदयस्य श्रीमन्नारायणीयम् इत्यादि महाकाव्यानि अपि प्रसिद्धानि।
7. विंशतिशतकस्यारम्भे केरलपाणिनेः ए.आर्. राजराजवर्मणः आङ्गलसाम्राज्यं नाम महाकाव्यमपि प्राधान्यमर्हति। आङ्गलेयाधिपत्यस्य उदयं विकासादिप्रतिपादकं महाकाव्यं भवतीदम्। केरलपाणिनेः ए. आर्. राजराजवर्मणः।

8. त्रयोविंशतिसर्गाः अस्मिन् काव्ये। ततः जोर्जुदेवचरितं महाकाव्यम् इति अपरम्। ए. पद्मनाभशास्त्रिणा विरचितं भवति। इंग्लण्ड् राजस्य जोर्ज् पञ्चमस्य जीवनचरितमाधारीकृत्य रचितं महाकाव्यं भवति जोर्जुदेवचरितम्। अस्मिन् पञ्चदशसर्गाः सन्ति।
9. ततः श्रीनारायणविजयं महाकाव्यम्। प्रोफ. के. बालरामप्पणिक्कर् महोदयेन रचितं भवति श्रीनारायणगुरोः अपदानानि धर्मोपदेशान् च काव्येऽस्मिन् प्रतिपादयति। एकविंशतिसर्गात्मकं काव्यमिदम्। गुरुदेवः शिष्येभ्यो दत्तोपदेशेषु श्लोकमेकं पश्य-

    **किञ्चिन्मतं हैन्दवाख्यं न हिन्दु-**
    **स्थाने वसन्तः स मे हिन्दवो हि।**
    **महम्मदा: क्रैस्तवा: जैनबौद्धाः**
    **सर्वं त्वमी हिन्दवो भिन्नमार्गाः ।। इति ।**

10. पुनः क्रिस्तुभागवतं नाम महाकाव्यम्। प्रोफसर पि.सि. देवस्या महाशयेन विरचितमिदम्। चरितप्रतिपादकोऽयं ग्रन्थः। महाकाव्येऽस्मिन् त्रयस्त्रिंशत् सर्गाः सन्ति।
11. केरलोदयं महाकाव्यम् के. एन्. एषुत्तच्छन् महोदयेन लिखितं भवति। केरलराज्यस्य राष्ट्रिय-सामूहिक-सांस्कारिकचरितप्रकाशकं काव्यं भवतीदम्। महाकाव्येऽस्मिन् एकविंशतिः सर्गाः सन्ति। हृदयहारिणः वर्णनाः काव्यस्यास्य चारुतां वर्धयति। सप्तसप्तत्युत्तरनवशताधिकसहस्रतमे (१९७७) वर्षे अयं ग्रन्थः प्रकाशितः। नवसप्तत्युत्तरनवशताधिकसहस्रतमे (१९७९) माहाकाव्यमिदं केन्द्रसाहित्य अक्कादमी संस्थया पुरस्कृतम्।
12. नवभारतं नाम महाकाव्यं मुतुकुलं श्रीधरमहोदयेन लिखितम्। अष्टादश सर्गात्मके अस्मिन् काव्ये भारतस्य स्वातन्त्र्यलब्धिः, तन्नेतॄणां अपदानकीर्तनमादिकं वर्णितं दृश्यते। हिमालयवर्णना-

    **मुनिप्रौढैः समाश्लिष्टो**
    **मौनवेदान्तचिन्तकः ।**
    **सन्ध्ययोरुभयोः स्वर्ण-**
    **तालवृन्तप्रवीजितः ।। इति ।**

13. विश्वभानुः नाम महाकाव्यमन्यत्। डा. पि.के. नारायणपिल्लामहाशयेन लिखितमिदं महाकाव्यम् एकविंशतिः सर्गात्मकं भवति। स्वामिविवेकानन्दस्य चरितमस्य इतिवृत्तम्।

### 1.1.5 पञ्चमहाकाव्यानि

संस्कृतसाहित्ये अमूल्यरत्नानि भवति महाकाव्यप्रस्थानम्। तेषु महाकाव्येषु पञ्चमहाकाव्यानि प्रसिद्धानि। तानि कुमारसंभवम्, रघुवंशम्, किरातार्जुनीयम्, नैषधीयचरितम्, शिशुपालवधम् च।

#### 1.1.5.1 रघुवंशम्

महाकविः कालिदासस्य प्रौढतमं महाकाव्यं भवति रघुवंशम्। रघुवंशे एकोनविंशतिः सर्गाः सन्ति। अस्मिन् काव्ये ततोऽध्यधिका सर्गाः सम्भवन्तीति केचन। रघुवंशे दिलीपवर्णनया एव काव्यं आरभते। दिलीपादारभ्य अग्निवर्णपर्यन्तानां राज्ञां चरितं प्रतिपादयति अस्मिन् काव्ये। इन्दुमतीस्वयंवरवर्णने राज्ञां पुरः सञ्चरन्तीम् इन्दुमतीं कविः एवं वर्णयति

दीपशिखा कालिदासः

**सञ्चारिणी दीपशिखेव रात्रौ**
**यं यं व्यतीयाय पतिंवरा सा ।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे**
**विवर्णभावं स स भूमिपालः ।। इति।(6.67)**

इन्दुमतस्वयंवरवर्णनम् अजविलापवर्णनं च रघुवंशे पृथक् वर्ण्यते। दशसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता। रघुवंशे रामायणवर्णितैः नृपैः सह वर्णनायां भेदं आपतति। परन्तु वायुपुराणं वर्णिता रामवंशावल्या सह रघुवंशवर्णिता रामवंशावली भूयसा समञ्जस्यं धारयति।

#### 1.1.5.2 कुमारसम्भवम्

कुमारस्य जननादारभ्य तारकासुरवध-पर्यन्तकथा वर्णिता

कालिदासस्य अपरं महाकाव्यं भवति कुमारसम्भवम्। इदं सप्तदशसर्गात्मकं महाकाव्यं भवति। कुमारस्य जननादारभ्य तारकासुरवधपर्यन्तकथा काव्येऽस्मिन् वर्णिता। अष्टमसर्गपर्यन्तमेव कुमारसम्भवं कालिदासेन कृतम् इति। नवमसर्गात् आरभ्य सप्तदशपर्यन्तं केनाप्यन्येन योजितमिति श्रूयते। काव्यस्यारम्भे नगाधिराजस्य हिमालयस्य वर्णना हृद्या एव।

**अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः ।**

**पूर्वापरौ तोयनिधी वगाह्य**
**स्थितः पृथिव्या इव मानदण्डः ।। इति।**(1.1)

प्रकृतिनिरीक्षणं, काव्यात्मकता, प्रसादात्मकता, अलङ्कारप्रयोगश्च अनितरसाधारणी एव। मानवजीवनस्य सम्पूर्णं चरितमुपस्थापयितुं रघुवंशं प्रेम्णः परं प्रकर्षं प्रकाशयितुं कुमारसम्भवं चासौ महाकविः सूचितवान्।

### 1.1.5.3 किरातार्जुनीयम्

किरातस्य अर्जुनस्य च पराक्रमः भवति प्रतिपाद्यविषयः

कौशीकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भवति भारविः। भारविना विरचितं किरातार्जुनीयं पञ्चमहाकाव्ये एकं स्थानं अलङ्करोति। भारवेः अर्थगौरवं प्रसिद्धमेव। अस्मिन् काव्ये अष्टादश सर्गः सन्ति। किरातस्य अर्जुनस्य च पराक्रमः भवति प्रतिपाद्यविषयः। महाभारतस्य वनपर्वस्य उद्धृतं भवति काव्यस्यकथा। द्यूते पराजितः युधिष्टिर सानुजः सभार्याः संविदानुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति। किरातमहायेन दुर्योधनवृत्तान्तं जानाति। ततः परं राज्यावकाशं लब्धुं युद्धाय भीमसेनः द्रौपदी च युधिष्ठिरं प्रेरयति। युद्धाय दिव्यायुधाः आवश्यकम्। दिव्यास्त्रलाभाय अर्जुनः तपसार्थं हिमालयं प्रविश्यति। सः तव कर्तुं आरभ्यते। तं परीक्षितुं शिवः किरातवेषेण तत्रागच्छति। परीक्षणे अर्जुनः विजयति। प्रीतः शङ्करः पाशुपतास्त्रं ददाति। तदेव किरातार्जुनीयस्य इतिवृत्तम्। वीररस प्रक प्रधानम्। एवमेव पञ्चदशे सर्गे चित्रकाव्यस्य वर्णनं दर्शनीयम्।

### 1.1.5.4 शिशुपालवधम्

शिशुपालवधम् माघम् इति नाम्ना प्रसिद्धम्

पञ्चमहाकाव्येषु अन्यदेकं भवति माघस्य शिशुपालवधम्। महाकाव्यमेतत् माघम् इति नाम्ना च प्रथितम् अस्ति।

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः ।।**

द्वाविंशतिसर्गात्मके अस्मिन् काव्ये शिशुपालवधे युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। 'नवसर्गे गते माघे नवशब्दो न विद्यते' इति प्रथा।

### 1.1.5.5 नैषधीयचरितम्

नैषधीयकर्ता श्रीहर्षः भवति। अस्मिन् महाकाव्ये द्वाविंशतिः सर्गाः सन्ति। निषधराजकुमारस्य नलस्य चरितं अत्र वर्णयति। नलस्य वर्णनया ग्रन्थमारभ्यते।

**निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि।**
**नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः।।इति।**
(1.1)

निषधराजस्य नलस्य चरितं वर्ण्यते

निषिधराजकुमारः विदर्भाया राजकुमारी दमयन्ती च परस्परं अनुरक्तौ आस्ताम्। कश्चन हंसः तयोः सहायं करोति। पुत्र्याः वैशम्यं ज्ञात्वा तस्याः स्वयंवरं पिता निश्चिवान्। तत् श्रुत्वा नलः तत्र आगच्छति। तस्मिन् समये दमयन्त्यां आसक्ता नलरूपं धृत्वा तत्रागच्छन्ति चत्वारो दिक्पालाः। पश्चात् च ते नलस्य समर्पणभावं दृष्ट्वा प्रसन्नाः देवाः स्वानि स्वानि रूपाण्येव गृह्णाति। ततश्च सुखेन दमयन्ती नलं स्वयंवरस्रजा विभूषयति। परिणयानन्तरं जातेर्ष्युः कलिर्नलं तं विरूपयति। पश्चात् च लब्धस्वरूपेण नलेन सह दमयन्त्याः सुखं सङ्गमो भवति। काव्ये द्वाविंशतिः सर्गाः सन्ति।

## Summarised Overview

संस्कृतसाहित्ये पञ्चमहाकाव्यानि विश्वविख्यातानि सन्ति। वाक्यानां समूहो महावाक्यमिति तत्रभवान् विश्वनाथः – 'वाक्योच्चयो महावाक्यम्'। योग्यताऽऽकाङ्क्षाऽऽसत्तिमत्वे सति वाक्योच्चयत्वं महावाक्यमिति वक्तुराशयः। रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयम्, नैषधीयचरितञ्चेति पञ्चमहाकाव्यानि इति नाम्ना प्रसिद्धानि। तेषु किरातार्जुनीयं शिशुपालवधं, नैषधीयचरितं त्रीण्येतानि बृहत्रयी नाम्ना ख्यातिं गतानि महाकाव्यानि। तत्र रघुवंशं, कुमारसम्भवं चेति महाकाव्यद्वयं कालिदासेन व्यरचयत्। रघुवंशस्य कथावस्तु सूर्यवंश राज्ञां वर्णनाधारितमस्ति। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः सह भेदः आपतति, परन्तु वायुपुराण वर्णितानुसारं, रामवंशावल्या सह रघुवंशवर्णितवंशावली भूयसा समाङ्गस्यं धारयति। रघुवंशं सूर्यकुलोत्पन्नानां भूपतीनां चरितकथनात्मकं वर्तते। शिवपार्वत्योः विवाहादारभ्य कार्तिकेयजन्मनः तारकासुरवधस्य च सुरुचिरं काव्यकलापूर्णं वर्णनं कुमारसम्भवाख्ये महाकाव्ये विहितम्। महाकविभारविना महाभारतकथामाश्रित्य अलङ्कृतकला पक्षप्रधानशैल्या विरचितम् अष्टादशसर्गात्मकं वीररसप्रधानं बृहत्त्रय्यां प्रथमपरिगणितं किरातार्जुनीयं नाम एकमेव महाकाव्यं रचितम्। महाकविना श्रीहर्षेण नैषधीयचरितमहाकाव्ये नलदमयन्त्याः स्नेहकथायाः चित्ताकर्षकं वर्णनं द्वाविंशतिसर्गेषु समाहितम्। धर्मार्थकाममोक्षचतुर्वर्गफलसमवेतं महाकाव्यमिदम् शिशुपालवधमहाकाव्यम् इत्येका एव

कृतिः समुलभ्यते माघस्य। संस्कृतसाहित्ये पाण्डित्यमयशैल्याः चरमोत्कर्षो दृश्यते श्रीमाघे। महाकविमाघेन एकस्यामेव कृतौ सर्वोत्कृष्टा प्रसिद्धिरवापि। संस्कृतसाहित्यजगति न कोऽपि तादृशः ख्यातिं शिशुपालवधमहाकाव्याभिधेयं काव्यमूरीकृतवान्न स्यात्।

## Assignments

**टिप्पणीं लिखत**

1. भट्टिकाव्यम्।
2. सुकुमारकविः।
3. मूषिकवंशः।
4. आङ्गलसाम्राज्यम्।
5. क्रिस्तुभागवतम्।
6. माघम्।
7. विश्वभानुः।
8. हरविजयम्।
9. पातालविजयम्।

**आशयं विशदयत**

1. 'सर्गबन्धो महाकाव्यमुच्यते'।

**निबन्धं लिखत**

1. महाकाव्यप्रस्थानम् अधिकृत्य निबन्धं रचयतु?
2. महाकाव्यलक्षणं किम्?
3. पञ्चमहाकाव्यानि कानि? विशदयत।
4. महाकाव्यस्यास्य विशेषता ।

## Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur
3. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
4. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak

Prakasan, Kanpur 1981
5. Mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh, The Kiratarjuniya of Bharavi Ed., Tukaram Javaji, Nirnayasagar Press, Bombay1907
6. Sri Gurunathavidyanithi, Kiratarjuniya, Rudra Printing Works, Culcutta.
7. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
8. Pandit Durga Prasad & Pandit Sivadatta, Sisupalavadha of Magha Ed., Tukaram Javaji, Nirnayasagar Press, Bombay 1905

# References

1. कविराजकश्रीमदाचार्यद्विजेन्द्रशास्त्रिभिः, संस्कृतसाहित्यविमर्शः, भारतीय प्रतिष्ठानम्, मयराष्ट्रनगरम्(उत्तरप्रदेशः) 32, आनन्दपुरी।
2. डा.उदयशङ्कर् झा, संस्कृतनिबन्धमञ्जुषा, चौखम्बा सुरभारति प्रकाशन्, वाराणसी ।
3. आचार्यः श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वाराणसि, २२१००१, 1982
4. T.K.Ramachandra Iyer, A short history of Sanskrit literature, R.S. Vadhyar and sons, Kalpathi, Palakkad.

## Space for Learner Engagement for Objective Questions

**Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.**

UNIT 2

# किरातार्जुनीयस्य सामान्यपरिचयः

## Learning Outcomes

- किरातार्जुनीयमहाकाव्यविषये परिचयं प्राप्नोति।
- भारवेः कालः देशः इत्यादिकं विवरणोतुं शक्ष्यति।
- महाकवेषु भारवेः किं वैशिष्ट्यमिति ज्ञातुं शक्ष्यति।
- किरातार्जुनीयस्य भावनादिकं जानाति।

## Background

पञ्चमहाकाव्येषु भारवेः किरातार्जुनीयम् अनुपमं स्थानं भजते। महाकवीनां गणनाप्रसङ्गे महाकविः भारविः द्वितीयस्थाने आयाति। महाकविना महाभारतकथामाश्रित्य अष्टादशसर्गात्मकं वीररसप्रधानं 'किरातार्जुनीयं' नाम महाकाव्यस्य संरचना कृता। केवलम् एकेनैव ग्रन्थेन 'भारवेः भारवेरिव' इति ख्यातिं प्रापितो भारविः पण्डितयुगस्य प्रवर्तको गण्यते। वस्तुतः महाकाव्यमिदं प्रतिपदरूपेण भाषासौष्ठवस्य, भावगाम्भीर्यस्य, अर्थगौरवस्य च पताका इव आभाति। महाभारतात् संक्षिप्तकथानकं स्वीकृत्य भारविः स्वकल्पनाभिः, काव्यप्रतिभया च मौलिकताम् उत्पादितवान्। महाभारतस्य शैली सरला अस्ति किन्तु किरातार्जुनीयस्य शैली क्लिष्टा, अलंकृता च अस्ति (नारीकेलपाक इव)। 'भारवेरर्थगौरवम्' इत्युक्त्यनुसारं किरातार्जुनीयस्य अर्थगौरवम् अतीव प्रसिद्धमस्ति।

अत्र अर्जुनः किरातवेषधारिणा शङ्करेण सह युद्धं वर्णितम्। अत एव ग्रन्थस्य नामकरणं कृतं- 'किरातार्जुनीयम्' किरातश्च अर्जुनश्च किरातार्जुनौ, किरातार्जुनौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्। राजनीतेरपि वैशिष्ट्यवर्णनं, काव्येऽस्मिन् उपलभ्यते। ग्रन्थस्यास्य नायकः अर्जुनः, नायिका द्रौपदी, च वर्तते। वीररसप्रधानं, गौडीशैलीसमन्वितं भवति महाकाव्यमिदम्। समस्ते महाकाव्ये सर्गान्ते 'लक्ष्मी' शब्दप्रयोगात् काव्यमिदं 'लक्ष्यंकम्' इति कथ्यते। महाकाव्यस्य सर्वाण्यपि काव्यशास्त्रनिर्दिष्टानि लक्षणानि काव्येऽस्मिन् संघप्यन्ते। समस्तसंस्कृतसाहित्ये किरातार्जुनीयस्य सममन्यत् एतादृशम्

ओजःपूर्णं काव्यं न मिलति। महाकवेः भारवेः जन्म-देश-कालादिविषये, किरातार्जुनीयस्य कथावस्तुवैशिष्ट्यादिविषये च भवान् एतस्मिन् पाठे विवरणं प्राप्स्यति।

## Keywords

भारवेः जीवितकालः, कविपरिचयः, काव्यस्वरूपम्, किरातार्जुनीयमहाकाव्यस्य समीक्षात्मकः परिचयः, किरातार्जुनीयम् इति काव्यनामकरणम्, चरित्रचित्रणम्, रसाभिव्यञ्जनम्, भाषा-शैली, अलङ्कारप्रयोगः, भारवेरर्थगौरवम्।

## Discussion

### 1.2.1 भारवेः जीवितकालः

भारवेः स्थितिकालः षष्ठशताब्ध्याः उत्तरार्द्धे भवितुमर्हति

महाकवेः भारवेः किरातार्जुनीये महाकाव्ये तज्जीवनविषयकसाक्ष्याभावात् बाह्यसाध्यानुसारं तस्य कालनिर्धारणं करणीयम्। दक्षिणभारते एहोलग्रामे 634 ख्रिष्टीया जैनकविना स रविकीर्तिना लिखितशिलालेखे "स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः" इत्यनेन ज्ञायते यत् सप्तम-शताब्दद्याः पूर्वार्द्धं यावत् भारविः सुविख्यातः कविः आसीत्। काव्यकलायाः उत्तरोत्तरप्रभावदृष्ट्या कालिदासः भारवेः पूर्ववर्ती महाकविः माघश्च उत्तरवर्ती कविरासीत्। भारविः कालिदासस्य काव्यशैलीतः क्वचित् क्वचित् प्रभावितः परिलक्ष्यते। अतः भारविः कालिदासात् परवर्तीति विदुषां मतम्। एवमेव भारवेः काव्यशैलीप्रभावः माघस्य काव्ये लक्षते इत्यतः माघात् पूर्ववर्ती भारविरासीदिति च अनुमीयते। एवं च कालिदासमाघयोः मध्यवर्ती अयं भारविः आसीदिति ज्ञायते। माघस्य स्थितिकाल: 700 ख्रिष्टीयाब्द मन्यते; अतः भारवेः प्रस्थितिकालः षष्ठशताब्ध्याः उत्तरार्द्धे भवितुमर्हति। 'काशिकायां भारवेः (किरात 3/14) इत्युद्धरणं प्राप्यते। अतः भारवेः कालः वामनजयादित्याभ्यां (सप्तम- शताब्दी) पूर्वे षष्ठशताब्धाः उत्तरार्द्धे भवेत्।

अवन्तिसुन्दरीकथानुसारं दण्डिनः प्रपितामहः दामोदरः एव 'भारविः' यः विष्णुवर्द्धनस्य (615 ई.) सभा-पण्डितो आसीत्। अतः तस्य कालः षष्ठशताब्धाः उत्तरार्द्धे भवितुमर्हति। निष्कर्षरूपेण एवं प्रतिभाति यत् भारवेः स्थितिकालः षष्ठशताब्धाः उत्तरार्द्धे सप्तमशताब्याः पूर्वार्द्धे (550-600 ई.) च भवितुम् अर्हति।

### 1.2.2 कविनापरिचः

कौशिकवंशीयः ब्राह्मणः दामोदरः 'भारवि' नाम्ना ख्यातः

भारविना स्वकृतौ किरातार्जुनीये स्वजीवनपरिचयविषये किमपि न लिखितम्। परञ्च अवन्तिसुन्दरीकथायां भारविविषयेऽपि कञ्चिन्मात्रोल्लेखं उपलभ्यते। तदनुसारं भारतस्य पश्चिमोत्तरप्रदेशे आनन्दपुरनामकं स्थानं विद्यते। तत्र कौशिकवंशीयाः ब्राह्मणाः निवसन्ति स्म। किञ्चित्कालानन्तरं ते ब्राह्मणा नासिक्यदेशस्थिते अचलपुरनामकस्थाने निवासं अकुर्वन्। अस्मिन् एव वंशे दामोदरः जन्म लेभे। स एव दामोदरः भारवि नाम्ना ख्यातः। दामोदरस्य पितुः नाम नारायणस्वामी आसीत्। भारविः राज्ञा विष्णुवर्धनेन सह मैत्रीं असीत्। कालानन्तरं राज्ञा दुर्विनीतेन तत्पश्चात् पल्लवराज्ञा विष्णुना आश्रयं प्राप्तम्। भारवेः त्रयः पुत्राः आसन्। भारवेः मध्यमपुत्रस्य मनोरथस्य पुत्रचतुष्टयेषु एकः वीरदत्तः आसीत्। वीरदत्तस्य गौरीनामककन्यया सह पाणिग्रहणं अभवत्। अस्य एव पुत्रः दण्डी अभवत्। दण्डिनः वंशजाः अधुना हरिद्वारे वाराणस्यां ग्वालियरे च निवसन्ति। वाराणस्यां ब्रह्मघाटोपरि एकं विशालं भवनमस्ति यस्य नाम दण्डिभवनम्। अत्र दण्डिनः वंशजाः निवासं कुर्वन्ति। एवं ज्ञायते यद् भारविः दण्डिनः पितामहः आसीत्। तत्र भारविविषयकः श्लोकोऽयं प्राप्यते-

**स मेधावी कविर्विद्वान् भारविः प्रभवो गिराम् ।**
**अनुरुध्याकरोन्मैत्री नरेन्द्रे विष्णुवर्धने ॥**

### 1.2.3 काव्यस्वरूपम्

बृहत्त्रयी - किरातार्जुनीयं, नैषधीयचरितं, शिशपालवधं

भारवेः कीर्तिः तस्य एकमात्रमहाकाव्ये एवाधारीभूतः। केवलमेकेनैव ग्रन्थेन भारविना संस्कृतकवीनां महत्त्वपूर्ण स्थानं प्राप्तम्। संस्कृतमहाकाव्यानां बृहत्त्रय्यां (किरातार्जुनीयम्, नैषधीयचरितम्, शिशुपालवधम्)। लघुत्रयी (कुमारसंभवम्, रघुवंशम्, मेधदूतम्)। किरातार्जुनीयस्य प्रथमं स्थानं विद्यते। महाकाव्येऽस्मिन् भारविना काव्यस्य सर्वेषां गुणानां सन्निवेशं कृतम्। उदातं सजीवं च वर्णनं, कमनीयकल्पना, अर्थगौरवं, हृदयग्राही शब्दयोजनं, कोमलकान्तपदावली,

हृदयाकर्षकः रोचकश्च संवादः, अलङ्काराणां चमत्कारात्मकप्रयोगः कलात्मककाव्यशैली, मनोहरं प्रकृतिचित्रणं, रसपेशलत्वं, सजीवचरित्रचित्रणश्च एते सर्वे महनीयाः गुणाः भारविं कवीनाम् अत्यन्तोच्चस्थाने प्रतिष्ठापितं अकुर्वन् ।

### 1.2.4 किरातार्जुनीयमहाकाव्यस्य समीक्षात्मकः परिचयः

अर्जुनस्य पराक्रमात् प्रभावितः शिवः तस्मै पाशुपतास्त्रं ददाति

किरातार्जुनीये अष्टादशसु सर्गेषु वर्णितकथायाः सारः एवमस्ति। द्यूतक्रीडायां पराजिताः पाण्डवाः स्वपत्न्या द्रौपद्या सह द्वैतवने निवसन्ति। युधिष्ठिरेण दुर्योधनशासनस्य वृत्तं नेतुं एकः वनेचरः प्रेषितः। वनेचरः वृत्तान्तं ज्ञात्वा आगच्छति। दुर्योधनस्य सुव्यवस्थितशासनस्य वृत्तं श्रावयति। द्रौपदी कटुवचनैः युधिष्ठिरं युद्धं कर्तुं उत्तेजयति च। भीमः द्रौपद्याः वचनं समर्थयति परञ्च युधिष्ठिरः प्रतिज्ञां त्यक्त्वा युद्धं कर्तुं न अङ्गीकरोति। तत्पश्चात् तत्रागतेन व्यासेन दिव्यास्त्रार्थं तपः कर्तुं अर्जुनः इन्द्रकीलपर्वतं प्रेषितः। इन्द्रेण अर्जुनतपभङ्गार्थम् अप्सराः प्रेषिताः परं च अर्जुनः व्रतविचलितः न भवति। अर्जुनस्य तपदर्शनार्थं मनुष्यरूपं धृत्वा इन्द्रः आयाति। शिवस्य तपः निमित्तं उपदिशति च। अर्जुनः पुनः कठोरतपस्यायां लीनः भवति। अर्जुनं हननाय मूकनामकः दानवः वराहरूपं धारयति। शिवश्च अर्जुनस्य तपस्यायाः परीक्षणार्थं किरातवेषं धारयति। किरातः अर्जुनश्च सहैव वराहोपरि बाणं क्षिपतः। शिवस्य बाणः वाराहं हत्वा पृथिव्यां प्रविष्टः जातः। अन्यबाणस्य कृते शिवार्जुनमध्ये वादविवादं भवति तदनन्तरं युद्धं च। अर्जुनस्य पराक्रमात् प्रभातिवः शिवः तस्मै पाशुपतास्त्रं ददाति। एवं महाभारतस्यात्यल्पकथा कल्पनाशक्त्या विस्तृतरूपेण भारविना प्रस्तुता।

### 1.2.5 किरातार्जुनीयम् इति काव्यनामकरणम्

किरातार्जुनौ अधिकृत्य रचितं काव्यं किरातार्जुनीयम्

कविना किरातार्जुनीयस्य मूलं कथावस्तु महाभारतस्य वनपर्वणः स्वीकृतमस्ति। किरातवेषधारी शिवः एतस्मिन् काव्ये प्रतिनायकः अर्जुनश्च नायकः। अर्जुनः तपसा शिवं तोषयति। किरातवेषधारी शिवः अर्जुनस्य पराक्रमं परीक्ष्य प्रसन्नो भूत्वा तस्मै दिव्यास्त्रं प्रददाति इति काव्यस्यास्य मुख्यः वर्ण्यविषयः। अतः किरातार्जुनौ अधिकृत्य रचितस्य अस्य काव्यस्य किरातार्जुनीयम् इति नाम सार्थकम् अस्ति। किरातार्जुनीयम् इत्यस्य पदव्युत्पत्तिः इत्थमस्ति- किरातश्च अर्जुनश्च इति किरातार्जुनौ(द्वन्द्वसमासः)। तौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्।

### 1.2.6 चरित्रचित्रणम्

नायकः अर्जुनः

भारविः पात्राणां चरित्रचित्रणे सफलः विद्यते। प्रसङ्गानुकूलं सर्वाणि पात्राणि स्वस्वक्षमत्वयुक्ताः सन्ति। एकतः भीमः सहनशीलतायाः प्रतिमूर्तिः। अस्य महाकाव्यस्य नायकः अर्जुनः अतिसंयतः वीरः धीरः पुरुषः विद्यते। भारवेः प्रत्येकं पात्रं व्यक्तिगतास्तित्व-सजीवता-स्वाभाविकता-चारित्रिकदृढतादिभिः गुणैर्युक्तः वर्तते।

### 1.2.7 रसाभिव्यञ्जनम्

वीररसप्रधानं भवति किरातार्जुनीयम्।

रसप्रयोगे नैपुण्यं प्रशंसनीयमेव। भारवेः किरातार्जुनीयं वीररसप्रधानं महाकाव्यं वर्तते अन्ये रसाः अङ्गरूपेण दृष्टाः। भीमार्जुनयोः उक्तीषु वीररसस्य व्यञ्जना दृश्यते। वीररसयुक्तैः वचनैः द्रौपदी युधिष्ठिरं युद्धाय प्रेरयति। निदर्शनार्थं भीमस्य कथनं द्रष्टव्यम् –

**द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।**
**प्रसहेत रणं तवानुजान् द्विषतां कः शतमन्युतेजसः ।।**

वीररसेन सह कविना शृङ्गाररसस्य अपि अत्युत्कृष्टः प्रयोगः कृतः । भारवेः अमर्यादित डागारं दृष्टव्यं यत्र प्रगल्भानायिकायाः रागपरवशता दर्शिता-

**प्रियेऽपरा यच्छति वाचमुन्मुखो निबद्धदृष्टिः शिथिला कुलोच्चया ।**
**समादधे नांशुकमाहितं वृथा विवेद पुष्येषु न पाणिपल्लवम् ।।**

### 1.2.8 भाषा- शैली

भारवेः भाषा सशक्ता नूतनशैली च वर्तते

संस्कृतसाहित्ये नूतनशैल्याः प्रवर्तकः भारविः वर्तते। यद्यपि तेन कालिदासादीनां अनुकरणमपि कृतं तथापि काव्ये पाण्डित्यप्रदर्शनस्य प्रवृत्तेः प्रथमोद्भावकः वर्तते। तस्य भाषायां काव्यगतवैशिष्ठ्येन सह पाण्डित्यप्रदर्शनं विद्यते। भाषा सशक्ता स्पष्टार्थप्रकाशिका च वर्तते। तस्य कारणं राजनैतिक व्यामोहमपि अस्ति।

### 1.2.9 अलङ्कारप्रयोगः

भारवेः महाकाव्ये अलङ्काराणां सुन्दरं संयोजनं अस्ति । शब्दालङ्काराणां अर्थालङ्काराणां च यथास्थानं प्रयोगः विद्यते। अलङ्कारमाध्ययेन पाण्डित्यप्रदर्शनस्य प्रवृतिः भारविकालादेव उदिता। शब्दालङ्कारेषु अनुप्रासं, यमकं, श्लेषाद्यलङ्कराणां प्रयोगः दृश्यते। एकस्य श्लोकस्य प्रत्येकचरणेषु एकस्यैव व्यञ्जनस्य प्रयोगं विद्यते-

**न नोन्नतुन्नो तुन्नोनो नाना नानानना ननु ।**
**नुन्नोऽनुन्नो ननुन्नेनो नानेनानुन्ननुन्ननुन् ।।**

अर्थालङ्कारेषु उपमा-उत्प्रेक्षा-रूपक-निदर्शना-समासोक्ति-काव्यलिंग-अर्थान्तरन्यास-अतिशयोक्ति- व्यतिरेकादयः प्रियाः अलङ्काराः विद्यन्ते ।

शब्दालङ्कारस्य अर्थालङ्कारस्य च यथास्थानं प्रयोगः विद्यते।

अलङ्कारवत् कविना विभिन्नछन्दसामपि प्रयोगः कृतः । वंशस्थ उपजाति-द्रुतविलम्बित-पुष्पिताग्रा-वसन्ततिलकादयः प्रमुखछन्दाः सन्ति। भारवेः वंशस्थछन्दं प्रशंसन् क्षेमेद्रेणोक्तम्-

**वृत्तच्छत्रस्य सा काऽपि वंशस्थस्य विचित्रता ।**
**प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता ।।**

### 1.2.10 भारवेरर्थगौरवम्

संस्कृतसाहित्यस्य कविभिः अपि काव्येषु नूतनशैलीवैशिष्ट्येन च साहित्यजगति स्वस्थानं सुरक्षितम्। महाकविकालिदासः उपमालङ्कारक्षेत्रे सिद्धहस्तः, महाकविभारविः अर्थगौरवक्षेत्रे। अल्पशब्देषु विपुलार्थस्य सन्निवेशकरणं एव अर्थगौरवं विद्यते। भारविना स्वतः एव स्वकवितायाः वैशिष्ट्यं प्रतिपादितम् -

**परिणामसुखे गरीयसी व्यथकेऽस्मिन् वचसि क्षतौजसाम्।**
**अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः।।**

अल्पशब्देषु अर्थबाहुल्यं एव। अर्थगौरवम्सर्गबन्धात्मिका रचना

अर्थात् अल्पशब्देषु अर्थबाहुल्यम् एव अर्थगौरवनाम्ना ख्यातम्। कवेः कविता परिणामे सुखप्रदा भवति। यथा अत्यल्पौषधिः अपि भयङ्कररोगविनाशाय क्षमत्वं धृत्वा स्वगुणान् प्रदर्शयति तथैव भारवेरपि कविता क्षतौजबाणानां परिणामे सुखदा भवति।

यद्यपि भारविः कलाप्रियः कविः तथापि माघस्य समं अत्यधिकालङ्कृतः नास्ति। भारविः शब्दाडम्वरेषु सर्वदा न गच्छति प्रत्युत अर्थगाम्भीर्यं प्रति सदैव सतर्क दृश्यते। प्रसिद्धेन टीकाकारेण मल्लिनाथेन भारवेः उक्तयः नारिकेलफलसदृशाः कथिताः-

**नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते।**
**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।।**

भारवेः शब्दाः नारिकेलफलसदृशाः विद्यन्ते। यथा-नारिकेलफलस्य ब्राह्यरूपं रूक्षं विषमं च विद्यते परं च त्रोटनानन्तरं अन्तर्भागे स्वादिष्टफलयुक्तः भवति तथैव भारवेः शब्दाः अत्यल्पाः कठिनाः च परार्थबोधनानन्तरं गम्भीरा: मनोहराः च भवन्ति। द्वितीये सर्गे युधिष्ठिरेण कृतं भीमवचनस्य प्रशंसनं भारवेः कलाविषयकसिद्धान्तस्य निदर्शनम्-

**स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।**
**रचिता पृथगर्थता गिरां न व सामर्थ्यमपोहितं क्वचित् ।।**

अर्थात् पदप्रयोगे स्पष्टत्वं अर्थगौरवं पदेषु भिन्नार्थत्वं परस्परसाकांक्षत्वं भवितव्यम्। एते सर्वे गुणाः भारवेः महाकाव्ये उपलब्धाः भवन्ति। परं च अत्यर्थं गाम्भीर्यमेव तस्य काव्यस्य दुर्बलत्वम्। अर्थगौरवेणैव तस्य काव्ये काठिन्यं विद्यते। आद्यः सर्गत्रयं विशेषरूपेण कठिनः जायते। एते सर्गाः पाषाणत्रयनाम्ना ख्याताः तथापि अर्थगम्भीर्यं तस्य काव्यस्य प्रभावोत्पादकं वैशिष्ट्यं येन तस्य काव्यं पाठकान् आकर्षयितुं सफलं भवति।

परिमितशब्दः अपरिमितार्थप्रकाशनस्य गुणः सूक्तीनां प्रयोगकरणात् विद्यते। तस्य काव्ये शाश्वत सत्ययुक्तानां सूक्तीनां बाहुल्यं विद्यते। महाकविना सूक्तिभिः जीवनोपयोगितथ्यं राजनीतिविषयकं गुढरहस्यं लोकव्यवहारविषयकं बहुमूल्यतथ्यं जीवनं गम्भीरानुभवादयः प्रस्तुताः। निदर्शनं द्रष्टव्यम् -

**क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ।।**

हितकरं तथैव सद्यः मनोहरं वचनं दुर्लभं भवति

अत्र कटुसत्यकथनात्पूर्वं वनेचरः प्रथमं स्वामिनः युधिष्ठिरात् क्षमायाचनां करोति। सः युधिष्ठिरं सम्बोधयन् कथयति यत् कार्येषु नियुक्तैः भृत्यैः स्वामिनः न प्रतारणीयाः। ये भृत्याः नृपस्य पुरतः सत्यभूतमर्थं न उक्त्वा मिथ्याभूतं स्तुतिपरकं मधुवाक्यं कथयन्ति ते तु नृपस्य प्रवञ्चनं कुर्वन्ति अनेन प्रभुकार्यस्य हानिर्भवति। स्वनियुक्तैः गुप्तचरमुखैः राजानः सर्वं अवगच्छन्ति। अत एव शत्रोः दुर्योधनस्य विषये मम सत्यभूतं वचनम् अप्रियं भवतु प्रियं वा तद् भवता क्षम्यताम्। यतः हितकरं तथैव सद्यः मनोहरं वचनं दुर्लभं भवति। वस्तुवस्तु जगति प्रियहितकरयोः वाक्ययोः विरोधः जायते यतो हि हितकरसत्यवचनेषु कटुत्वं विद्यतैव। राजनैतिकसत्यस्य कविना कीदृशं विश्लेषणं कृतम् -

**व्रजन्ति से मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।**
**प्रविश्य हि घ्नन्ति शठांस्तथाविधान् संवृताङ्गन्निशिता इवेषयः ।।**

अत्र शठे शाठ्यं समाचरेद् इति प्रतिपादितं महाकविना। ये जनाः कपटयुक्तेषु प्रतिकपटं न कुर्वन्ति ते मुर्खा सदा पराजयं प्राप्नुवन्ति यथा तीक्ष्णाः बाणाः कवचादिभि अनाच्छादिताङ्गानां पुरुषाणां शरीरं प्रविश्य तान् विनाशयन्ति तथा कपटयुक्ताः जनाः सज्जनानां मनसि आत्मनः विश्वासमुत्पाद्य आत्मीयाः भूत्वा तान् सज्जनान् विनाशयन्ति। अत एव आर्जवं कुटिलेषु नीतिः कुटिलेष्वकौटिल्यं न उचितम् । शठेन दुर्योधनेन सह शाठ्यस्य व्यवहारः एवं करणीयः इति द्रुपदात्मजायाः कथनस्याभिप्रायः ।

एवं अर्थगाम्भीर्यस्य निदर्शनं स्थले स्थले किरातार्जुनीये द्रष्टव्यम्। भारविः अलङ्कृतकाव्यशैल्याः कविः विद्यते। काव्ये अलङ्काराणां प्रयोगे सत्यपि अर्थगौरवं क्षीणं नास्ति। कालिदासस्य माघस्य काव्येष्वपि अर्थगाम्भीर्य विद्यते परञ्च भारवेः अर्थगौरवाद् न्यूनं वर्तते। अर्थगौरवं सुरक्षितं कृत्वा परिष्कृतालङ्कृतपदावल्याः प्रयोगेण कविना स्वमहाकाव्यं उत्कृष्टं कृतम्।

भारविना दीर्घार्थोऽपि अत्यल्पशब्देषु प्रकटितम्। तेन किरातार्जुनीये अतिकौशलेन गम्भीरार्धकानां पदानां प्रयोगः कृतः। तस्य प्रत्येकं पदमर्थगाम्भीर्येन समन्वितं साभिप्रायं च। अनेनैव कृष्णकविना 'भारवेः कविता सन्मार्गदीपिका' इति कथित।

## Summarised Overview

महाकविः भारविः शैवमतावलम्बी प्रकाण्डपण्डितः राजनीतेर्महान् ज्ञाता, वीररसवर्णनकुशलः अलङ्कृतशैल्याः प्रवर्तकश्चासीत्। भारविना निजपरिवारस्य, निवासस्थानस्य, पितुः पितामहस्य गुरोर्वा विषये कोऽप्युल्लेखो न कृतः। दण्डीविरचितं 'अवन्तिसुन्दरीकथानुसारेण' कुशिकगोत्रीयाः ब्राह्मणाः 'आनन्दपुरे' निवसन्ति स्म। ततः परं ते वरारप्रान्ते अचलपुरे 'एलिचपुरे' निवासम् अकुर्वन् । अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्रो दामोदरः आसीत्। अयमेव दामोदरः 'भारवि' नाम्ना प्रख्यातोऽभवत्। इत्थं भारविः दण्डिनः प्रपितामहः आसीत्। तस्य स्थितिकालः 600 ईसवीयसमीपे मन्यते। अस्य 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं प्राप्यते, यत् बृहत्त्रय्यां प्रथमस्थाने' इति परिगणितम्। किरातार्जुनीये भारविना कमनीयकल्पना, अर्थगौरवं, मनोहरं प्रकृतिचित्रणं इत्यादि सर्वेषां गुणानां सन्निवेशं कृतम्। किरातार्जुनौ अधिकृत्य रचितस्य अस्य काव्यस्य किरातार्जुनीयम् इति नाम सार्थकम् अस्ति। भारवेः प्रसङ्गानुकूलं सर्वाणि पात्राणि स्वस्वक्षमत्वयुक्ताः सन्ति। वीररसप्रधानं महाकाव्यं भवति किरातार्जुनीयम्, अन्ये रसाः अङ्गरूपेण दृष्टाः। भारवेः भाषा सशक्ता नूतनशैली च वर्तते। भारवेः महाकाव्ये अलङ्काराणां सुन्दरं संयोजनं अस्ति। शब्दालङ्कारः अर्थालङ्कारः च यथास्थानं प्रयोगः विद्यते। संस्कृतविद्वत्समाजे 'भारवेरर्थगौरवम्', 'नारिकेल- फलसम्मितं वचो' 'स्फुटता न पदैरपाकृता' इत्याभणकानि सुप्रसिद्धानि एव।

## Assignments

### लघु टिप्पणीं लिखत ।

1. भारवेः कालः
2. किरातार्जुनीयस्य कर्ता –भारविः।
3. भारवेः कुलं देशं च
4. किरातार्जुनीयम्
5. लघुत्रयी इत्यत्र केषां काव्यानां परिगणना
6. बृहत्रयी इत्यत्र केषां काव्यानां परिगणना
7. अर्जुनः कुत्र तपः आचरति
8. किरातार्जुनीयस्य कथायाः मूलं कुत्र वर्तते।

### आशयं विशदयत ।

1. 'नारिकेलफलसदृशाः'
2. भरवेरर्थदगौरवम् –समर्थयत ।

### निबन्धं रचयत ।

1. भारवेः कालनिर्णयं संक्षेपेण विवृणोतु
2. किरातार्जुनीयस्य कथासारः
3. भारविः कृतिः किरातार्जुनीयम् समर्थयत।
4. किरातार्जुनीयस्य वैशिष्ट्यम्
5. किरातार्जुनीयस्य महाकाव्यत्वं प्रतिपादयतु
6. भारवेः किरातार्जुनीयमहाकाव्यस्य समीक्षात्मकः परिचयः लिखत।

## Suggested Readings

1. दण्डी, काव्यादर्शः, व्याख्याकारः आचार्य श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवन्, वारणासि, 1998
2. भामहः, काव्यालङ्कारः, मोट्टिलाल् बनारसिदास्, 1950
3. मम्मटाचार्यः, काव्यप्रकाशः (नागेश्वरीटीकासहितः) Reprint-2019 चौखम्बाप्रकाशन् , गोपालमन्दिर् लेन्, वारणासि, 221001
4. Kiratarjuniya of Bharavi

## References

1. Mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh,The Kiratarjuniya of Bharavi Ed., Tukaram Javaji, Nirnayasagar Press, Bombay 1907
2. Sri Gurunathavidyanithi, Kiratarjuniya, Rudra Printing Works, Culcutta.
3. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
4. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur
5. डां.विजयशंकर् पाण्डेयः, डां. जमुनापाठकः, संस्कृतनिबन्धमकरन्दः, चौखम्बा संस्कृतसीरीज् आफीस् वाराणसी
6. T.K.Ramachandra Iyer, A short history of Sanskrit literature, R.S. Vadhyar and sons, Kalpathi, Palakkad.


## Space for Learner Engagement for Objective Questions

**Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.**

UNIT 3

# नैषधीयचरितस्य सामान्यपरिचयः

## Learning Outcomes

- काव्यलक्षणं परिचिनोति।
- श्रीहर्ष परिचयं ज्ञास्यति कविं तस्य काव्यं च परिचिनोति।
- नैषधीयचरितमहाकाव्यस्य विषयवस्तु अवगमिष्यति।
- नलकथायाः महत्वं प्रतिपादयितुं शक्ष्यति।

## Background

पञ्चमहाकाव्येषु विश्वविख्यातस्य नैषधीयचरिताख्यस्य महाकाव्यस्य प्रणेता भवति लोकोत्तरप्रतिभावान् महाकाविः श्रीहर्षः। श्रीहर्षोऽयं स्वकीयविषये स्वकृतिषु अधोलिखितैः श्लोकेन परिचयं दत्तवानस्ति। नैषधमहाकाव्यस्य सर्वेषां सर्गाणामन्ते श्लोकोऽयं दृश्यते-

**श्रीहर्षः कविराजराजिमुकुटालङ्कारहीरः सुतः।**
**श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।।**

नैषधीयचरितं नाम महाकाव्यं कन्नौजाधिपतेः महाराजजयचन्द्रस्य काले श्रीहर्षेण द्वादशशतकोत्तरार्थे लिखितम्। महाकाव्येऽस्मिन् कलापक्षस्य, भावपक्षस्य च प्राधान्यं विद्यते। श्रीहर्षप्रणीतं नैषधीयचरितं न केवलम् एकं महाकाव्यम् अपि तु विविधविषयाणां विश्वकोशोऽपि। द्वाविंशतिसर्गेषु विरचितेऽस्मिन् नैषधीयचरिते निषधशासकस्य नलस्य चरितं प्रस्तूयते। अस्मिन् कविना नलदमयन्त्योः प्रेमकथायाः आकर्षकं वर्णनं कृतम्। अस्याः कथायाः मूलस्रोतः महाभारतस्य नलोपाख्यानमस्ति। सर्वेषां दर्शनानां, पुराणानां, मन्त्रतन्त्राणां, सामुद्रिकशास्त्रस्य, तथा शिल्पकला-तुरगरत्नादिज्ञानस्य च आकररूपमिदं काव्यम्। नैषधस्य पदलालित्यम् अवलोक्य विद्वद्भिः 'नैषधे पदलालित्यम्' इत्युद्घोष्यते। अस्य काव्यस्य वैशिष्ट्यम् अवलोक्य एवं वक्तुं शक्यते यत् जटिलतापरिपूर्णोऽस्मिन् काव्ये विद्वांसः असीममानन्दम् अनुभवन्तीति। तान् सर्वान् काव्यमेतत् औषधमिव सुखीकरोति । 'नैषधं विद्वदौषधम्' इति प्रथा काव्यस्यास्य महत्वं सूचयति ।

बहवः दार्शनिकसिद्धान्ताः श्रीहर्षस्य महाकाव्ये प्रतिपादिताः दृश्यन्ते।

**या सोमसिद्धान्तमयाननेव शून्यात्मतामयोदरेव।**
**विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव।।**

इतीदं दशमसर्गे कृतं सरस्वतीवर्णनं कवेरस्य सर्वदर्शनपाण्डित्यस्य उदाहरणम्। सरस्वतीदेव्याः आननं सोमसिद्धान्तमयं (शैवदर्शनं) भवति, शून्यान्तावादमयं तस्याः उदरं, तस्याः चित्तं विज्ञानवादमयं तथा अखिलं शरीरं साकारतासिद्धिमयं च भवतीति वर्णनद्वारा चतुर्णां दर्शनानां परामर्शः कविना स्वीकृतः। काव्यस्यास्य अध्ययनेन अवगन्तुं शक्यते यत् कविरयं कश्चित् दार्शनिकः आसीदिति। कवेरस्य दार्शनिकवीक्षणस्य उदाहरणानि बहूनि नैषधचरितेऽस्मिन् उपलभ्यन्ते। द्वाविंशतिसर्गात्मकस्यास्य महाकाव्यस्य अङ्गुलीपरिमितेषु सर्गेषु विद्यमानानि कानिचित् उदाहरणान्येव अत्र प्रदर्शितानि॥

# Keywords

नैषधीयचरितस्य कर्त्ता, श्रीहर्षस्य कृतयः, नैषधीयचरितम्, श्रीहर्षस्य पाण्डित्यम्, नैषधे पदलालित्यम्, नैषधं विद्वदौषधम्, उदिते नैषधे काव्ये।

# Discussion

## 1.3.1 नैषधीयचरितस्य कर्त्ता

संस्कृतसाहित्यललामभूतस्य विश्वविख्यातस्य नैषधीयचरिताभिधस्य महाकाव्यस्य प्रणेता विद्वच्चक्रचूडामणिः कवितातार्किकसार्वभौमः लोकोत्तरप्रतिभासम्पन्नः महाकविः श्रीहर्षमहाभागो विद्यते। अस्य महाकवेः पितुः नाम श्रीहीरविपश्चितः आसीत्। श्रीमती परमविदुषी मामल्लदेवी अस्य माता चासीत्।

कतिपयाः पण्डिता कविममुं मैथिलं ब्राह्मणं स्वीकुर्वन्ति। अन्येषां मतेन कविरयं कान्यकुब्जब्राह्मणः चासीत्। अस्य विषये एकाऽऽख्यायिका लोके प्रचलिता विद्यते यत्-

बाल्यकाले एव अस्य पिता दिवङ्गतः। अस्य जननी एव अतिप्रेम्णा अस्य पालनपोषणमकरोत्। बालस्त्वयमतीव चपलमतिः वयसा पञ्चवर्षीय एव एकदा स्वपितुः शास्त्रर्थाहवे केनचित्पण्डितेन कृतमवमानं श्रुत्वा कर्णपरम्परया विदीर्णहृदयः स्वजनकावमन्तारं विजेतुमिच्छन् सरस्वतीमाराधयितुं तत्परोऽभवत्। यथाविधि अनुतिष्ठतोऽत्यल्पवयसोऽपि अनेन शीघ्रमेव वागदेवताप्रसादात् लोकोत्तरप्रतिभा प्राप्ता। ततश्चायं कान्यकुब्जेश्वरजयचन्द्रस्य राजपरिषदि गत्वा स्वपितुरवमन्तारं विजेतुं निश्चिकाय। लब्धावसरोऽयं चतुरस्रतया तं पराजितवान्। तस्मात् कान्यकुब्जाधिपतिना सुभृशं समादृतः। तस्य राजसभायां सर्वाधिकलब्धप्रतिष्ठो विद्वज्जनगोष्ठीगरिष्ठो वरिष्ठश्च सञ्जातः। जयचन्द्रस्य शासनकाल: 1169 ईस्वीत: 1195 ईस्वीयपर्यन्तम् आसीत्। अत एव हर्षस्य रचनाकाल: द्वादशशताब्द्याः उत्तरार्धः आसीत्। एवञ्च सरस्वतीप्रसादोपलब्धाऽसाधारणप्रतिभावान् क्रान्तदर्शी कविरयं नैषधीयचरितार्णववर्णनगौडोर्वीशकुलप्रशस्ति-प्रभृतीन् काव्यग्रन्थान् ईश्वराभिसन्धिखण्डनखण्डखाद्यस्थैर्यविचारणाप्रकरणानि चालौकिकान् संस्कृतवाण्यलङ्कारभूतान् प्रभूतान् तर्कनिबन्धान् प्रणीतवान् तथापि काव्येषु अस्य नैषधीयचरितं ग्रन्थान्तरेषु खण्डनखण्डखाद्यं अतिप्रशस्तिम् अवाप्नोत् ।

श्रीहर्षस्य कालः द्वादशशताब्दीं मन्यते

### 1.3.2 श्रीहर्षस्य कृतयः

संस्कृतमहाकाव्येषु नैषधीयचरितमेकमुच्चं स्थानं भजते। संस्कृतसाहित्ये अपरिमितकाव्यानि महाकाव्यानि च सन्ति किन्तु पठनपाठने लघुत्रयी, बृहत्त्रयी च पञ्चमहाकाव्यानि नितरां प्रसिद्धानि सन्ति। लघुत्रय्यां नैषधीयचरितस्य गणना न भवति। बृहत्त्रय्याम् अस्याः कृतेः समावेशो भवति। किरातार्जुनीयम्, शिशुपालवधम् नैषधीयचरितम् एतानि त्रीणि महाकाव्यानि बृहत्त्रय्यां समागच्छन्ति। श्रीहर्षस्य बहव्यः कृतयः सन्ति किन्तु 'नैषधं विद्वदौषधम्' इति वाक्येन नैषधीयचरितमहाकाव्यस्य महिमा प्रकटितः भवति।

श्रीहर्षस्य प्रसिद्धस्य आलङ्कारिकस्य मम्मट्टस्य भागिनेय आसीत्

श्रीहर्षेण समये समये ग्रन्थाः विरचितास्सन्ति। अयं कविः असामान्यवैदुष्यपूर्णां प्रतिभां धारयति। एतादृश्यपि एका उक्तिरस्ति यत् महाकविश्रीहर्षः प्रसिद्धस्य आलङ्कारिकस्य मम्मट्टस्य भागिनेय आसीत्।

महाकविश्रीहर्षः, कान्यकुब्जस्य (कन्नौज) एवं वाराणस्याः महाराज्यस्य विजयचन्द्रजयचन्द्रयोः सभापण्डितः च आसीत्। अयं श्रीहर्षः

न्यायवेदान्तादिषु नैकेषु शास्त्रेषु पूर्णाधिकारी आसीत्। श्रीहर्षस्य कृतयः तेषां संक्षिप्तपरिचयं अधो धीयते।

1. स्थैर्यविचारप्रकरणम्- संभवतः ग्रन्थेऽस्मिन् बौद्धस्य क्षणिकवादस्य खण्डनं वर्तते।

2. विजयप्रशस्तिः- ग्रन्थेऽस्मिन् जयचन्द्रस्य पिता विजयचन्द्रस्य प्रशस्तिः वर्णिता अस्ति।

श्रीहर्षस्य रचनाकार्याणि

3. खण्डनखण्डखाद्यम्- ग्रन्थेऽस्मिन् न्यायस्य रीतिः वर्णिता वर्तते। न्यायस्य खण्डनं च अद्वैतसिद्धान्तस्य मण्डनं विद्यते । ग्रन्थोऽयम् अत्यन्तं दुरुहस्य पाण्डित्यस्य निकषग्रावा मन्यते। षोडशशताब्द्यां शङ्करमिश्रेण अस्य खण्डनखण्डखाद्यस्य शैलीं लक्षीकृत्य **"वादविनोदः"** नाम्नः ग्रन्थस्य रचना कृता आसीत्।

4. गौडोर्वीशकुलप्रशस्तिः- अस्मिन् ग्रन्थे बङ्गदेशस्य कस्यचिद् राज्ञः प्रशस्तिवर्णनमस्ति।

5. अर्णववर्णनम्- ग्रन्थेऽस्मिन् समुद्रस्य वर्णनं वर्तते।

6. छिन्दप्रशस्तिः अस्मिन् ग्रन्थे छिन्दनाम्नः कस्यचित् राज्ञः प्रशस्तिः वर्तते।

7. शिवशक्तिसिद्धिः- ग्रन्थेऽस्मिन् शिवस्य शक्त्याः सिद्धिः विवर्णिताऽस्ति।

8. नवसाहसाङ्कचरितचम्पूः- संभवतः राज्ञः भोजस्य पितुः "नवसाहसाङ्क" उपाधिना भूषितस्य सिन्धुराज्ञः चरित्रं वर्तते।

9. नैषधीयचरितम्- महाकाविना "तच्चिन्तामणिमन्त्रचिन्तनफले" एतदुक्त्वा चिन्तामणिमन्त्रस्य जपं कृत्वा चिन्तनेन महाकाव्यमिदं तस्य मन्त्रस्य फलरूपेण प्राप्तमस्ति। महाकाव्येऽस्मिन् 22 सर्गाः सन्ति। प्रायः प्रत्येकं सर्गे शताधिकाः श्लोकाः सन्ति । 13, 15, 19 सर्गत्रयं त्यक्त्वा सर्वेषु शताधिकश्लोकास्सन्ति। किं बहुना 17 सप्तदशतमे सर्गे तु 222 श्लोकाः विद्यन्ते समष्टिरूपेण महाकाव्येऽस्मिन् 2830 श्लोकाः विद्यन्ते। तादृशी उक्तिः वर्तते आश्रयदातुः महाराजजयचन्द्रस्याज्ञया महाकविना महाकाव्यमिदं रचितम्।

### 1.3.3 नैषधीयचरितम्

संस्कृतसाहित्येतिहासे नैषधीयचरितं नाम अन्तिमं महाकाव्यं कनौजाधिपतेः महाराजजयचन्द्रस्य परिगृहीतेन श्रीहर्षेण

द्वादशशतकोत्तरार्द्धे लिखितम्। द्वाविंशतिः(22) सर्गाः 2830 श्लोकाश्च सन्ति। निषधशासकस्य नलस्य चरितं प्रस्तूयते। नैषधे नायकनायिकौ दमयन्तीनलौ स्तः। नायकः कुलीनः विद्यते। नायिका कुलीना विद्यते। दमयन्तीमभिलक्ष्य नलस्य गुणगानं दूतकार्ये कुशलः हंसः करोति। नैषधीयचरितस्य उपजीव्यं महाभारतस्य नलोपाख्यानं अस्ति। नैषधे अङ्गीरसः श्रृङ्गारः। श्रीहर्षस्य शैली वैदर्भी। नैषधीयचरिते प्रयुक्तं छन्दः उपजातिः।

द्वाविंशतिः सर्गाः 2830 श्लोकाश्च सन्ति

नलश्रीवर्णनादारब्धमिदं महाकाव्यं नलदमयन्त्योः सुखसङ्गमं प्राप्य विश्राम्यति। लीलया दमयन्ती स्मृतिद्वयमानमनोविनोदाय निष्कूटेषु विहारार्थं गतो नलः एकं स्वर्णमयं हंस पश्यति गृह्णाति च तम् । हंसः स्वामवस्थां विनिवेद्य मोचनाय प्रार्थयते प्रतिजानीते च दमयन्ती सन्देशश्रावणेन तदुपकारमोचनाय । हंसस्यावस्था यथा-

**'मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।**
**गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि नो'।।इति**

राज्ञा सदयं मोचितो हंसः तत्प्रत्युपकाराय भोजनगरीं गत्वा दमयन्त्यै तत् प्रेमविवरणं श्रावयति। तेन दमयन्त्यां पूर्वराग उत्पद्यते। काले दमयन्त्याः स्वयंवरसभा आयुज्यते विदर्भेण। तत्र दमयन्त्यामाशक्ता नलरूपं धृत्वा तत्रागच्छन्ति चत्वारो दिक्पालाः। पश्चाच्च ते दमयन्त्या नलं प्रति समर्पण-भावं दृष्ट्वा प्रसन्नाः देवाः स्वानि स्वानि रूपाण्येव गृह्णन्ति । ततश्च सुखेन दमयन्ती नलं स्वयंवरस्रजा विभूषयति । परिणयानन्तरं जातेर्ष्यूः कलिर्नलं प्रविश्य तं विरूपयति । पश्चाच्च लब्धस्वरूपेण नलेन सह दमयन्त्याः सुख-सङ्गमो भवति काव्यस्य द्वाविंशतिसर्गसमाप्तिश्च ।

### 1.3.4 श्रीहर्षस्य पाण्डित्यम्

श्रीहर्षः अद्वैतवादस्य समर्थकः। श्रीहर्षः द्वैतवादी उदयनाचार्यस्य मतं खण्डितवान्। नैषधीयचरिते कविः शिल्पविज्ञापेन सह प्राणिविज्ञानस्य वर्णनं, सामुद्रिकशास्त्रेण सह तन्त्रशास्त्रस्य वर्णनं च कृतवान्। महाकविः श्रीहर्षः अलंकाराणां विन्यासे अतीव निपुणः अस्ति। श्रीहर्षो महाकविः महादार्शनिको महावैयाकरणः च इत्यादि विविधविरुद्धगुणगणसमन्वयात् अतिशेते सर्वान् अन्यान् महाकवीन् पाण्डित्यप्रदर्शने वाग्वैभवे रुचिररचनायां भावाभिव्यक्तौ साधुशब्दसंकलने विद्यावैशरद्ये वक्रोक्तिव्यवहारे च। अनुपमवैदुष्यवैभव आविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते। नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इति साह्लादम् उद्घोष्यते यशोऽस्य

महादार्शनिकः महावैयाकरणः च

सुधीभिः। प्रतिपदं पदलालित्यावेक्षणात् 'नैषधे पदलालित्यम्'। इत्यभिधीयते ।

### 1.3.5 नैषधे पदलालित्यम्

नैषधे पदलालित्यम् बहुशः प्रशंसितं वर्तते

नैषधे पदानां विन्यासः सर्वेषां सहृदयानां हृदयं विलोभयति। पदलालित्यस्य निदर्शनं दिङ्मात्रं द्रष्टव्यमत्र-'शृङ्गारभृङ्गारसुधाकरेण यर्णस्त्रजानूपय कर्णकूपौ' 'नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे' 'सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः' 'दिने दिने त्वं तनुरोधि रेऽधिकं पुनः पुनर्मूर्च्छ्छ तापमृच्छ च' इत्यादयः। एवं च नैषधे महाकाव्ये पदलालित्यस्याधिक्यं दृश्यते।क्वचित् प्रसादः क्वचिन्माधुर्यम्, क्वचित् च ओजोगुणो लक्ष्यते। -माधुर्यगुणेन सह पदलालित्यं विचित्रामाभां प्रदर्शयति। काव्यस्य लयात्मकत्वं संगीतात्मकत्वं च श्रुतिसुखदत्वेन सममेव सहृदयहृदयावर्जकत्वेनोपतिष्ठेते। विपश्चिद्भिः 'नैषधे पदलालित्यम्' इति साह्लादम् उद्घोष्यते। कतिपयानि निदर्शनान्यत्र प्रस्तूयन्ते–

अधारि पद्मेषु तदङ्घ्रिणा घृणा
क्व तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां
न शारदः पार्विकशर्वरीश्वरः ॥ ( नैषधं॰ 1.20)

अहो अहोभिर्महिमा हिमागमेऽ
प्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्तावपि मेदसां भरा
विभावरीभिर्बिभराम्बभूविरे ॥ ( नैषधं॰ 1.41)

सकलया कलया किल दंष्ट्रया
समवधाय यमाय विनिर्मितः ॥ (नैषधं॰ 4.72)

नलिनं मलिनं विवृष्वती, पृषतीमत्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्यिते विदधाते रुचिगर्वदुर्विधम् ।। ( नैषधं॰ 2.23)

श्लोकेष्वेषु क्वचिदनुप्रासः क्वचिद् यमकं च सौन्दर्याधायकम्। क्वचित् सौकुमार्यमेव पदानां श्रुतिसुखदत्वहेतुः। यथा-

**धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।**
**इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥**
(नैषधं० 3.116)

**सपीतेः सम्प्रीतेरजनि रजनीशः परिषदा**
**परीतस्ताराणां दिनमणिमणिग्रावमणिकः ।।** (नैषधं० 22.144)

**यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी**
**कुमाराणामन्तःकरणहरणं नैव कुरुते ।**
**मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः**
**किमस्या नाम स्यादरसपुरुषानादरभरैः॥** (नैषधं० 22.150)

### 1.3.6 नैषधं विद्वदौषधम्

नैषधमहाकाव्यं अनुपमवैदुष्यस्य वैभवय्य च आविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते। नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति **'नैषधं विद्वदौषधम्'** इति उद्घोष्यते यशोऽस्य सुधिभिः ।

नैषधं विद्वदौषधम् विविधविद्यापारदृश्वा श्रीहर्षः। नैषधे स्वव्युत्पत्तिप्रदर्शनोपक्रमे स प्रतिपदं क्लिष्टत्वं दुरुहत्वं चोपपादयति। विविधशास्त्रियसिद्धान्तवर्णनात् श्लिष्ट-क्लिष्ट-पद-प्रयोगात्, बहुज्ञता-प्रदर्शनाच्च स्वकाव्ये व्युत्पत्ति-वारिधिं प्रथयति। स श्लिष्टप्रयोगादतिरिक्तं व्याकरण-न्याय-वैशेषिक-सांख्य-योग-वेदान्त-मीमांसा-चार्वाक-बौद्ध-जैनादिदर्शनानां दुरूहान् सिद्धान्तान् यत्र-तत्र वर्णयति। विशिष्ट-दर्शनज्ञानमन्तरेण तदर्थावगमो दुष्कर एव। न केवलं पाश्चात्त्यविदुषामेव कृते, अपि तु भारतीयविद्वत्तल्लजानामपि कृते नैषधं दुर्बोधमेव। पाण्डित्यप्रदर्शनस्य दुष्परिणामरूपत्वेन श्रीहर्षस्य कलापक्षः श्रियमश्नुते, भावपक्षश्च दौर्बल्यम्।

श्रीहर्षेण स्वकीयस्य शास्त्रज्ञानस्य परिचयं तत्र प्रतिसर्गे दत्तम्। परञ्च सप्तदशे सर्गे तु तेन स्वकीयं नास्तिकास्तिकदर्शनप्रवीणत्वं व्याकरणनिष्णातत्त्वं च उद्घोषितम् ।चार्वाकसिद्धान्तस्य प्रतिपादनं न कश्चनेश्वरः इति द्रष्टव्यम् –

**'देवश्चेदस्ति सर्वज्ञः करुभागवन्ध्यवाक् ।**
**तत्किं वागव्ययमात्रान्नः कृतार्थयति नार्थिनः ।।**

मृतस्य पुनर्जन्म कथम् इति चार्वाककमतस्योदाहरणम् –

'कः शमः क्रियता प्राज्ञाः प्रियाप्रीतौ परिश्रमः ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।।

भोगोपभोगार्थं शरीरमिदम् –

सुकृते वः कथं श्रद्धा सुरते च कथं न सा ।
तत्कर्म पुरुषः कुर्यात् येनान्ते सुखमेधते ।।

वेदान्तदर्शनानुसारं मुक्तौ जीवात्मनो ब्रह्मणि विलयेन ब्रह्मैव केवलमवशिष्यते, लोके तु जीवब्रह्मणोर्द्वयोरेव पृथगस्तित्वम्। एतन्मतमाश्रित्यैव व्यङ्ग्यं प्रयुज्यते यन्मूर्ख एव स्वास्तित्वविनाशाय प्रवर्तिष्यते-

स्वं च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम् ।
इति स्वोच्छित्ति-मुक्त्युक्ति-वैदग्धी ब्रह्मवादिनाम् ॥
(नैषधं० 17.74)

श्रीहर्षोऽन्यदर्शन सिद्धान्तान् अपास्य अद्वैतवादमेव सर्वमान्यत्वेनाश्रयते

अत्र वेदान्तसिद्धान्तस्यापि वर्णनं दृश्यते। अनेन अस्य वेदान्तदर्शनस्य ज्ञानं प्रतीयते। अद्वैतवादस्य तात्त्विकत्वं यथा-

श्रद्धां दधे निषधराड् विमतौ मतानाम्
अद्वैततत्त्व इव सत्यतरेऽपि लोकः। (नैषधं० 13, 36)

ब्रह्मसाक्षात्कारस्य वर्णनं कीदृशं विद्यतेऽत्र-

“प्रापुस्तमेकं निरुपाख्यरूपं
ब्रह्मेव चेतांसि यतव्रतानीम्”।

सांख्यदर्शने प्रपञ्चितस्य सत्कार्यवादस्य प्रतिपादनं महाकविना कृतमत्र- ‘नास्ति जन्यजनकव्यतिभेदः’। देवानामरूपत्वं मन्त्ररूपत्वञ्च मीमांसासिद्धान्तानुसारं प्रतिपादितं कविनाऽत्र-

'विश्वरूपकलनादुपपन्नां तस्य जैमिनिमुनित्वमुदीये'।

श्रुतीनां प्रामाण्यविषये मीमांसकानां मतं व्यवस्थापितं दृश्यते-

श्रुतिं श्रद्धस्व विक्षिप्ताः प्रक्षिप्तं ब्रूथ च स्वयम्।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ।।

जैनाभिमतरत्नत्रयस्य प्रतिपादनं जैनसिद्धान्तानुसारं कृतम् –

न्यवेशि रत्नत्रितये जिनेन यः
सः धर्म चिन्तामणिरुज्झितो यया ।।

**कापालिकोपानलभस्मनः कृते**
**तदेव भस्म स्वकुले स्तृतं तया ।।**

बौद्धाभिमतस्य शाखात्रयसिन्द्धान्ताः बौद्धदर्शनानुसारं प्रतिपादनं दृश्यते

सरस्वत्याः स्वरूपवर्णने एकस्मिन्नेव श्लोके बौद्धाभिमतस्य शाखात्रयसिन्द्धान्ताः शून्यवादस्य विज्ञानवादस्य साकारतावादस्य च बौद्धदर्शनानुसारं प्रतिपादनं दृश्यते-

**या सोमसिद्धान्तमयानेव**
**शून्यात्मतावादमयोदरेव**
**विज्ञानसामस्त्य मयान्तरेव ।**
**साकारतासिद्धिमयाखिलेव ।।** (नैषधं० 10, 88)

न्यायसिद्धान्ताभिमतस्य मोक्षस्य परिहासः कृतः महाकविना-

**मुक्तये च शिलात्वाय शास्त्रमूचे सचेतसाम् ।**
**गौतमं तमवेक्ष्यैव मया वित्थ तथैव सः ।।**

(नैषधं० 17, 75)

वैशेषिकाभिमतस्य स्वरूपस्यापि परिहासः कृतः

एवमेवात्र वैशेषिकाभिमतस्य स्वरूपस्यापि परिहासः कृतः- वैशेषिकदर्शने ‘किमिदं तमो भावरूपम् अभावरूपं वा?’ इति विचारे ‘भासामभाव एव तमः’, ‘भावाभाव एव तमः’ इत्यादिरूपेण तमो विविच्यते। वैशेषिकदर्शनकृत् कणाद एव उलूकापरपर्यायः। अतो दर्शनमेतद् औलूकदर्शनं निगद्यते। एतदाश्रित्यैव व्यङ्ग्यं क्रियते यद् उलूक एव समस्तत्त्वपरीक्षणे क्षमः, तन्मते च ग्राह्यम्-

**ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारुमतं मतं मे ।**
**औलूकमाहुः खलु दर्शनं तत् क्षमं तमस्तत्वनिरूपणाय ।।**

मनसः अणुत्वमपि प्रतिपादयन् कविः कथयति यत 'मनोभिरासीदनणुप्रमाणैः' इति।

दर्शनसिद्धान्तमिव व्याकरणसिद्धान्तस्यापि पुटमत्र दृश्यते। यथा-

**क्रियेत चेत्साधुविभक्तिचिन्ता**
**व्यक्तिस्तदा सा प्रथमाभिधेता ।**

पाणिनेः ‘अपवर्गे तृतीया’ (अष्टा. 2.3.6) सूत्रे व्यङ्ग्यं कुरुते यद् अवपूर्ण विषये मोक्षविषये वा तृतीया प्रकृतिः स्त्रीपुंसातिरिक्ता क्लीवप्रकृतिरेवोपयुक्ता-

'अपवर्गे तृतीयेति भणितः पाणिनेरपि'

अत्र अपदं न प्रयुञ्जीत् इत्यस्य वर्णनं व्याकरणस्यैव विषयः। ‘अपवर्गे तृतीयेति भणितः पाणिनेरपि’ अत्र ‘अपवर्गे तृतीया’ सूत्रस्य वर्णनं

प्रतिपादितम्। 'किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः' इत्यत्र 'स्थानिवदादेशो' सूत्रस्य वर्णनं विद्यते।

**उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः।**
**अपवर्गे तृतीयेति भणतः पाणिनेरपि ।।** (नैषधं॰ 17.70)

एवमेव विविधा दर्शनसिद्धान्ता इतस्ततः प्रकीर्णा उपलभ्यन्ते। यथा- 'नास्ति जन्यजनकव्यतिभेदः' (नैषधं॰5.94) इत्यत्र सांख्याभिमतः सत्कार्यावादो विव्रियते। 'संप्रज्ञातवासिततमः समपादि' (नैषधं॰ 21.118) इत्यत्र योगदर्शनप्रतिपादितः संप्रज्ञातसमाधिः निरूप्यते। 'आदाविव द्व्यणुककृत् परमाणुयुग्मम्'(नैषधं॰3.125) इत्यत्र वैशेषिकाभिमतः परमाणुवादः, 'मनोभिरासीदनणुप्रमाणै'(नैषधं॰3.37), 'जनस्य चेतोभिरिवाणिमाङ्कितैः'(नैषधं॰ 1.59) इत्यत्र मनसोऽणुत्यं प्रतिपाद्यते।

**विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।**
**विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ।।** (नैषधं॰ 5.39)

इत्यत्र मीमांसाभिमतं देवानाम् अरूपित्वं मन्त्ररूपित्वं च निर्दिश्यते। स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता' (नैषधं॰ 2.61) इत्यत्र स्वतः प्रामाण्यं वर्ण्यते। 'न्यवेशि रत्नत्रितये' (नैषधं॰ 9.71) इत्यत्र जैनाभिमतरत्नत्रयस्य वर्णनम्। सप्तदशे सर्गे चार्वाकसिद्धान्तवर्णनम् उपलभ्यते। 'अजस्रसभ्याशमुपेयुषा समं मुदैव देवः कविना बुधेन च' (नैषधं॰ 1.17) इत्यत्र ज्योतिषसिद्धान्तवर्णनं प्राप्यते।

'नैषधं विद्वदौषधम्'

एवं च विविधशास्त्रादिप्रतिपादितसिद्धान्तानां वर्णनादेव नैषधमहाकाव्यस्य क्लिष्टत्वमाचक्षते। हर्षेण प्रणीतं नैषधमहाकाव्यस्यावबोधनं सामान्यपण्डितानां कृते दुष्करम्। महत्प्रतिभासम्पन्नाः विद्वान्सः एव स्वज्ञानेन तस्यावबोधने साफल्यं प्राप्तुं शक्नुवन्ति। अत एव केनोक्तम्- "नैषधं विद्वदौषधम्" इति।

### 1.3.7 उदिते नैषधे काव्ये

माघस्य शिशुपालवधे काव्यसौन्दर्यं प्रेक्ष्य यथा भारवेर्भा अस्तमेति, तथैव नैषधे श्रीहर्षस्य वैदुष्यं विलोक्य भारविमाघौ द्वावेव निष्प्रभतां धत्तः। श्रीहर्षः कविताकामिनीकान्तो भाषाप्रयोगविदग्धो विविधशास्त्रनिष्णातो रससिद्धः कवीश्वरो वर्तते। तस्य काव्यं प्रतिपदं तस्य व्याकरणविशेषज्ञतां भावगाम्भीर्यं पदमाधुर्यं भाषासौष्ठवं रसपरिपाकं च प्रकटयति। अनुपमस्तस्य समग्रेऽपि संस्कृतवाङ्मयेऽधिकारः। गीर्वाणवाणी

वाणीश्वरमिव तं सेवते। स भाषां पुत्तलिकामिव नर्तयितुं प्रभवति। तदीहासमकालमेव समुपतिष्ठन्ति रसाः, भावाः, कमनीया पदावली, विविधाः च अलंकाराः। गूढातिगूढभावान्वितानि क्लिष्टानि पद्यानि स यथैव सारल्येन रचयितुमलं तथैव सरलानि सरसानि प्रसादगुणोपेतानि हृद्यानि पद्यानि। तस्य पद्यानि नारिकेलफलोपमानानि सन्ति, वहिः कठोराणि, अन्तः माधुर्योपेतानि च। रसिकैः सहृदयैः विविधशास्त्रनिष्णातैरेव तत्कार्यगौरवम् अवधारयितुं पार्यते। यथा केचन श्लेषप्रयोगाः-

'चेतो नलं कामयते मदीयम्' (नैषधं॰3.67), श्लेषमूलकमर्थत्रयमस्य। चेतः नलं कामयते, चेतः न लंकाम् अयते, चेतः अनलं कामयते। 'स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः' (नैषधं॰ 4.116) इत्यत्र नलद-शब्दो द्व्यर्थकः। पञ्चार्थकं पद्यं यथा-

**देवः पतिर्विदुषि नैष धराजगत्या**
**निर्णीयते न किमु न व्रियते भवत्या।**
**नायं नलः खलु तवातिमहानलाभो**
**यद्येनमुज्झसि वरः कतरः परस्ते ।।** (नैषधं॰ 13.34)

# Summarised Overview

श्रीहर्षस्य पितुः नाम श्रीहीरः इति। श्रीहर्षस्य माता श्रीमती परमविदुषी मामल्लदेवी। श्रीहर्षः जयचन्द्रनृपस्य राज्याश्रयः प्राप्तः। श्रीहर्षस्य कालः द्वादशशताब्दौ मन्यते। श्रीहर्षः प्रसिद्धस्य आलङ्कारिकस्य मम्मटस्य भागिनेय आसीत्। महाकविना श्रीहर्षेण नैषधीयचरितमहाकाव्ये नलदमयन्त्याः स्नेहकथायाः चित्ताकर्षकं वर्णनं समाहितम्। महाकाव्येऽस्मिन् द्वाविंशतिः सर्गाः 2830 श्लोकाश्च सन्ति। श्रीहर्षः अद्वैतवादस्य समर्थकः। श्रीहर्षः द्वैतवादिनः उदयनाचार्यस्य मतं खण्डितवान्। नैषधीयचरिते कविः शिल्पविज्ञापेन सह प्राणिविज्ञानस्य वर्णनं, सामुद्रिकशास्त्रेण सह तन्त्रशास्त्रस्य वर्णनं च कृतवान्। महाकविः श्रीहर्षः अलंकाराणां विन्यासे अतीव निपुणः अस्ति। नैषधे पदलालित्यम् बहुशः प्रशंसितं वर्तते। पदानां विन्यासः सर्वेषां सहृदयानां हृदयं विलोभयति। पदलालित्यस्य निदर्शनं दिङ्मात्रं द्रष्टव्यमत्र-'शृङ्गार भृङ्गारसुधाकरेण यर्णस्त्रजानूपय कर्णकूपौ' 'नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे' 'सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः' 'दिने दिने त्वं तनुरोधि रेऽधिकं पुनः पुनर्मूर्च्छछ तापमृच्छ च' इत्यादयः। नैषधं विद्वदौषधम् विविधविद्यापारदृश्वा श्रीहर्षः। नैषधे स्वव्युत्पत्तिप्रदर्शनोपक्रमे स प्रतिपदं क्लिष्टत्वं दुरुहत्वं चोपपादयति। विविधशास्त्रियसिद्धान्तवर्णनात् श्लिष्ट-क्लिष्ट-पद-प्रयोगात्, बहुज्ञता-प्रदर्शनाच्च स्वकाव्ये व्युत्पत्ति-वारिधिं प्रथयति। स श्लिष्टप्रयोगादतिरिक्तं व्याकरण – न्याय – वैशेषिक – सांख्य – योग – वेदान्त –

मीमांसा – चार्वाक – बौद्ध - जैनादिदर्शनानां दुरूहान् सिद्धान्तान् यत्र-तत्र वर्णयति।

# Assignments

लघु टिप्पणीं लिखत

1. श्रीहर्षस्य जन्मस्थितिकालं वर्णयत?
2. श्रीहर्षः कस्य राज्याश्रितः आसीत्?
3. बृहत्रय्यां केषां ग्रन्थानां समावेशः भवति?
4. 'कान्यकुब्जे ईश्वरात् ताम्बूलद्वयम् आसनं च लभते' इति कस्य कवेः प्रशंसायां वर्णितम्? विशदयत।
5. श्रीहर्षस्य रचनाः काः?
6. "उदिते नैषधे काव्ये क्व माघः क्व च भारविः"

निबन्धं लिखत ।

1. "विद्वदौषधम्" किं काव्यं निगदितम्? विशदयत।
2. नलोपाख्यानाधारितं काव्यं किम्? विशदयत।
3. श्रीहर्षस्य विशेषतां लिखत।
4. "काव्यं नवं नैषधं"
5. "नैषधं विद्वदौषधम्"
6. नैषधीयचरितम्

# Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur
3. आचार्य श्रीरामचन्द्रमिश्रः, व्याख्याकारः, दण्डी, काव्यादर्शः, चौखम्बा विद्याभवन्, वारणासि, 1998
4. भामहः, काव्यालङ्कारः, मोट्टिलाल् बनारसिदास्, 1950
5. मम्मटाचार्यः(नागेश्वरीटीकासहतः), काव्यप्रकाशः, Reprint-2019 चौखम्बाप्रकाशन् , गोपालमन्दिर् लेन्, वारणासि, 221001

# References

1. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
2. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak Prakasan, Kanpur 1981
3. Naisadhiyacarita of Sriharsa

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# शिशुपालवधस्य सामान्यपरिचयः

## Learning Outcomes

- शिशुपालवधमहाकाव्यविषये परिचयं प्राप्नोति।
- महाकाव्येतिवृत्तपरिचयः।
- काव्यविषयज्ञानम्
- माघं परिचाययति।

## Background

भारवेः किरातार्जुनीयमिव ततेऽव्यधिकतरं काठिन्यपूर्णं शिशुपालवधं विरचितं महाकविना माघेन। संस्कृतसाहित्याकारे कालिदासात् अनन्तरं गणनाक्रमे माघः समायाति। अस्य महाकवेः शिशुपालवधाभिधानं महाकाव्यं सहृदयानां कृते तेषां शब्दसन्दोहानां ज्ञानानां परीक्षकः वर्तते। यथोक्तं केनचित् आलोचक्रप्रवरेण - 'नवसर्गगते माघे नवशब्दो न विद्यते' इति। विंशतिसर्गसमाप्यमिदं महाकाव्यमपि किरातार्जुनीयमिव शास्त्रकाव्यं वर्तते। माघस्य अमरकृतिं शिशुपालवधं विहाय नान्या काचित् रचना दृक्पथं प्रयाति। कालिदासानन्तरं संस्कृतभाषायाः यदा अलङ्कारप्रधानशैल्याः प्रचारं प्रसारञ्च प्रचलत् तदा भारविमाघयोः ग्रन्थौ नितरां ख्यातिं लब्धवन्तौ। अस्य महाकवेः शिशुपालवधं नाम महाकाव्यं सहृदयानां बहूपकारकत्वेन वर्तते। 'माघे सन्ति त्रयो गुणाः' इति कथनेन माघस्य कालिदासभारविदण्डिनामेकायतनीभूतं स्वरूपमाख्यायते। अनेन महाकाव्येन माघस्य नितान्तं निर्मला कीर्तिः प्राप्ता। 'मेघे माघे गतं वयः' एवंविधानि प्रशंसावाक्यानि माघकाव्यस्य कीर्तिगानं कुर्वन्ति। गौडीशैलीसमन्वितां काव्यं किरातार्जुनीयात् कठिनतरं शास्त्रज्ञानपूर्णं महाकाव्यं वर्तते।

काव्येऽस्मिन् वर्णनाशैली अतीव प्रौढा वर्णनमलङ्कारपूर्णं भावगाम्भीर्यसम्भृतञ्च सम्पन्नम्। अस्य कथावस्तु महाभारतादेव सङ्कलितम्। चोदिनृपतेः शिशुपालस्य वधोऽत्र मुख्यतया चित्रितः। अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः चित्रितः। उपमार्थगौरवपदलालित्यत्रयाणां गुणानां समन्वयः काव्येऽस्मिन् अवलोक्यते। महाभारतस्य सभापर्वणः 33 तमात् 45 पर्यन्तेषु त्रयोदशसु अध्यायेषु शिशुपालवधस्य कथा उपलभ्यते। इयं कथा श्रीमद्भागवतेऽपि दशमस्कन्धस्य 74 तमोऽध्याये

सूक्ष्म- रूपेण वर्तते। संस्कृतसाहित्ये पाण्डित्यमयशैल्याः चरमोत्कर्षो दृश्यते श्रीमाघे। कवित्वकौशलस्य चूडान्तनिदर्शनं महाकाव्यमिदम्॥

# Keywords

कविपरिचयः, शिशुपालवधम्, माघस्य कवित्वम्, 'मेघे माघे गतं वयः', 'माघेनेव च माघेन कम्पः कस्य न जायते', 'नवसर्गगते माघे नवशब्दो न विद्यते', माघस्य रचना, माघस्य वैशिष्ट्यम्, माघस्य शैली, माघस्योपमा - वैशिष्ट्यम्, माघस्यार्थगौरवम्, माघस्य पदलालित्यम्, माघे सन्ति त्रयो गुणाः।

# Discussion

## 1.4.1 कविपरिचयः

संस्कृतसाहित्यजगति महाकविः माघः गुर्जरदेशे 'श्रीमाल' नामकस्थाने विशिष्टब्राह्मणपरिवारे जन्म लेभे। तस्य पिता श्रीमाली। सः गुजराती ब्राह्मणः विद्वान् दानप्रसिद्धः च आसीत्। पितुर्दानशीलतायाः प्रभावः माघस्य अप्युपरि पतितः। अतः असीमदानदोषेणायं निर्धनत्वं गतः। इत्थं महाकवेः माघस्य समयः वसन्तगढ़नामके स्थाने आसीत्। तत्रतः एकः शिलालेखः प्राप्तः, तस्मिन् ख्रीष्टाब्दस्य 625 वर्षे उत्कीर्णो विद्यते, तत्र 'वर्मलात' इति नाम लिखितमस्ति। अतः ख्रीष्टाव्दस्य सप्तमशतकप्रारम्भे माघस्य समयो निश्चीयते ।

## 1.4.2 शिशुपालवधम्

माघविरचितं महाकाव्यं भवति शिशुपालवधम्

संस्कृतसाहित्याकाशे कालिदासात् अनन्तरं गणनक्रमे माघः तृतीयत्वेन समायाति। शिशुपालवधकथायाः मूलाधारः महाभारतस्य सभापर्वणः 33 तमात् 45 पर्यन्तेषु त्रयोदशसु अध्यायेषु उपलभ्यते। शिशुपालवधस्य प्रेरणास्रोतं मुख्यपुराणं श्रीमद्भागवतम्। इयं कथा श्रीमद्भागवतेऽपि दशमस्कन्धस्य 74 तमेऽध्याये सूक्ष्मरूपेण वर्तते। अस्य विंशतिसर्गात्मकस्य शिशुपालवंधमहाकाव्यस्य रचना तु महाकविमाघेन महाभारतस्थां कथामाश्रित्य विहिता। शिशुपालवधस्य नायकः कृष्णः, अङ्गीरसः

वीररसः। अनेके श्लोकास्तु प्रायः महाभारतस्य श्लोकैः समं दृश्यन्ते। अत्र महाभारतापेक्षया महाकाव्योपयोगिनः अनेके विषयाः वर्णिताः; तृतीयसर्गात् त्रयोदशसर्गं यावत् भगवतः श्रीकृष्णस्य ऐश्वर्य-प्रस्थान-वनविहार-जलक्रीडा-रैवतकपर्वत(चतुर्थेसर्गे)-सन्ध्या-प्रभात(एकादशेसर्गे)-प्रकृत्यादिविषयाणां वर्णनानन्तरं महाराजयुधिष्ठिरस्य राजसूययज्ञे श्रीकृष्णस्य आगमनं वर्णितम्। अत्र युधिष्ठिरस्य राजसूययागे श्रीकृष्णेन कृतः चेदिनृपतेः शिशुपालस्य वधो मुख्यतया वर्णितः। इत्थं विंशतिसर्गात्मकं महाकाव्यमिदं संस्कृतसाहित्यवाङ्मयस्य शोभां वर्धयति तथा च माघस्य श्रीकृष्णभक्तिः तया भक्त्या स्वस्य वैष्णवत्वञ्च प्रकटितं भवति।

### 1.4.3 माघस्य कवित्वम्

चमत्कृतिकरं पाण्डित्यं प्रेक्षं प्रेक्षं प्रेक्षावन्तोऽस्य कवित्वं प्रशंसन्ति

महाकविः माघः सुरवाणी-काव्याकाशे विद्योतमानं स्वप्रभानिरस्तान्यतेजः प्रसरम् अनुपमं नक्षत्रम्। तस्यापूर्वा कान्तिः समग्रमपि वाङ्मयं रोचयतितमाम्। तस्य विविधशास्त्रावगाहिनी सूक्ष्मेक्षिका प्रतिभा सुसूक्ष्ममपि तथ्यम् आत्मसात्कृत्वा पुरः स्फुरदिव प्रस्तौति। कविरयं न केवलं काव्यशास्त्रस्यैव पारदृश्वा, अपि तु व्याकरणशास्त्रस्य, राजनीतेः, अर्थशास्त्रस्य, धर्मशास्त्रस्य, कामशास्त्रस्य, दर्शनानाम्, ज्योतिषस्य, संगीतस्य, पाकशास्त्रस्य, हस्तिविद्यायाः, अश्वशास्त्रस्य, पुराणादीनां च सारविदनुपमो मनीषी। अस्य चमत्कृतिकरं पाण्डित्यं प्रेक्षं प्रेक्षं प्रेक्षावन्तोऽस्य कवित्वं प्रशंसन्ति।

### 1.4.4 "मेघे माघे गतं वयः"

माघस्य गौरवम्

केचन माघस्य कवित्वं तथाऽऽह्लादकरं मन्वते यत्ते तदर्थं स्वजीवनसमर्पणमपि सुन्दरं मन्यन्ते । अत एव साधूच्यते- "मेघे माघे गतं वयः"। अर्थात् मेघदूतस्य शिशुपालवधस्य चानुशीलने आयुर्व्यतीतम्। काव्येऽस्मिन् तस्य विशालं शब्दकोशमुद्वीक्ष्य केनापि निगद्यते- 'नवसर्गगते माघे नवशब्दो न विद्यते'। अर्थात् शिशुपालवधस्य नवसर्गाणां समाप्तौ न नवीनः शब्दोऽवशिष्यते। तेन नवसर्गेषु तथा नवनवाः शब्दाः प्रयुक्ताः, तथा तत्र शब्दकोशराशिरुपलभ्यते। तस्य काव्ये प्रतिपदं पदलालित्यं माधुर्यम् च प्रेक्ष्य विपश्चिद्भिः उदाह्रियते- **'काव्येषु माघः'** इति। अनर्घराघवनाटककृतो मुरारेः पाण्डित्यपरिपूर्णं नाटकं प्रेक्ष्य केनाप्यभिधीयते यद् मुरारिर्जिज्ञासितश्चेद् माघे मन आधेयम्, 'मुरारिपदचिन्ता चेत् तदा माघे रतिं कुरु'। भारविं सर्वतोभावेन

भावावल्याऽतिशयानं माघं प्रेक्ष्य केनापि निगद्यते-'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः'।

### 1.4.5 "माघेनेव च माघेन कम्पः कस्य न जायते"

महाकवेर्माघस्य पर्यविक्षणमतीवानुपमं वर्तते। रसानाम्, अलङ्काराणां, छन्दसाम्, असाधारणाध्ययनस्यानुभवानां च प्रयोगे सः कुशलः शिल्पी वर्तते। तद्यथा- "पिशङ्गमौञ्जीयुजमर्जुनच्छविम्, "मधुरया मधुबोधितमाधवी, "नवपलाशपलाशवनं पुरा, "नास्ति मन्त्रो महीभृताम्" इत्यादयः।

तस्य प्रशंसायां राजशेखरेण उचितमेवोक्तम्-

**"कृत्स्नप्रबोधकृद्वाणी भारवेरिव भारवेः।**
**माघेनेव च माघेन कम्पः कस्य न जायते" ॥**

अर्थात् भगवतः भास्करस्य प्रभाववद् भारवेः वाक्यमपि सम्पूर्णस्यापि विश्वस्य प्रबोधकं वर्तते, किन्तु यस्य समक्षं भास्करस्य आभा मन्दं भवति, एतादृशेन माघभासेन इव महाकविना माघेन कस्य कम्पः न जायते, अर्थात् एतस्य पुरतः सर्वे निष्प्रभाः भवन्ति इत्यर्थः।

### 1.4.6 "नवसर्गगते माघे नवशब्दो न विद्यते"

माघेन 20 सर्गात्मके स्वीये शिशुपालवधे महाकाव्ये सर्वेषामेव रसानां साधिकारं सहृदयपरितोषं कुर्वता प्राधान्येन वीररसः तदङ्गतया च सर्वेऽन्ये रसाः यथास्थानं विन्यस्ताः। रैवतक-सूर्यास्त-सागरवर्णनमित्यादिस्थलानि अस्य प्रकृतिप्रियतां प्रतिपादयन्ति। यथा- रैवतकपर्वतवर्णने-

**"उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टा-द्वयपरिवारितवारणेन्द्रलीलाम् ॥**
(शिशु० 4.20)

अस्य कृतौ प्रायः कोऽपि श्लोकः अलङ्काररहितो न दृश्यते। प्रायशः षोडशविधानां छन्दसां प्रयोगः कृतः महाकविना, तत्रापि पञ्चमसर्गीयायाः वसन्ततिलकायाः एकादशसर्गीयायाः मालिन्याः प्रोज्ज्वलनं सर्वातिशायि संशोभते। कवित्वकौशलस्य चूडान्तनिदर्शनं महाकाव्यमिदम्। यथोक्तम्-

**मधुरया मधुवोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**चलितया विदधे किल मेखला कलकलोऽलकलोलदृशान्वया ॥**

इत्थं ज्ञातुं शक्यते यत् सर्वत्र नवनवां शब्दराशिं वितन्वन् असौ नवसर्गेषु कवीनामन्येषां कृते शब्ददारिद्र्यम् विहितवान्। तथाहि- “नवसर्गगते माघे नवशब्दो न विद्यते” इति।

माघस्य ग्रन्थविषयकं गौरवं तदस्ति “नवसर्गगते माघे नवशब्दो न विद्यते”। शिशुपालमहाकाव्ये नवसर्गगतं यावद्कस्य शब्दस्य पुनः प्रयोगो न भवति। अर्थात् शब्दसमृद्धिः, कोशसमृद्धिः, माघस्य तावती आसीत् येन नव शब्दः नवसर्गं यावत् प्रयुक्ताः एकस्य शब्दस्य न पुनरावृत्तिरिति भावः।

### 1.4.7 माघस्य रचना

माघविरचिताः ग्रन्थसंख्या एका

माघकवेरेतस्य गौरवाधायकं ग्रन्थरत्नम् एकमेव ‘शिशुपालवध’-नामकम् उपलभ्यते। अस्मिन् महाकाव्ये विंशतिसर्गाः, 1645 श्लोकाश्च विद्यन्ते। 15 सर्गे क्षेपकाः श्लोकाः 34, ग्रन्थान्ते च कविवंशवर्णनश्लोकाः5, तेषामपि समाहारे श्लोकसंख्या 1684 भवति।

महाकविमाघस्य सुप्रसिद्धा एकैव कृतिरस्ति तत्तु सर्वविदितमेवास्ति किन्तु शिशुपालवधस्य व्याख्या टीकाकरैः बहुधा कृतास्सन्ति। आहत्य अष्टादश टीकाः शिशुपालवधमहाकाव्ये लिखितास्सन्ति तासु सर्वास्वपि टीकासु “मल्लिनाथस्य सर्वाङ्कषा” व्याख्या एव सर्वत्र समुपलभ्यते। सर्वाङ्कषा टीका विद्वत्प्रिया श्रेष्ठा च वर्तते।

### 1.4.8 माघस्य वैशिष्ट्यम्

शिशुपालवधे त्रयाणामपि गुणानां समन्वयम्

विपश्चिद्भिः महाकवेः कालिदासस्य कृतिषु उपमानां प्राधान्यम्, भारवेः कृतौ किरातार्जुनीये अर्थगौरवस्य वैशिष्ट्यम्, दण्डिनः कृतौ दशकुमारचरिते पदलालित्यम्, माघस्य च कृतौ शिशुपालवधे त्रयाणामपि पूर्वोक्तानां गुणानां समन्वयं समीक्ष्य साह्लादम् उद्घोष्यते यद्-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

त्रयाणामपि गुणानां संकलने नितरां साफल्यम्

एतदत्रावधेयं यद् माघो यद्यपि त्रयाणामपि गुणानां स्वकाव्ये समाहारं विधत्ते, तत्र तत्र च वैशिष्ट्यं सौन्दर्यं माधुर्यं चापि धत्ते, तथापि नोपमाप्रयोगे स कालिदासम् अतिशेते, अर्थगौरवे च भारविम्।

पदलालित्ये नूनं स दण्डिनम् अतिशेते। तस्य पदमाधुर्यं सर्वातिशायि। माघः त्रयाणामपि गुणानां संकलने नितरां साफल्यम् अवापेत्येवं तस्य महत्त्वम्। तस्य च तादृशं प्रावीण्यं यथा नानाविधवर्णने तस्याप्रतिहता प्रतिभा।

### 1.4.9 माघस्य शैली

पदविन्यासं माघस्य शैल्याः कौशलम्

महाकवेः माघस्य भावपक्षापेक्षया कलापक्षः प्रशस्यतरः। यद्यपि भावपक्षस्यापि मनोज्ञत्वं माधुर्यं हृद्यत्वं च पदे पदेऽवलोक्यते तथापि नात्र कस्यापि सुधियो विप्रतिपत्तिः यन्माघः कलापक्षाश्रयणे कवीन् अन्यान् अतिशेते। क्वचिद् अलंकारप्रयोगाः, विशेषतश्चित्रालंकारप्रयोगाः, क्वचिद् व्याकरण-नैपुण्य-प्रदर्शनम्, क्वचिद् छन्दोरचनादक्षतोपयोगः, क्वचिद् यमकाद्यलंकाराणां प्रयोगबाहुल्यम्, क्वचित् कोमल-कान्तपदावल्याः सन्धानम्, क्वचित् शास्त्रिय-पाटव-प्रदर्शनम्, तस्य कलात्मिक्या रुचेः परिचायकानि सन्ति। महाकविः भारविस्तस्य आदर्शरूपोऽभूत्। तस्य सरणिमनुसृत्य सोऽपि कलात्मकपाण्डित्यप्रदर्शने कृतमतिरभूत्। भारवेः स्वोत्कर्षं साधयितुं स तदीयां सरणिम् अनुसृत्य तत्रोत्कर्षम् अवाप। कलापक्षाश्रयणे स न केवलं भारविमेव, अपि तु महाकविं भट्टिमपि अतिक्रामति।

### 1.4.10 माघस्योपमावैशिष्ट्यम्

उपमाप्रयोगः वस्तुतः काव्यस्य शब्दभारं प्रथयति

माघे सुरुचिपूर्णाः शतशं उपमाः समुपलभ्यन्ते। तत्र क्वचित् शास्त्रियं ज्ञानम्, क्वचित् काव्यगौरवम्, क्वचिद् नीतिशास्त्रतत्त्वम्, क्वचिच्च विविधविद्याविशारदत्वं तस्य गरिमाणं प्रथयति। संगीतशास्त्रस्य काव्यशास्त्रस्य च महत्त्वं वैचित्र्यं चोपमया प्रकटयति यद् वाङ्मये कतिपये एव वर्णाः सन्ति, संगीतशास्त्रे च सप्त स्वराः, परं तेषामुपादानेन कथमिव वैचित्र्यजनकं शास्त्रम् उदेति-

**वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव।**
**अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥** (शिशु० 2.72)

भाग्यपुरुषकारयोः द्वयोरपि परस्परापेक्षित्वम् अनिवार्यत्वेनाङ्गीकरणं च तथैवावश्यकं यथा सत्कवये शब्दार्थयोः द्वयोरपि संग्रहः। उपमया साध्विदं विशदयति सः-

**नालम्बते दैष्टिकतां न निषीदति पौरुषे ।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥** (शि० 2.86)

उपमाप्रयोगे काव्यशास्त्रियं ज्ञानं संपुष्टता च दृश्यते। तेनोच्यते यद् यथा संचारिभावाः स्थायिभावं पोषयन्ति, तथैव विजिगीषु नृपमन्ये सहायकाः-

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ।**
**रसस्यैकस्यभूयांसस्तथा नेतुर्महीभृतः ॥** (शि० 2.87)

नीतिशास्त्रविदग्धतां विशदयता तेनोच्यते यद् यथा स्वक्षेमकामेन वृद्धिं प्राप्नुवन् रोगो नोपेक्ष्यः, तथैव एधमानोऽरातिरपि नोपेक्षामर्हति-

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।**
**समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥** (शि० 2.10)

स्वकवित्वस्य कल्पनामनोज्ञत्वस्य च संकलनं विदधता तेनोच्यते यद् यथा स्वल्पवयस्का बाला मातरम् अन्वेति, तथैव प्रातःकालिकी सन्ध्या रजनिम् अनुगच्छति-

**अनुपतति विरावैः पत्रिणां व्याहरन्ती ।**
**रजनिमचिरजाता पूर्वसन्ध्या सुतेव ॥** (शिशु० 11.40)

उपमाप्रयोगे शास्त्रियस्य पाण्डित्यस्यापि अपूर्वः समन्वयो दृश्यते। सांख्य-दर्शनानुसारं पुरुष उदासीनोऽकर्ता च परं बुद्धिकृतकर्मणां फलभाग् भवति, तथैव साक्षिमात्रोऽपि कृष्णः सेनाकृतविजयस्य फलभोक्ता भविष्यति-

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ॥** (शि० 2.59)

उपमाप्रयोगे मनोज्ञायाः कल्पनाया अपि सदुपयोगः प्रशस्यः । कृष्णं दिदृक्षमाणायाः कस्यचिद् रमण्या गवाक्षगतं वदनकमलम् उदयाद्रिकन्दरास्थितसुधांशुमण्डलमिव व्यराजत-

**अधिरुक्ममन्दिरगवाक्षमुल्लसत् सुदृशो रराज मुरजिद्दिदृक्षया ।**
**वदनारविन्दमुदयाद्रिकन्दराविवरोदरस्थितमिवेन्दुमण्डलम् ॥**
(शि० 13.35)

नारद श्रीकृष्णयोः सितासिते कान्ती तथैवारोचयतां यथा रात्रौ पत्रान्तरगोचराः सुधांशोर्मरीचयः-

**रथाङ्गपाणेः पटलेन रोचिषाम् ऋषित्विषः संवलिता विरेजिरे।**
**चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः ॥**
(शि० 1.21)

## 1.4.11 माघस्यार्थगौरवम्-

अर्थगौरवे तु माघस्य वैशिष्ट्यं अद्वितीयमेव

माघेऽर्थगौरवान्वितानां श्लोकानां महती परम्परा। यद्यपि अर्थगौरवं पदेपदे प्रेक्ष्यते, तथापि द्वितीयः सर्गः सर्वातिशायी। तत्र प्रतिपदम् अर्थगौरवं दृग्गोचरताम् उपयाति। कतिपये एव श्लोका उदाहरणार्थम् अत्र प्रस्तूयन्ते। अत्रापि तस्य विविधशास्त्रज्ञता, कल्पनाकाम्यत्वम्, भावोत्कर्षः, सूक्ष्मेक्षणदक्षता, नीतिज्ञता, व्यवहारपाटवम्, लोकाराधनक्षमत्वं च समीक्ष्यते। तस्य कतिपयानि हृद्यानि पद्यानि सुभाषितरूपेण प्रयुज्यन्ते। कृष्ण एवं रक्षोनिकरं विनाशयितुं क्षमो यथा भास्करस्तमोनिचयम्-

**ऋते रवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं नभः** (शि० 1.38)

मनस्विता जीवनोन्नायिका मानहीनस्य जीवनं तृणमिव तुच्छम्। अनेकशो मनस्वितायाः स्वाभिमानस्य च गुणगौरवं वर्ण्यते कविना-

> **पादाहतं यदुत्थाय मूर्धानम् अधिरोहति ।**
> **स्वस्थादेवापमानेऽपि देहिनस्तद् वरं रजः ॥** (शि० 2.46)
>
> **सदाभिमानैकधना हि मानिनः ।** (शिशु० 1.67)

स्वीयं दर्शनशास्त्रवैदग्ध्यं प्रकटयता तेन दार्शनिकभावानुबद्धा बहवः श्लोका उपन्यस्ताः । तद्यथा-

**सतीव योषित् प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि।**
(शि० 1.72)

श्रीकृष्णवर्णने सांख्योक्तपुरुषवर्णनं तेन प्रस्तूयते यद्-

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन ।**
**बहिर्विकारं प्रकृतेः पृथग् विदुः पुरातनं त्वां पुरुषं पुराविदः ॥**
(शि०1.33)

रामणीयकस्य लक्षणं तस्य बुद्धिवैशारद्यं सूचयति-

**क्षणेक्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।** (शि० 4.17)

अर्थगौरववन्तोऽन्ये केचन श्लोका दिङ्मात्रम् उदाह्रियन्ते। तद्यथा- सर्वेषां स्वार्थसिद्धिरेवाभीष्टा। 'सर्वः स्वार्थं समीहते' (2.65)। सुकविः स्वीये काव्ये गुणत्रयमेवाश्रयते। 'नैकमोजः प्रसादो वा रसभावविदः कवेः'(2.83)।

सामसहितैव दण्डनीतिः साधीयसी। 'मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते'(2.85)। सत्काव्येऽर्थगौरवाधानम् अनिवार्यम्। 'अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः'(2.73)। महान्तो महद्भिरेव विवदन्ते, नाधमैः। 'अनुहुंकुरुते घनध्वनिं नहि गोमायुरुतानि केसरी' (16.25)। अरातिकृता तिरस्क्रिया दुःसहा। 'परिभवोऽरिभवो हि सुदुःसहः' (6.45)। कट्वपि भेषजं गदहारि। 'अरुच्यमपि रोगघ्नं निसर्गादेव भेषजम्' (19.89)। सन्तः सतामेव गृहाणि अनुगृह्णन्ति। 'गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः'(1.14)। कवयो महीपाश्चार्थमेव चिन्तयन्ति। 'कवय इव महीपाश्चिन्तयन्त्यर्थजातम्' (11.6)। 'स्त्रीणां रोदनं बलम्। रुदितमुदितमस्त्रं योषितां विग्रहेषु' (11.35)। 'दैवदुर्विपाको दुर्निवारः'। 'हतविधिलसितानां हि विचित्रो विपाकः'(11. 64)।

### 1.4.12 माघस्य पदलालित्यम्

पदे-पदे पदलालित्यं दरीदृश्यते

माघे पदलालित्यं पदे-पदे प्राप्यते। पदसौकुमार्यम्, वर्णमाधुर्यम्, भाषायाः संगीतात्मकत्वम्, भावानुसारि भाषाश्रयणम्, भाषायाम् आरोहावरोहक्रमश्च पदलालित्यं समेधयति। भाषायाः संगीतात्मकत्वं यथा-

**मधुरया मधुबोधितमाधवी-मधुसमृद्धिसमेधितमेधया ।**
**मधुकराङ्गनया मुहुरुन्मद-ध्वनिभृता निभृताक्षरमुज्जगे ।**(6.20)

यमकालंकारालंकृतभाषाश्रयणेन माधुर्यम्। यथा-

**नवपलाशपलाशवनं पुरः, स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्, स सुरभिं सुरभिं सुमनोभरैः ॥**(6.2)

अस्मिन् श्लोके वसन्तवर्णनमस्ति, यमकः अलंकारः।

भावानुसारिभाषाश्रयणेन सौकुमार्यम्। यथा-

**वदनसौरभलोभपरिभ्रमद्-भ्रमरसंभ्रमसंभृतशोभया।**
**चलितया विदधे कलमेखला कलकलोऽलकलोलदृशाऽन्यया ॥**
(6.14)

अन्ये च पदलालित्यवन्तः श्लोका दिङ्मात्रम् उदाह्रियन्ते। यथा- 'अचूचुरच्चन्द्रमसोऽभिरामताम्' (1.16), 'न रौहिणेयो न च रोहिणीशः'

(3.60), 'प्रभावनीके तनवै जयन्तीः प्रभावनी केतनवैजयन्तीः' (6.69), 'विकचकमलगन्धैरन्धयन् भृङ्गमालाः, सुरभितमकरन्दं मन्दमावाति वातः' (11.19)। इत्थं सुस्पष्टं यत् श्रीमाघे अलंकृतिनिवेशकुशलता, स्वल्पशब्दैः महतोऽर्थस्य प्रतिपादनक्षमता, पदलालित्यं च त्रयो गुणाः सन्त्येव। एवं गुणत्रयेऽपि महनीयत्वं माघस्य प्रशस्यम्।

### 1.4.13 माघे सन्ति त्रयो गुणाः

माघः केवलं काव्यशास्त्रे एव पारङ्गतः नास्ति

संस्कृतसाहित्यजगति महाकविमाघस्य नाम कस्य विपश्चितः कृते समादरणीय नास्ति। अयं महाकविः एकेन महाकाव्येन यादृशीं प्रसिद्धिमवाप तादृशी प्रसिद्धिः केनापि अपरेण महाकविना न सम्प्राप्ता। महाकविकालिदासस्य पश्चात् येषां कवीनां नामानि श्रद्धापूर्वकं विद्वद्भिः स्मृतिपथं नीयन्ते तेषु नामसु महाकविमाघस्य नाम अतीव श्रद्धास्पदं वर्तते। कालिदासानन्तरं संस्कृतभाषायाः यदा अलङ्कारप्रधानशैल्याः प्रचारं प्रसारञ्च प्रचलत् तदा भारविमाघयोः ग्रन्थौ नितरां ख्यातिं लब्धवन्तौ। अस्याः काव्यशैल्याः असौ प्रमुखकविः वर्तते। असौ महाकविः केवलं काव्यशास्त्रे एव पारङ्गतः नास्ति अपितु व्याकरण – राजनीति - अर्थशास्त्र – धर्मशास्त्र – कामशास्त्र – दर्शन – ज्योतिष - सङ्गीतादि विविधविषयाणां यादृशं पाण्डित्यं प्राप्तवान् तं पाण्डित्यं तु दर्शं दर्शं अस्य काव्यप्रतिभायाः प्रशंसां नैके विद्वांसः बारं बारं कुर्वन्ति।

अस्य महाकवेः शिशुपालवधाभिधानं महाकाव्यं सहृदयानां कृते तेषां शब्दसन्दोहानां ज्ञानानां परीक्षकः वर्तते। यथोक्तं केनचित् आलोचकप्रवरेण- "नव सर्गगते माघे नवशब्दो न विद्यते"।

ये जनाः संस्कृतशब्दज्ञानं प्राप्तुं वाञ्छन्ति तेषां कृते माघस्य शिशुपालवधाख्यं महाकाव्यं निश्चप्रचं ध्येयम् अवलोकनीयञ्च। ये विपश्चिताः संस्कृतसाहित्ये लब्धख्यातियुक्ताः भवितुमिच्छन्ति तेषां जीवनं माघकाव्यस्यानुशीलने एव व्यतीतव्यम्।

काव्यशास्त्रदृष्ट्या अस्य कवेः रचना कालिदासभारविदण्डीनां कवित्रयाणां प्रमुखगुणानां विद्यमानतया सम्पन्नास्ति। अनेन कारणेन अस्य महाकाव्यम् अमन्दानन्दसन्दोहास्पदम् अस्ति सहृदयानां कृते। अर्थात् माघस्य महाकाव्ये उपरिनामाङ्कितानां त्रयाणां कवीनां प्रमुखकाव्यगुणानाम् एकत्र दर्शनं बोभवीति इति केनापि आलोचकप्रवरेण उपस्थापितम् -

**उपमा कालिदासस्य भारवेरर्थगौरवम्**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।**

साम्प्रतं अस्य श्लोकस्य अर्थोपरि ध्यानं देयम्। महाकवि-कालिदासस्य काव्येषु काव्यशास्त्रियैः अन्यैः गुणैः सह उपमायाः अन्यतमं

उपमा, अर्थगौरवं पदलालित्यञ्च एते त्रयः गुणाः

वैशिष्ट्यं दृश्यते। भारवेः किरातार्जुनीयाख्ये महाकाव्ये अन्यैः काव्यशास्त्रियगुणैः सार्धम् अर्थगौरवं विशेषतः प्राप्यते। एवञ्च महाकविदण्डिनः काव्ये पदलालित्यं खलु विशिष्टं विद्यते। परन्तु अस्माकं महाकवेः काव्ये त्रयाणां पूर्वकथितानां गुणानां समाहारः दृश्यते। एतस्य कथनस्य आशयोऽयम् यत् महाकविर्माघः गुणत्रयाणां समावेशः यद्यपि स्वकाव्ये कृतवान् तथापि उपमाप्रयोगे सः कदापि कालिदासात् समर्थतरः नास्ति अर्थगाम्भीर्ये सः कुत्रचिदपि भारविं न अतिशेते। एवञ्च असौ पदलालित्ये दण्डिनं न अतिक्रामति। अस्मिन् विषये यदि तटस्थदृष्ट्या विवेचनं भवेत् तर्हि इदमेव वक्तुं शक्यते यत् महाकविः माघः स्वकीयानां पूर्ववर्तिकवीनाम् अनुकरणे सर्वविधं साफल्यं समवाप। अस्य कवेः उपमा कालिदासीया उपमा इव स्वाभाविकी न प्रतीयते। अस्य उपमाप्रयोगः वस्तुतः काव्यस्य शब्दभारं वावर्ध्यते। यथा शिशुपालवधस्य प्रथमसर्गस्य निम्नाङ्किते श्लोके नारदमुनेः इन्द्रवाहननागेन्द्रेण सह प्रस्तुता उपमा द्रष्टव्या – नारदस्य साम्यं ऐरावतेन सह द्रष्टव्यम्-

**निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना ।**
**चकासतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम् ।।**

अत्र कविना मनोहरेण चमूरुमृगचर्मेण आच्छत्रस्य नारदस्य वपोः साम्यं पृष्ठास्तरणेन युक्तेन इन्द्रवाहनेन ऐरावतेन सह प्रस्तुतम्। अस्य श्लोकस्य पठनेनैव पाठकानां बुद्धिपटले अयं विचारः जायते यद् उपमेयं सायासा न तु अनायासास्ति। अस्मिन्नेव प्रसङ्गे एका कालिदासीया उपमापि दर्शनीया-

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।**

अत्र परस्परम् अविनाभावेन निवसतौ पार्वतीशङ्करौ वन्दे। उपर्युक्तयोः द्वयोः उपमाप्रयोगयोः तु महदन्तरं वर्तते। सम्प्रति महाकवेः काव्ये अर्थगौरवस्य कानिचित् उदाहरणानि अवलोकनीयानि। शिशुपालवधस्य प्रथमसर्गे एव द्रष्टव्यः अयं श्लोक:-

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृतेः पृथक् विदुः पुरातनं त्वां पुरुषं पुराविदः।।**

अस्मिन् श्लोके कविः अल्पशब्दैः सांख्यशास्त्रस्य सम्पूर्णं सिद्धान्तं प्रस्तुतं चकार। नारदः भगवन्तं श्रीकृष्णं प्रति प्रोवाच -भगवन्! भवान् सांख्य-शास्त्राचार्यैः कपिलादिभिः महर्षिभिः वर्णितः पुरातनः पुरुषः अस्ति। एवञ्च भवत्स्वरूपं तु नितराम् उदासीनं योगिभिः येन केन प्रकारेण अध्यात्मदृशा साक्षाकृतं प्रकृतिविकारेभ्यः पृथग्भूतं अस्ति। वस्तुतः अयं महाकविः घटे सागरं निक्षेप्तुं समर्थः वर्तते। एकं अन्यमपि उदाहरणं द्रष्टव्यं अर्थगौरवस्य-

**रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नैः श्रुतिमण्डलैः स्वरैः ।**
**स्फुटीभवद्ग्राम- विशेषमूर्च्छनामवेक्षमाणं महती मुहुर्मुहुः।।**

वसन्तवर्णनम्

पद्येऽस्मिन् वायोः आघातेन विविधैः सङ्गीतशास्त्रियैः षड्जादिस्वरैः अलङ्कृतवतीं वीणां वारं वारं द्रष्टुं नारदं भगवान् श्रीकृष्णः दृष्टवान् इत्यस्य कथानकस्य वर्णनमस्ति। अत्र प्रयुक्तानां संगीतशास्त्रियाणां तत्वानां स्पष्टीकरणमावश्यकम् व्याख्याकारैः।

रैवतकपर्वतस्य वर्णने महाकविः यो श्लोकः विरचितवान् तस्मिन् पदलालित्यस्य सहृदयानन्दनकम् उदाहरणम् दृश्यते-

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।**
**मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः।।**

भाषायाः संगीतात्मकत्वम्

दर्शनीयम् अस्मिन् श्लोके वर्णमाधुर्यं पदसौकुमार्यं भाषासंङ्गीतात्मकत्वं रूपञ्च ।

माघस्य काव्ये नैके श्लोकाः ईदृशाः समुपलभ्यन्ते येषु उपुर्यक्तगुणानां निदर्शनानि पदे पदे दृष्टिपथे आयान्ति। पदलालित्यस्य एकमपरम् उदाहरणं प्रेक्षणीयम् । यथा-

**मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया ।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षर भुञ्जगे।।**

महाकविः माघस्य मते काव्यस्य सहृदयाहृदयरञ्जनमेव प्रयोजनम्। चतुर्थसर्गे कविना स्वकीयं काव्यप्रयोजनं एकस्य श्लोकस्य माध्यमेन उपस्थापितमस्ति। द्रष्टव्योऽयम् श्लोकः-

**दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद् विस्मयमाततान ।**
**क्षणे क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः।।**

यो सौन्दर्यः प्रेक्षकानां बुद्धौ प्रतिक्षणं नवीनानां भावानां नवीनानां सौन्दर्याणां च उद्भावना करोति, यं आस्वादयितुं कदापि मनस्तृप्तिं न जायते, बारं बारं यं प्रति आकर्षणावर्धनं सञ्जायते स एव सौन्दर्यः कथ्यते। रमणीयतायाः तदेव वास्तविकं स्वरूपम्।

उपर्युक्तनिवेचनेन इदं सुस्पष्टं सञ्जातं यत् महाकविः माघः स्वस्मिन् काव्ये शिशुपालवधाख्ये सहृदयानां हृदयावर्जनीयाः सर्वे गुणाः एकत्रीकृतवान्। दृश्यते जगति 'भिन्नोरुचिर्हि लोकः' सर्वेषां जनानां रुचिरेकत्वं न प्राप्यते। अत एव समेषां सहृदयानां आनन्दवर्धनोद्देश्येन असौ महाकविः उपमार्थगौरवपदलालित्यादिगुणानां लोकोत्तराणां एकत्रैव समावेशः विधाय काव्यानन्दपायिनां बहूपकारं कृतवान् इति।

# Summarised Overview

संस्कृतसाहित्यस्याकाशे देदीप्यमानतारकरूपाः बहवः कवयः सन्ति। तत्र महाकविः माघः अन्यतमः कविवरः। एकया रचनया अद्यापि विद्वद्भिः संस्मर्यते। 'एकश्चन्द्रः तमो हन्ति न च तारागणोऽपि च'। शिशुपालवधेनैकेन महाकाव्येन महाकविर्माघः घण्टामाघेनोपाधिना राजते। माघः भारतस्य गुजरातप्रान्तस्य 'श्रीमाल' नगरस्य निवासी। तस्य पितुः नाम दत्तक-सर्वाश्रमः। महाकविमाघविरचितं द्वाविंशतिसर्गात्मकं 'शिशुपालवधम्' एकमात्रम् तस्य काव्यग्रन्थमस्ति। काव्यमिदं माघकाव्यमिति नाम्नाऽपि प्रसिद्धम्। अत्र युधिष्ठिरस्य राजसूययागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। नायकः श्रीकृष्णः, प्रमुखरसः वीररसः। महाभारतोक्ताम् इमां लघुकथां माघो वर्णनमाहात्म्येन चमकारिणीं विहितवान्। संस्कृतसाहित्यस्य प्राचीनकविपरम्परायां माघकवेर्महती प्रशंसा कृताऽस्ति। अस्य सम्बन्धे अनेकाः सूक्तयः सन्ति- "माघे सन्ति त्रयो गुणाः", "माघेनेव च माघेन कम्पः कस्य न जायते" इत्याद्युक्तयः सुप्रसिद्धाः सन्ति साहित्यक्षेत्रे। माघस्य शिशुपालवधनामकम् एकमेव ग्रन्थरत्नं विंशति सर्गात्मकं उपलभ्यते। महाकविमाघस्य सुप्रसिद्धा एकैव कृतिरस्ति तत्तु सर्वविदितमेवास्ति किन्तु शिशुपालवधस्य व्याख्या टीकाकरैः बहुधा कृतास्सन्ति। आहत्य अष्टादश टीकाः शिशुपालवधमहाकाव्ये लिखितास्सन्ति तासु सर्वास्वपि टीकासु "मल्लिनाथस्य सर्वाङ्कषा" व्याख्या एव सर्वत्र समुपलभ्यते। सर्वाङ्कषा टीका विद्वत्प्रिया श्रेष्ठा च वर्तते। महाकविमाघस्य महाकाव्ये पदलालित्यमपि दृश्यते। पदविन्यासं माघस्य शैल्याः कौशलम्। अनेनैव पदेपदे अत्र पदलालित्यं दरीदृश्यते। माघस्य उपमायाः उदाहरणं शिशुपालवधे लिखिते श्लोके नारदस्य साम्यं ऐरावतेन सह द्रष्टव्यम्। उपमायाः प्रयोगः, अर्थगौरवस्य वैशिष्ट्यम्, पदलालित्यस्य चारुता इति गुणत्रयेऽपि महनीयं माघस्य प्रशस्यम्। एतेन इदं सुस्पष्टं सञ्जातं यत् महाकविर्माघः स्वस्मिन् काव्ये शिशुपालवधाख्ये सहृदयानां हृदयावर्जनीयाः सर्वे गुणाः एकत्रीकृतवान्। अतः केनापि कविना सम्यक् एव उक्तम्- "माघे सन्ति त्रयो गुणाः"।

# Assignments

लघु टिप्पणीं लिखत

1. शिशुपालकथायाः मूलाधारः कः? संक्षेपेण प्रतिपादयत?
2. महाकविर्माघः कति ग्रन्थान् लिखितवान्?
3. 'मेघे माघे गतं वयः' इति कस्य महाकाव्यस्य लोकप्रियतां सूचयति? विशदयत
4. "माघेनेव च माघेन कम्पः कस्य न जायते" उक्तेरस्याः सार्थक्यं प्रतिपाद्यताम्?

5. “नवसर्गगते माघे नवशब्दो न विद्यते” भणितेरस्याः सार्थकत्वं समुपपादयत।

6. “क्षणे-क्षणे यन्नवतामुपैति, तदेव रुपं रमणीयतायाः” विशदयत।

**निबन्धं रचयत ।**

1. “माघे सन्ति त्रयो गुणाः” तर्हि ते त्रयः गुणाः के?

2. माघस्य विशेषताः।

## Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed) Sahitya Academy, Trissur
3. आचार्य श्रीरामचन्द्रमिश्रः व्याख्याकारः, दण्डी, काव्यादर्शः, चौखम्बा विद्याभवन्, वारणासि, 1998
4. भामहः, काव्यालङ्कारः, मोट्टिलाल् बनारसिदास्, 1950
5. मम्मटाचार्यः(नागेश्वरीटीकासहतः), काव्यप्रकाशः, Reprint-2019 चौखम्बाप्रकाशन्, गोपालमन्दिर् लेन्, वारणासि, 221001


## References


1. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
2. Sisupalavadha of Magha, Ed.by Pandit Durga Prasad & Pandit Sivadatta, Tukaram Javaji, Nirnayasagar Press, Bombay 1905
3. Sisupalavadha of Magha


### Space for Learner Engagement for Objective Questions

**Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1**

**- 2 questions are developed for each paragraph. The space given below can be used for listing the questions.**

# किरातार्जुनीयम्

# BLOCK -2

UNIT 1

# प्रथमसर्गे 1-12 श्लोकाः
(सुयोधनस्य प्रजापरिपालनरीतिः)

## Learning Outcomes

- महाकाव्यानां परिचयं लभेयुः।
- महाकाव्यानि पठित्वा तेषां सविशेषावगमनाय।
- महाकाव्येतिवृत्तपरिचयः।
- किरातार्जुनीयम् महाकाव्यमधिकृत्य उद्बोधनम्।
- सुयोधनस्य प्रजापरिपालनरीतिं जानाति।

## Background

शिवार्जुनयोः युद्धमवलम्ब्य निर्मितं महाकाव्यं भवति भारवेः 'किरातार्जुनीयम्'। महाकविः भारविः महाभारतकथामाश्रित्य विरचितं अष्टादशसर्गात्मकं भवति एतत् काव्यम्। वीररसप्रधानम् अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं भवति 'किरातार्जुनीयम्' नाम महाकाव्यम्। किरातार्जुनीयस्य शुभारम्भः 'श्री' शब्दात् तथा च प्रतिसर्गान्ते 'लक्ष्मी' शब्दप्रयोगो च वर्तते। अत्र अर्जुनस्य किरातवेषधारिणा शङ्करेण सह युद्धं वर्णितम्। अत एव ग्रन्थस्य नामकरणं कृतं- 'किरातार्जुनीयम्'। किरातश्च अर्जुनश्च किरातार्जुनौ (द्वन्द्वः)। किरातार्जुनौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्। अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य फलम्। किरातार्जुनीयस्य नायकः अर्जुनः, नायिका च द्रौपदी वर्तते। अर्थगौरवं, स्पष्टता, पुनरुक्तेरभावः अलंकृतशब्दयोजनाश्च अस्य महाकाव्यस्य वैशिष्ट्यम्। भारविना एकाक्षरद्व्यक्षरश्लोकाः अपि रचिताः। तद्यथा-"न नोननुन्नो नुन्नोनो नाना नानानना ननु" (किरातार्जुनीम्-15.14)। ग्रन्थेऽस्मिन् ऋतुवर्णनं, हिमालयवर्णनं, सन्ध्यावर्णनं, चन्द्रवर्णनं, प्रभातं इत्यादीनां रोचकं रमणीयञ्च चित्रणं विद्यते। काव्येऽस्मिन् वनेचरमुखात् दुर्योधनशासनवृत्तान्तवर्णनं,

द्रौपदीवाक्यं, भीमगर्जनं, युधिष्ठिरस्य नीतियुक्तवचनं, अर्जुनप्रस्थानसमये द्रौपदीवाक्यं, शरद्वर्णनं, हिमालयवर्णनं, उद्यानजलक्रीडा, सायं चन्द्रोदयसुरत-प्रभातादिवर्णनं, शिवार्जुनयोर्युद्धवर्णनं चोत्तरोत्तरं प्रातिस्तवकोतकर्षं जनयन्ति। कथ्यते हि भारविः भाषा- भाव- सौन्दर्य- रससिद्धवर्णनाचातुरी - शास्त्रीयपाण्डित्यादि विविध पक्षाणामेकाश्रयं इति।

## Keywords

वनेचरः, कुरूणाम् अधिपः, कटुसत्यस्य कथनम्, क्षमायाचनम्, राज्यस्य स्थितिः, दुर्योधनस्य न्यायमार्गस्य प्रकारं, पुरुषार्थं, स्वसेवकेषु अनुग्रहः, धर्म-अर्थ-कामान् कथं सेवते, सामनीतेः प्रयोगः।

## Discussion

### किरातार्जुनीये व्यवसायिनो नाम प्रथमः सर्गः

किरातार्जुनीयम् पञ्चमहाकाव्ये एकं स्थानं अलंकरोति

कौशीकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भवति भारविः। भारविना विरचितं किरातार्जुनीयम् पञ्चमहाकाव्ये एकं स्थानं अलंकरोति। भारवेः अर्थगौरवं प्रसिद्धमेव। अस्मिन् काव्ये अष्टादशसर्गाः सन्ति। किरातस्य अर्जुनस्य च पराक्रमः भवति प्रतिपाद्यविषयः। महाभारतस्य वनपर्वणः उद्धृता भवति काव्यस्य कथा। भारवेः कृतित्वेन सम्प्रति किरातार्जुनीयमेव लभ्यते। किरातार्जुनीयं हि सर्वविधलक्षणोपेतं महाकाव्यम्। अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तम् आदाय निबद्धमिदं महाकाव्यम्। द्यूते पराजितो युधिष्ठिरः सानुजः सभार्यः संविदानुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति। तत्र स्थितः स दुर्योधनवृत्तान्तज्ञानाय कञ्चित् किरातं हस्तिनापुरं प्रेषयति। ज्ञातवृत्तश्च स द्वैतवनमागत्य सर्वं राज्ञे निवेदयति। विपक्षस्योत्कर्षमसहमाना पाञ्चाली पतिं युद्धाय प्रेरयति। प्रियोक्तं द्रढयन् भीमोऽपि तं धैर्यमपहाय विक्रमाय प्रेरयति। युधिष्ठिरश्च सान्त्वयति। पुनः दिव्यास्त्रलाभाय अर्जुनं प्रेषयति। तपसि अर्जुनं परीक्षितुं त्रयम्बकः किरातवेषेण तत्रागच्छाति। उभावेव समकालं शूकरं प्रहरतः। तस्य निधनकारणमादाय तयोर्विवादः संजातः। युद्धे पराजितोऽप्यर्जुः स्वप्रयासं नैव जहाति। तेन परमप्रीतः शङ्करस्तस्मै पाशुपातास्त्रं ददाति।

तदेव किरातार्जुनीयस्य इतिवृत्तम्। वीररसप्रधानम्। प्रथमसर्गे द्रौपद्याः कथने या वचनचातुरी विद्यते, सा अन्यत्र दुर्लभा एव।

अस्मिन् खण्डे किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे वर्तमानान् षट्चत्वारिंशत् श्लोकाः पठनाय सन्ति। किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गारम्भे 'श्री' (श्रियः) शब्दः, सर्गावसाने मङ्गलवाचकः (लक्ष्मी) पदप्रयोगः च वर्तते । प्रथमसर्गे 1- 44 सर्गस्य अन्तिमौ श्लोकौ विहाय सर्वत्र वंशस्थं छन्दः अस्ति। अस्मिन् एकके वनेचरमुखात् दुर्योधनशासनवृत्तान्तवर्णनं विशदयति। श्रद्धया पठन्तु।

## Discussion

**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥1॥**

**अन्वयः-** कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी सः वनेचरः विदितः (सन्) द्वैतवने युधिष्ठिरं समाययौ।

वनेचरः द्वैतवने युधिष्ठिरं समाययौ

**सारांशः-** दुर्योधनेन द्यूतक्रीडायां निजितः सन् राज्यभ्रष्टो धर्मराजो युधिष्ठिरो द्वैताख्ये तपोवने निवासं चकार। राज्ञः राजलक्ष्मीः प्रजानुरञ्जनादेव सुप्रतिष्ठिता भवति प्रजानुरञ्जनं विना सा सुप्रतिष्ठिता न भवति इति तथ्यं जानन् युधिष्ठिरो दुर्योधनस्य(कुरूणां अधिपः) प्रजापालननीतिं (प्रजासु कुरुराजस्य दुर्योधनस्य कीदृशो व्यवहारः, दुर्योधनः प्रजाः सम्यक् पालयति न वा, दुर्योधने प्रजाः अनुरक्ता न वा इदं सर्वं) विज्ञातुमेकं किरातं गुप्तचररूपेण हस्तिनापुरं प्रेषयामास(प्रेषितवान्)। वेदितुं ज्ञातुम्। विद्+तुमुन् वेदितुम्। ब्रह्मचारिवेषधारी स किरातः दुर्योधनस्य सर्वं वृत्तान्तं ज्ञात्वा द्वैतवने युधिष्ठिरं प्रत्याजगाम (प्रत्यागतः)।

अस्मिन् प्रथमसर्गे 1-44 वंशस्थसंज्ञं वृत्तम्। तल्लक्षणञ्च "जतौ तु वंशस्थमुदीरितं जरौ। अर्थात् तस्य श्लोकस्य प्रत्येकं पादे क्रमेण जगणः, तगणः, जगणः, रगणः च भवति तत्र वंशस्थं छन्दः भवति। अधिपातीति अधिपः तस्याधिपस्य। पाल्यतेऽनयेति पालनी तां पालनीम्। वर्णोऽस्यास्तीति वर्णी, वर्णिनः लिङ्गमिति वर्णिलिङ्गम् (षष्ठी तत्पुरुष) वर्णिलिङ्गमस्यातीति वर्णिलिङ्गी। वनेचरः - वने चरति वनेचरः (अलुक् समासः)। युधि स्थिरः इति युधिष्ठिर (अलुक् समासः)। द्वैतवने - द्वैतं नाम यस्य तत् द्वैतनामकम्। द्वैतनामकं वनं द्वैतवनं (कर्मधारयन्)। अत्र 'वने वनवरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकधैवावृत्या वृत्यनुप्रासः नाम अलङ्कारः। लक्षणम् - अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। अर्थात् यत्र पदेषु स्वराः भिन्नाः भिन्नाः भवन्ति चेदपि यदि शब्देषु

समानता भवति तर्हि तत्र वृत्यनुप्रासः नाम अलङ्कारः भवति। 'अयुङ्क्त' अत्र प्रकृतिप्रत्ययं - 'युज्' धातोः आत्मनेपदे लङ्लकारस्य प्रपु.ए.व। कुरुणां अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्तः स वर्णिलिङ्गी पाण्डवानां गुप्तचरः वनेचरः आसीत्। कुरुणां अधिपः - दुर्योधनः। वनेचरः द्वैतवने युधिष्ठिरं समाययौ।

**व्याकरणकार्यम्** - युधि स्थिरः युधिष्ठिरः। अत्र अलुक् समासत्वात् युधिं इत्यत्र वर्तमानस्य ङि (इ) प्रत्ययस्य न लुक्। एवं वनेचरः इत्यत्रापि। वने चरतीति वनेचरः। अत्रापि अलुक् समासः।

**अप्रियमपि सत्यं वदिष्यतः वनेचरस्य मनसो व्यथा न आसीत्-**

**कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।**
**न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥2॥**

**अन्वयः-** कृतप्रणामस्य सपत्नेन(शत्रुणा) जितां महीं महीभुजे, निवेदयिष्यतः तस्य मनः, न विव्यथे। हि, हितैषिणः मृषा, प्रियं प्रवक्तुं न इच्छन्ति।

स्वामिनः हिताय सेवकाः सत्यं भाषन्ते

**सारांशः** -ब्रह्मचारिवेषधारी सः किरातः(गुप्तचरः) युधिष्ठिरं प्रत्यागत्य युधिष्ठिरं प्रणनाम(प्रणामं चकार)। ततः राज्ञः युधिष्ठिरस्य पुरतः शत्रुणा दुर्योधनेन स्वायत्तीकृतायाः पृथिव्याः वर्णनं कर्तुं सः सन्नद्धः(उद्यतः) जातः। दुर्योधनः कपटेन हृतं राज्यं सम्प्रति नीतिम् अनुसृत्य पालयति। दुर्योधने प्रजाः सम्यक् अनुरक्ताः। इदं अप्रियमपि कटुसत्यं राज्ञे युधिष्ठिराय कथयितुं न स गुप्तचरः व्यथितः अभूत् । 'अप्रीतिजनकं शत्रोरुत्कर्षं राज्ञः युधिष्ठिरस्य पुरतः कथं कथयिष्यामि' इति किंचिन्मात्रमपि तस्य गुप्तचरस्य चित्तं विचलितं न अभवत्। यतः हितैषिणः भृत्याः (सेवकाः) स्वामिनः पुरतः कदापि मिथ्याभूतं प्रियं वाक्यं न वदन्ति। ते सदैव सत्यमेव वदन्ति -तत् प्रियं भवतु अप्रियं वा। स्वामिनः मङ्गलसम्पादनमेव भृत्यानां प्रयोजनं भवति। मिथ्याभाषणेन स्वामिनः कार्यस्य हानिः भवति। अतएव स्वामिनः हिताय ते कटुसत्यमपि कथयन्ति।

**समासः-** कृतः प्रमाणः येन सः कृतप्रणामः तस्य कृतप्रणामस्य(बहुव्रीहिसमासः)। महीं भुनक्ति इति महीभुक् तस्मै महीभुजे। महीभुजे - चतुर्थी एकवचनम् (विभक्तिः)। निवेदयिष्यतः - षष्ठी एकवचनम्(विभक्तिः)। निवेदयिष्यतः निवेदयितुम् इच्छतः। निवेदयिष्यति इत्यस्य शत्रन्तं रूपं भवति निवेदयिष्यतः। शत्रन्ते 'अत्' शिष्यते। क्रिया विव्यथे। व्यथ् - आत्म-लिट्-प्रपु.ए.व। हितैषिणः - हितम् इच्छन्ति तच्छीलाः (स्वभावयुक्ताः) (उपपदतत्पुरुषसमासः)। मृषा

(असत्यम्) -प्रियञ्च वचनं प्रवक्तुं न इच्छन्ति। सपत्नेन इत्यत्र शत्रुणा इत्यर्थः।

**वनेचरः रहसि विनिश्चितीर्थं वाचमुवाच-**
युधिष्ठिराय कटुवाक्यं न वक्तव्यम् इति विचिन्वन् सः किरातः स्वामिनः युधिष्ठिरस्य आज्ञां स्वीकृत्य वदति-

**द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।**
**स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥3॥**

**अन्वयः**- द्विषां विघाताय विधातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सः रहसि सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आददे।

वनेचरः भूभृत अनुज्ञामधिगम्य अवदत्

**सारांशः** -यद्यपि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्ता, तथापि युधिष्ठिरस्य हितार्थं 'दुर्योधनः नीतिम् अनुसृत्य प्रजां पालयति' इति कटुसत्यस्य कथनं आवश्यकम्। स्वामिनः अनुमतिं विना कटुसत्यस्य कथनं गुप्तचरस्य कृते भयानकमपि भवितुं शक्नोति, अत एव सः गुप्तचरः कटुसत्यस्य कथनाय शत्रूणां विनाशाय उद्योगं कर्तुं इच्छतः युधिष्ठिरस्य अनुमतिं प्राप्नोति। ततः सः गुप्तचरः शान्तलालित्येन अर्थगाम्भीर्येण च अतिशयेन शोभमानां सन्देहरहितां च वाणीं उवाच।

वनेचरः सौष्ठवोदार्य विशेषशालिनीं विनिश्चितार्थां वाचम् आददे।

**भावार्थः** - वनेचरः शत्रूणां विनाशाय इच्छायुक्तस्य युधिष्ठिरस्य अनुमतिं स्वीकरोति। पुनः सः एकान्ते विनयपूर्वकं सीमितैः प्रामाणिकैः कोमलैः च शब्दैः स्ववार्तां कथयति। वनेचरः भूभृतः अनुज्ञाम् अधिगम्य वाचमाददे।

**समासः**- सौष्ठवौदार्यविशेषशालिनी- सौष्ठवं(सुष्टुभावः) च औदार्यं (उदारस्य भावः) च सौष्ठवौदार्य (द्वन्दः) तयोः विशेषः सौष्ठवौदार्यविशेषः (तत्पुरुषः), सौष्ठवौदार्यविशेषैः शालते (शोभते) सौष्ठवौदार्यविशेषशालिनी, ताम् (उपपदतत्पुरुषसमासः)। विनिश्चितार्थम् - विशेषेण निश्चितः इति विनिश्चितः(प्रादितत्पुरुष) विनिश्चितः अर्थः यस्याः सा विनिश्चितार्था ताम् (बहुव्रीहिसमासः)। विनिश्चितार्थं विशेषतः प्रमाणतो निर्णितार्थमिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान्।

**व्याकरणकार्यम्**- द्विषां विधाताय इत्यत्र 'तुमर्थाच्च भाववचनात्' इति सूत्रेण तुमर्थे चतुर्थी। विधाताय इति रूपम्। विधाताय इत्यस्य विधातुम् इत्यर्थः।

**हितवादिनः अनुजीविनः अप्रियवादिनेऽपि क्षन्तव्या-**
राजा युधिष्ठिरः किरातस्य अप्रियैः कठोरैः च वचनैः अप्रसन्नः भवेत् इति चिन्तयित्वा किरातः पूर्वम् एव क्षमायाचनं करोति-

**क्रियासु युक्तैः नृप चारचक्षुषः न वञ्चनीयाः प्रभवोऽनुजीविभिः ।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥4॥**

**अन्वयः-** हे नृप! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः। अतः असाधु साधु वा क्षन्तुम् अर्हसि। (यतः) हितं मनोहारि च वचः दुर्लभम्।

हितं मनोहरि च दुर्लभं वचः

**सारांशः -** कटुसत्यकथनात्पूर्वं सः वनेचरः प्रथमं स्वामिनः युधिष्ठिरात् क्षमायाचनां करोति। युधिष्ठिरं सम्बोधयन् सः कथयति। हे राजन् ! कार्येषु नियुक्तैः भृत्यैः स्वामिनः (राजानः) न प्रतारणीयाः। ये भृत्याः नृपस्य पुरतः सत्यभूतमर्थं न उक्त्वा मिथ्याभूतं स्तुतिपरकं मधुरवाक्यं कथयन्ति ते तु नृपं प्रवञ्चनं कुर्वन्ति। अनेन प्रभुकार्यस्य हानिः भवति। यथा कश्चिदपि पुरुषः यत् चक्षुषा पश्यति तदेव प्रमाणीकरोति तथा यत् गुप्तचरेणोच्यते तदेव राजानः प्रमाणीकुर्वन्ति। स्वनियुक्तगुप्तचरमुखः ते सर्वं अवगच्छन्ति। अहं सत्यमेव वदिष्यामि इत्यर्थः। अतः दुर्योधनस्य शत्रोः विषये मम सत्यभूतं वचनम् अप्रियं भवतु प्रियं वा भवतु तद् भवता क्षम्यताम्। यतः हितकरं तथैव सद्यः मनोहरं वचनं दुर्लभं भवति। वस्तुवस्तु जगति प्रियहितकरयोः वाक्ययोः विरोधः जायते यतो हि हितकरसत्यवचनेषु कटुत्वं विद्यतैव। कीदृशं वचः दुर्लभम् अस्ति - हितं मनोहारि च वचः दुर्लभं अस्ति । दुर्लभम् - दुःखेन लभ्यते इति। किं दुर्लभम् - वचः दुर्लभम्।

**समासः -** चरन्तीति चराः, चराः एव चाराः। चाराः एव चक्षुषी येषां ते चारचक्षुषः(बहुव्रीहिसमासः)। असाधु - न साधु (नञ्तत्पुरुषसमासः)। मनो हर्तुं शीलमस्येति मनोहारि (उपपदसमासः)

**सदा अनुकूलेषु राजस्वमात्येषु च सम्पदः तिष्ठन्ति।**
भयहीनः किरातः वदति यत् सः यत्किञ्चित् वदिष्यति तत् राजा सावधानं शृणुयात्-

**स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किंप्रभुः।**
**सदानुकूलेषु च कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥5॥**

**अन्वयः-** यः अधिपं साधु न शास्ति सः किंसखा(एवमेव)। यः हितात् न संश्रृणुते सः किंप्रभुः। हि नृपेषु अमात्येषु च सदा अनुकूलेषु (सत्सु) सर्वसम्पदः रतिं कुर्वते।

राजामात्ययोः ऐक्ये सर्वसम्पत्तयः

**सारांशः** - नृपाय हितोपदेशकरणं भृत्यानां(अमात्यादीनां) धर्मः, अमात्योपदेशस्य श्रवणं च नृपस्य धर्मः इति प्रतिपाद्यते अस्मिन् श्लोके। यः सखा (सचिवः, मन्त्री) नृपाय हितकरं वचनं न उपदिशति स कुत्सितः(निन्द्यः) सखा (सचिवः, मन्त्री) अस्ति। तथैव यः नृपः हितोपदेष्टुः सचिवात् हितकरं वचनं न श्रृणोति (हितोपदेशस्य अवहेलनां करोति) सः कुत्सितः नृपः अस्ति। सर्वथा सचिवेन वक्तव्यं श्रोतव्यं च स्वामिना इत्यर्थः। एवं च राजमन्त्रिणोः एकमत्यं स्यात्। नृपेषु (राजसु) सचिवेषु (अमात्येषु) परस्परं अनुरक्तेषु सत्सु समस्ताः सम्पत्तयः निरन्तरं अनुरागं कुर्वन्ति। राजामात्ययोः एकमत्यात् सम्पत्तयः (राजलक्ष्मीः) निरन्तरं वृद्धिं गच्छन्ति कदापि नृपं न परित्यजन्ति। हस्तिनापुरे दुर्योधनस्य विषये यत् किञ्चिद् मया ज्ञातं तत्सर्वं मया वक्तव्यं भवता च श्रोतव्यम्, कोपश्च न कार्यः इति भावः।

**भावार्थः**- यः मन्त्री राजानं हितं न उपदिशति सः कुमित्रम् एव। पुनश्च यः राजा मन्त्रिणा कथितानि हितवचनानि न शृणोति सः निन्दितः राजा एव। अर्थात् मन्त्रिणः हितं वाक्यं नृपेण तत् हितं श्रोतव्यम्। तथा आचरन्तं राजानं सकलसम्पत्त्स्यः न त्यजन्ति। अर्थान्तरन्यासः अलङ्कारः। तल्लक्षणम् –

> सामान्यं वा विशेषेण विशेषस्तेन वा यदिः।
> कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते।

अर्थात् तस्य कार्येण कारणस्य समर्थनं क्रियते तत्र अर्थान्तरन्यासः अलङ्कारः भवति। तत्र 'मन्त्रिभिः हितं वक्तव्यं नृपेण च तस्य श्रवणं करणीयम्' इति कारणस्य 'सर्वसम्पदः' इति कार्येण समर्थनं कृतं अस्ति, अतः अत्र अर्थान्तरन्यासः अलङ्कारः अस्ति ।

**क्रियाः** - शास्ति, संश्रुणुते, कुर्वते। शास्ति - शासु अनुशिष्टौ – पर-लट्-प्रपु-ए-व। संश्रुणुते – सम् + श्रु श्रवणे – आत्म-प्रपु-ए-व। सम् पूर्व श्रु धातोः आत्मनेपदित्वं लभते। 'श्रु श्रवणे' इति धातुः परस्मैपदमेव। कुर्वते – डुकृञ् करणे - आत्म-लट्-प्रपु-ब-व।

**समासः** - कुत्सितः सखा किंसखा (कर्मधारयनः)। कुत्सितः प्रभुः किंप्रभुः (कर्मधारयनः)। सर्वाः सम्पदः सर्वसमपदः (कर्मधारयः)। किंसखा (कुत्सितः सखा, कुमन्त्री) - किंसखा - यः अधिपं साधु न शास्ति।

**व्याकरणकार्यम्** – किंसखा – कुत्सितः सखा किंसखा। सखिशब्दात् समासे साधारणरीत्या टच् प्रत्यये अकारान्तवद्रूपं लभते। राजसखा इतिवत्।

किन्तु ‘किमः क्षेपे’ इति सूत्रेण क्षेपार्थे अयं टच्प्रत्ययः न। किंसखा इति रूपम्।

**युधिष्ठिरस्यानुभावादेव शत्रोः निगूढं वृत्तं विदितं इत्याह -**
किरातः अस्मिन् श्लोके स्वस्य अहङ्कारस्य अभावं प्रकटयति-

**निसर्गदुर्बोधमबोधविक्लबाः क्व भूपतीनां चरितं क जन्तवः।**
**तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥6॥**

**अन्वयः-** निसर्गदुर्बोधं भूपतीनां चरित क्व? अबोधविक्लवाः(मादृशाः) जन्तवः क्व? (तथापि) मया विद्विषां निगूढतत्त्वं नयवर्त्म अवेदि (इति) यत्, अयं तव अनुभावः।

वनेचरः विद्विषां निगूढतत्वं जानाति

**सारांशः -** अस्मिन् श्लोके राज्ञां चरित्रस्य दुर्ज्ञेयत्वं तथा गुप्तचरस्य किरातस्य विनयशीलत्वं अभिमानराहित्यं च प्रतिपादितम्। राज्ञां(महीपतीनां) चरित्रं स्वभावादेव दुर्ज्ञेयं विद्यते। बुद्धिमन्तोऽपि जनाः राज्ञां चरित्रं ज्ञातुं न शक्नुवन्ति (समर्थाः न भवन्ति)। मादृशां सामान्यजनानां तु कथैव का? तथापि शत्रूणाम् अत्यन्तं रहस्यात्मको राजनीतिमार्गो यो मया ज्ञातः सः भवतः एव प्रभावः। भवतः प्रभावेणैव कठिनमपि एतत् कार्यं मया कृतम्। अत्र मम किञ्चिदपि सामर्थ्यं चातुर्यं वा न विद्यते।

**भावार्थः -** किरातः विनयपूर्वकं युधिष्ठिरं वदति यत् - स्वभावेन दुर्बोधं राज्ञाम् आचरणं कुत्र! अस्मादृशाः अज्ञानिनः प्राणिनः च कुत्र! मया यत्किञ्चित् शत्रूणाम् अयं गुप्तरहस्यभूतः न्यायमार्गः ज्ञातः तत् भवताम् अनुग्रहद्वारा एव, न तु मम योग्यतया।

अस्मिन् श्लोके विषमः अलङ्कारः अस्ति। अयोग्ययोः द्वयोः योग्यत्वेन कथनं विषमालङ्कारः। अत्र किरातः राज्ञः आत्मनः च पृथक् पृथक् स्वरूपस्य विरूपस्य च कथनात् अतः अत्र विषमः अलङ्कारः भवति।

**समासः -** निसर्गेण दुर्बोधं - निसर्गदुर्बोधम् (तृतीयातत्पुरुषः)। भुवः पतिः भूपतिः तेषाम् भूपतीनाम्। न बोधः - अबोधः(नञ्-तत्पुरुषसमासः), अवबोधेन विक्लवाः-अवबोधविक्लवाः (तत्पुरुषः)। निगूढं तत्वं यस्य तत् - निगूढतत्वम् (बहुव्रीहिः)। नयस्य वर्त्म - नयवर्त्म(षष्ठीतत्पुरुषः)। अवेदि - विद् धातोः कर्मणि लुङि प्रपु-ए-व।

**दुर्योधनः छद्मना जितं राज्यं नयेन जेतुं प्रयतते-**
इदानीं किरातः दुर्योधनद्वारा सञ्चाल्यमानस्य राज्यस्य स्थितिं वक्तुम् आरभते-

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥7॥

**अन्वयः-** सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः (सन्) दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते।

सुयोधनः इदानीं राज्यं पालयति

**सारांशः-** धृतराष्ट्रस्य ज्येष्ठपुत्रः दुर्योधनः यद्यपि अधुना राजसिंहासनारूढः वर्तते, सर्वाधिकारसम्पन्नोऽयं सर्वविधं सुखमनुभवति तथापि वनवासिनः भवतः (युधिष्ठरात्) सः पराजयं विशङ्कते। वनवासस्य अवधिः यदा समाप्तिं गमिष्यति तदा भवान् (युधिष्ठिरः) स्वकीयं राज्यं पुनर्ग्रहीष्यति इति मनसि कृत्वा सः चिन्तितः (चिन्ताकुलः) वर्तते। अत एव पुरा द्यूतच्छलेन लब्धां महीम् (राज्यम्) इदानीं सः सुनीत्या प्रजापालनेन वशीकर्तुं यतते।

**भावार्थः** –किरातः वदति यत् - यद्यपि दुर्योधनः सिंहासनस्थः अस्ति तथापि सः राज्यं द्यूतच्छलेन गृहीतवान् इति कारणेन वनवासिनः भवतः (युधिष्ठिरात्) पराजयस्य आशङ्कां तस्य मनसि वर्तते। अतः सः समग्रां पृथिवीं जेतुं प्रजानां पालनं न्यायमार्गेण एव करोति, येन प्रजाः तस्य अनुकूलाः भवेयुः।

**अलङ्कारः-** काव्यलिङ्गम् । लक्षणम् -
काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥

अत्र नयेन जेतुं जगतीं सुयोधनः इति चतुर्थं चरणं दुरोदरच्छद्मजितां जगतीम् इत्यस्य हेतुत्वेन उक्तम् अस्ति। अतः अत्र पदार्थहेतुकः काव्यलिङ्गम् अलङ्कारः भवति।

**समासः** – नृपासनस्थः – नृपस्य आसनं नृपासनम् (षष्ठीतत्पुरुषः), नृपासने तिष्ठति इति (उपपदतत्पुरुषः)। वनाधिवासिनः- वने अधिवासः वनाधिवासः (सप्तमीतत्पुरुषः), वनाधिवासः अस्य अस्ति इति वनाधिवासी (वनाधिवासिन् तद्धितः-इन् प्रत्ययान्तम्)। दुरोदरच्छद्मजिताम् - दुरोदरस्य छद्म दुरोदरच्छद्म (षष्ठीतत्पुरुषः), दुरोदरच्छद्मना जिता दुरोदरच्छद्मजिता, ताम् (तृतीयातत्पुरुषः)। विशाङ्कमानः – वि + शङ्क धातोः शानजन्तरूपम्

युधिष्ठिरजिगीषया सुयोधनः स्वगुणान् प्रथयति।

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमात् वरं विरोधोऽपि समं महात्मभिः ॥8॥

दुर्योधनः पाण्डवजिगीषया यशः विस्तारयति

**अन्वयः-** तथापि जिह्मः सः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति। (तथाहि) भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्यसंगमात् वरम्।

**सारांशः -** दानदाक्षिण्यादिसद्गुणः सः वञ्चकः भवन्तं युधिष्ठिरं अतिक्रमितुमिच्छति इति प्रतिपादितम् अत्र। भवतः पराजयम् आशङ्कमानोऽपि सः कुटिलः दुर्योधनः दानदाक्षिण्यादीनां गुणानां गरिम्णा भवन्तं जेतुम् इच्छति। पुरा द्यूतक्रीडाच्छलेन भवदीयं राज्यं स हृतवान्, अधुना सः भवन्तं गुणैः जेतुम् इच्छति। महात्मना भवता सह विरोधं कृत्वा सः निन्दनीयः न भवति यतः सज्जनैः सह विरोधः अपि दुर्जनसंसर्गापेक्षया श्रेष्ठः भवति। सज्जनविरोधेन (सज्जनस्पर्धया) पुरुषस्य उन्नतिरेव भवति। अनेन पुरुषः समृद्धिमेव लभते।

**भावार्थः -** किरातः युधिष्ठिरं वदति यत्- भवतः पराजयम् आशङ्कमानः अपि सः कुटिलः दुर्योधनः भवन्तं पराजेतुं स्वस्य निर्मलं यशः विस्तारयति। अर्थात् भवतः इव दानादिकर्मणा स्वस्य कीर्तिम् अभिवर्धयति। यद्यपि दुर्योधनः कुटिलः दुष्टः च अस्ति तथापि सः भवादृशैः सज्जनैः सह वैरं करोति इत्यतः भवतः केषाञ्चन सद्गुणानाम् आचरणं करोति। यत :दुर्जनानां संसर्गात् सज्जनैः सह विरोधः अपि वरम् एव। किरातः दुर्योधनस्य न्यायमार्गस्य प्रकारं वदति।

**सूक्तिः-** 'अनार्यसङ्गमात् वरं विरोधोऽपि समं महात्मभिः'। अर्थात् दुर्जनानां सङ्गतेः अपेक्षया सज्जनैः सह विरोध :वरं भवति।

**व्याकरणकार्यम् –** महात्मभिः- समम् इत्यत्र सहार्थकशब्दयोगात् 'सहयुक्तेऽप्रधाने' इति सूत्रेण तृतीया। महात्मभिः इति तृतीया।

**अलङ्कारः -** अर्थान्तरन्यासः। तस्य लक्षणम् –

सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्य्यञ्च कारणेनेदं कार्येण च समर्थ्यते।

अत्र वरं विरोधोऽपि समं महात्मभिः इति सामान्येन विशेषस्य समर्थनात् अर्थान्तरन्यासः।

**सन्धिः -** तथापि -तथा +अपि- सवर्णदीर्घसन्धिः। विरोधोऽपि- विरोधः + अपि- विसर्गसन्धिः, पूर्वरूपसन्धिः।

**समासः -** भवज्जिगीषया - भवतः जिगीषा भवज्जिगीषा, तया (षष्ठीतत्पुरुषः)। गुणसम्पदा - गुणस्य सम्पत् गुणसम्पत्, तया(कर्मधारयः)। अनार्यसङ्गमात्- न आर्यः अनार्यः(नञ्तत्पुरुषः), अनार्यस्य सङ्गमः

अनार्यसङ्गमः, तस्मात् (षष्ठीतत्पुरुषः)। अनार्यसंगमात् वरम् - महात्मभिः समं विरोधः वरम् । जिगीषा - जि धातोः सन् प्रत्ययः।

कामाद्यरिषड्वर्गजयेन सः पौरुषं नयेन विस्तारयति।

दुर्योधनः न केवलं नीतिद्वारा शासनं करोति अपि तु सः पुरुषार्थमपि करोति। अस्मिन् श्लोके किरातः तस्य दुर्योधनस्य पुरुषार्थं वर्णयति-

**कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपिप्सुना ।**
**विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥9॥**

**अन्वयः-** कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपिप्सुना अस्ततन्द्रिणा तेन पौरुषं नक्तंदिवं विभज्य नयेन वितन्यते।

सुयोधनेन नयेन पौरुषं वितन्यते

**सारांशः** - धृतराष्ट्रस्य ज्येष्ठपुत्रः सः दुर्योधनः कामक्रोधादिशत्रुसमूहं विजित्य अतीव विनीतः जातः। साधारणजनैः अगम्यस्वरूपां मनूपदिष्टां प्रजापालननीतिं अनुसर्तुं सः इच्छति। कार्यभारस्य आधिक्यात् सर्वेषां कार्याणां युगपत् सम्पादनं सम्भवमिति कृत्वा 'अस्मिन् समये इदं कार्यं कर्तव्यमिदं न कर्तव्यम्' इति अहोरात्रयोः समयस्य विभजनं (विभागं) कृत्वा निरलसः सः सर्वाणि कार्याणि नीतिशास्त्रानुसारेण सम्पादयति ।

**भावार्थः** - सः दुर्योधनः कामः, क्रोधः, लोभः, मोहः, मदः अहङ्कारः च इति एतान् षड् रिपून् जित्वा अन्यैः नृपैः अप्राप्यरूपां मनुस्मृत्यादिग्रन्थे कथितां प्रजापालनपद्धतिम् अनुसर्तुम् इच्छति। तदर्थं सः निरलसः भूत्वा अस्यां वेलायाम् इदं कार्यं करणीयम् इति कार्यानुसारं विभागं कृत्वा स्वस्य पौरुषार्थं नीतिमार्गेण विस्तारयति। कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपिप्सुना अस्ततन्द्रिणा सुयोधनेन नक्तंदिवं विभज्य नयेन पौरुषं वितन्यते। (षट् अरयः सन्ति। ते काम-क्रोध-लोभ-मद-मोह-मत्सराः।)

अलङ्कारः -परिकरः। लक्षणम् -उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः। अर्थात् यत्र साभिप्रायकं विशेषणं भवति तत्र परिकरः अलङ्कारः भवति। अत्र कृतारिषड्वर्गजयः इति दुर्योधनस्य कृते प्रयुक्तं विशेषणं साभिप्रायकम्, अतः परिकरः अलङ्कारः भवति।

**समासः-** (कृतारिषड्वर्गजयेन-षण्णां वर्गः षड्वर्गः (षष्ठीतत्पुरुषः), अरीणां षड्वर्गः अरिषड्वर्गः (षष्ठीतत्पुरुषः), अरिषड्वर्गस्य जयः अरिषड्वर्गजयः (षष्ठीतत्पुरुषः), कृतः अरिषड्वर्गजयः येन सः कृतारिषड्वर्गजयः, तेन (बहुव्रीहिः)। अगम्यरूपाम् -न गम्यम् अगम्यम् (नञ्तत्पुरुषः), अगम्यं रूपं यस्याः सा अगम्यरूपा, ताम् (बहुव्रीहिः)।

नक्तन्दिवम्-नक्तं च दिवा च (समाहारद्वन्द्वः)। अत्र नक्तं, दिवा इति पदद्वयमपि अव्ययं भवति। अस्ततन्द्रिणा- अस्ता तन्द्रिः येन सः अस्ततन्द्रिः, तेन बहुव्रीहिः।

### अनुजीविनः सुहृदश्च सादरं संभावयति-

अस्मिन् श्लोके दुर्योधनस्य स्वसेवकेषु अनुग्रहः कथम् अस्ति इति उच्यते -

**सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः ।**
**स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥10॥**

**अन्वयः-** गतस्मयः सः अनुजीविनः प्रीतियुजः सखीन् इव, सुहृदः बन्धुभिः समानमानान् इव, बन्धुतां कृताधिपत्याम् इव, च साधु सन्ततं दर्शयते(लोकस्य)।

मित्राणि बान्धवान् इव, बन्धुवर्गं राज्याधिपतिमिव व्यवहरति

**सारांशः -** सेवकमित्रबन्धुजनान् प्रति अतीव सम्मानपूर्णः व्यवहारः दुर्योधनस्येति प्रतिपाद्यतेऽस्मिन् श्लोके। अहंकारशून्यः दुर्योधनः सेवकान् प्रति तथा व्यवहरति यथा जनाः मित्राणि प्रति व्यवहरन्ति। मित्राणि प्रति स तथा व्यवहरति यथा जनाः भ्रात्रादीन् प्रति व्यवहरन्ति। भ्रात्रादीन् प्रति सः तथा व्यवहरति यथा ते भात्रादयः स्वकीयमाधिपत्यं मन्यन्ते। अर्थात् अतिविनम्रः दुर्योधनः सेवकैः सह मित्रवत्, मित्रैः सह बन्धुवत्, बन्धुभिः सह आत्मवत् व्यवहरति। सर्वान् प्रति सम्मानाधिक्यप्रदर्शनेन दुर्योधने सर्वेषां जनानां प्रीतिः जाता। सर्वेषां जनानां सः प्रियः जातः।

**भावार्थः -** सः दुर्योधनः निरहङ्कारी भूत्वा सर्वदा स्वसेवकेषु प्रीतिपात्राणां मित्राणाम् इव अनुरागं प्रदर्शयति। मित्रेभ्यः च बन्धुसमं तुल्यसत्कारं प्रयच्छति। स्वबन्धुषु अधिपतीनाम् इव अनुरागं प्रदर्शयति। अर्थात् सः पूर्ववत् अहङ्कारी नास्ति। सः सर्वान् स्वव्यवहारेण तोषयति।

**सन्धि-** प्रीतियुजोऽनुजीविनः -प्रीतियुजः +अनुजीविनः -पूर्वरूपसन्धिः। सुहृदश्च -सुहृदः +च - श्चुत्वसन्धिः।

**अलङ्कारः-** पूर्णोपमा तस्य लक्षणम् -

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।

अस्मिन् श्लोके तुल्यबोधकस्य इव शब्दस्य प्रयोगात् अत्र पूर्णोपमा अलङ्कारः भवति।

**समासः -** प्रीतियुजः -प्रीतिं युञ्जन्ति ते प्रीतियुजः, तान् (उपपदतत्पुरुषः)। समानमानान्-समानं मानं येषां ते समानमानाः, तान् (बहुव्रीहिः)।

गतस्मयः-गतः स्मयः यस्मात् सः (बहुव्रीहिः)। कृताधिपत्याम्-कृतम् आधिपत्यं यस्याः सा कृताधिपत्या, ताम् (बहुवीहिः)।

स: धर्मार्थकामान् जागरूकः समं सेवते-

अस्मिन् श्लोके दुर्योधनः धर्म-अर्थ-कामान् कथं सेवते इति उच्यते-

**असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।**
**गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥11॥**

**अन्वयः-** यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराधयतः अस्य त्रिगणः गुणानुरागात् सख्यं ईयिवान् इव परस्परं न बाधते।

दुर्योधनेन सेविताः धर्माथकामाः परस्परं न बाधन्ते

**सारांशः -** दुर्योधनः धर्मार्थकामरूपस्य त्रिवर्गस्य समानानुरागेण सेवनं करोतीति प्रतिपाद्यतेऽस्मिन् श्लोके। अस्मिन् संसारे धर्मार्थकाममोक्षरूपाः चत्वारः विद्यन्ते। मोक्षरूपः चतुर्थः पुरुषार्थस्तु संसारिभिः सामान्यजनैः प्रायः न काम्यते। जनाः धर्मार्थकामरूपस्य पुरुषार्थत्रयस्यैव सेवनं कुर्वन्ति। यद्यपि एते त्रयः पुरुषार्थाः परस्परविरोधिनः विद्यन्ते तथापि 'अस्मिन् समये धर्म, आचरणीयः, अस्मिन् समये अर्थः आर्जनीयः, अस्मिन् समये कामः सेवनीयः' एवं रूपेण एतेषां धर्मार्थकामानां सेवनसमयं विभज्य दुर्योधनः निर्लिप्तः सन् तुल्यानुरागेण तान् धर्मार्थकामान् सेवते। एतेषु एकतमे अत्यासक्तिः न तस्य वर्तते। तस्मात् ते परस्परं बाधकाः न सन्ति। धर्माचरणसमये अर्थकामौ न बाधेते। अर्थोपार्जनसमये धर्मकामौ न बाधेते। कामसेवनसमये धर्माथौं न बाधेते। दुर्योधनस्य दयादानदाक्षिण्यादिसद्गुणैः आकृष्टाः इव ते धर्मार्थकामाः तत्र (दुर्योधने) बहुकालपर्यन्तम् अवस्थानमिच्छन्तः परस्परं स्नेहेन वसन्ति। दुर्योधनः धर्म-अर्थ-कामान् समं सेवते।

**भावार्थः -** सः दुर्योधनः धर्मार्थकामानां यथोचितं विभागं कृत्वा अनासक्तः सन् समानरूपेण तेषां सेवनं करोति, येन एते धर्मार्थकामाः अस्य दुर्योधनस्य गुणानाम् अनुरागकारणात् मित्रम् इव जाताः सन्ति। अर्थात् तदनुकूलाः जाताः सन्ति। एतेषां परस्परं विरोधः एव न दृश्यते।

सुयोधनस्य त्रिगणः परस्परं न बाधते। त्रिगणः - धर्मार्थकामरूपः। सुयोधनस्य त्रिगणः गुणानुरागात् सख्यं ईयिवान् इव परस्परं न बाधते। ईयिवान् प्राप्तवान्। ईयिवान् इति पदं इ धातुना सह क्वसुप्रत्ययान्तं रूपम्।

**सन्धिः** -आराधयतो यथायथम् - आराधयतः +यथायथम् -विसर्गसन्धिः। बाधतेऽस्य -बाधते +अस्य -पूर्वरूपसन्धिः।

**अलङ्कारः** -वाच्योत्प्रेक्षा। लक्षणम् -सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्। अत्र धर्मार्थकामानां त्रिगुणानां मित्रत्वेन उत्प्रेक्षणकारणात् वाच्योत्प्रेक्षा अलङ्कारः अस्ति।

**समासः** - असक्तम् - न सक्तम् असक्तम् (नञ्-तत्पुरुषः)। समपक्षपातया - पक्षे पातः पक्षपातः (सप्तमीतत्पुरुषः), समः पक्षपातः यस्याः सा समपक्षपाता, तया (बहुव्रीहिः)। गुणानुरागाद् - गुणस्य अनुरागः गुणानुरागः, तस्मात् (षष्ठीतत्पुरुषः)। त्रिगणः -त्रयाणां गणः त्रिगणः (षष्ठीतत्पुरुषः)।

**व्याकरणकार्यम्** – 'गुणानुरोधेन विना' इत्यत्र विनाशब्दयोगात् 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति सूत्रेण तृतीया, द्वितीया, पञ्चमी वा। अत्र तृतीया। गुणानुरोधेन इति।

**समाद्युपायानपि सः यथोचितं प्रयुङ्क्ते-**

दुर्योधनः राजनीतेः प्रयोगं कथं करोति इति उच्यते -

**निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।**
**प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥12॥**

**अन्वयः**- तस्य निरत्ययं साम दानवर्जितं न प्रवर्तते। सत्क्रियां विरहय्य भूरि दानं न (प्रवर्तते)। गुणानुरोधेन विना विशेषशालिनी सत्क्रिया न प्रवर्तते।

दुर्योधनः दानादीना सर्वान् वशीकरोति

**सारांशः** - सः राजा दुर्योधनः राजनीतेः चतुर्विधानामुपायानां (सामदानदण्डभेदाना) प्रयोगे अतीव निपुणोऽस्ति। सामदानयोः प्रयोगे तस्य निपुणता निरूपिता अस्मिन् श्लोके। तस्य सामनीतिप्रयोगः धनदानं विना प्रवृत्तः न भवति। प्रीतः दुर्योधनः स्वकार्यसिध्यर्थं न केवलं मधुरवचनानां प्रयोगं करोति अपि तु मधुरवचनैः सह सः धनदानमपि करोति। तस्य दाननीतिप्रयोगः सत्कारं विना प्रवृत्तः न भवति। सत्कारं विना प्रचुरं दानमपि निरर्थकमिति (अनादरे दानवैफल्यमित) सः जानाति। सः यस्मै धनदानं करोति तस्य सत्कारमपि करोति- सत्कारपूर्वकमेव तस्य दानम्। तस्य सत्कारः अपि गुणानुरागेण प्रवृत्तः भवति। सः गुणिनामेव अतिशयं सत्कारं करोति, न तु गुणविहीनानाम्।

**भावार्थः** - तस्य दुर्योधनस्य सामनीतिः दानेन विना न भवति। दानं च आदरेण विना न भवति। अतिशयः आदरः अपि विशेषगुणयुक्तः एव भवति। अर्थात् दुर्योधनः पर्याप्तदानेन सबलान् सर्वान् स्वस्य वशे करोति। दानमपि अतिशयसत्कारेण करोति। तच्च दानं गुणशालिभ्यः एव ददाति।

सुयोधनस्य निरत्ययं साम दानसहितं भवति। सुयोधनस्य सत्कारपूर्वकं दानं भवति। सुयोधनः गुणानुरागेण कारणेन सत्कारं करोति।

सुयोधनस्य उपायकुशलता - सुयोधनस्य साम दानसहितं भवति। दानं सत्कारसहितं भवति। सत्कारं च गुणसहितानां भवति।

विरहस्य इत्यस्य विना इत्यर्थः। वि+रह् +ल्यप्-विरहस्य।

**अलङ्कारः** -एकावलिः। तस्य लक्षणम्- 'पूर्वं पूर्वं प्रति विशेषणत्वेन परं परं स्थाप्यते अपोह्यते वा चेत्स्यात्तदैकावलि द्विधा'। अस्मिन् श्लोके साम इत्यस्य विशेषणं दानयुक्तम् अस्ति। दानस्य विशेषणं सत्क्रियासहितम् अस्ति। सत्क्रियायाः विशेषणं गुणानुरोधकारणात् इति च अस्ति। अतः एवं पुनः पुनः विशेषणानां विशेषणदानात् एकावलि अलङ्कारः भवति।

**समासः**- निरत्ययम् -निर्गतः अत्ययः यस्मात्, तत् (बहुव्रीहिः)। दानवर्जितम् -दानेन वर्जितम् (तृतीयातत्पुरुषः)। भूरिदानम् -भूरि च तत् दानम् (कर्मधारयसमासः)।गुणानुरोधेन -गुणस्य अनुरोधः गुणानुरोधः, तेन (षष्ठीतत्पुरुष)।

# Summarised Overview

किरातार्जुनीयं महाकाव्यं महाकविना भारविना विरचितम्। अस्य काव्यस्य आधारः महाभारतम् अस्ति। द्यूतक्रीडायां छलेन कौरवैः पाण्डवाः पराजिताः। ते पाण्डवाः चतुर्दशवर्षाणां वनवासं प्राप्तवन्तः। दुर्योधनः शासकः (राज) अभवत्। एकदा युधिष्ठिरः दुर्योधनस्य शासनस्य स्थितिं ज्ञातुं कञ्चन किरातं प्रेषितवान्। किरातः तत्रत्यां सम्पूर्णां स्थितिं ज्ञात्वा द्वैतवने युधिष्ठिरस्य समीपम् अगत्य वदति। राजा युधिष्ठिरः किरातस्य अप्रियैः कठोरैः च वचनैः अप्रसन्नः भवेत् इति चिन्तयित्वा किरातः पूर्वम् एव क्षमायाचनं करोति। गुप्तचरस्य किरातस्य विनयशीलत्वं अभिमानराहित्यं च प्रतिपादितम्। युधिष्ठिरजिगीषया सुयोधनः स्वगुणान् प्रथयति -अधुना किरातः दुर्योधनस्य न्यायमार्गस्य प्रकारं वदति - यद्यपि दुर्योधनः कुटिलः दुष्टः च अस्ति तथापि सः भवादृशैः सज्जनैः सह वैरं करोति इत्यतः भवतः केषाञ्चन सद्गुणानाम् आचरणं करोति। दुर्योधनः स्वस्य पौरुषार्थं नीतिमार्गेण विस्तारयति। सः दुर्योधनः धर्मार्थकामानां यथोचितं विभागं कृत्वा अनासक्तः सन् समानरूपेण तेषां सेवनं करोति।

# Assignments

श्लोकं व्याख्यात

1. श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
   स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥
2. कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
   न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।
3. कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपिप्सुना ।
   विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥

आशयं विशदयत

1. हितं मनोहारि च दुर्लभम् वचः ।
2. स किंसखा साधु न शास्ति योऽधिपम्।
3. यो हितान्न संश्रृणुते स किंप्रभुः।
4. नृपेषु अमात्येषु च अनुकूलेषु हि सर्वसम्पदः सदा रतिं कुर्वते।
5. निसर्गदुर्बोधं भूपतीनां चरितम्।
6. अनार्यसंगमात् महात्मभिः विरोधः अपि वरम्।
7. नयेन जेतुं जगतीं सुयोधनः।

अलङ्कारविशेषं प्रतिपादयत

1. स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किंप्रभुः।
   सदानुकूलेषु च कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।।
2. विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
   दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ।।
3. कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपिप्सुना ।
   विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।।
4. निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।
   प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ।।

व्याकरणविशेषं लिखत

1. युधिष्ठिरः
2. द्विषां विधाताय
3. किंसखा
4. महात्माभिः
5. गुणानुरोधेन विना

निबन्धं रचयत ।

1. दुर्योधनस्य प्रजापरिपालनरीतिं ग्रन्थोक्तदिशा लिखत।

# Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed), Sahitya Academy, Trissur
3. The Kiratarjuniya of Bharavi, Ed.by mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh, Tukaram Javaji, Nirnayasagar Press, Bombay1907
4. Sri Gurunathavidyanithi, Kiratarjuniya, , Rudra Printing Works, Culcutta


# References


1. आचार्य श्रीरामचन्द्रमिश्रकः, संसकृतसाहित्येतिहासः, Printed & published - 1985, चौखम्बा विद्याभवन्, वारणासि।
2. अभिराज डा.राजेन्द्र मिश्र, किर्तार्जुनीयम् (प्रथमसर्गः), अक्षयवट प्रकाशन्, इलहबाद्
3. T.K.Ramachardra Aiyer, Sri Bharavi's Kiratharjuneeyam, Canto 1, R.S.Vadhyar and Sons, Kalpathi Palakkad, 2008


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# प्रथमसर्गे 13 - 24 श्लोकाः (दुर्योधनस्य भरणतन्त्रज्ञता)

## Learning Outcomes

- किरातार्जुनीयम् महाकाव्यमधिकृत्य उद्बोधनम्।
- इतरमहाकाव्यानि अपेक्ष्य किरातार्जुनीयस्य वैशिष्ट्यम्।
- दुर्योधनस्य प्रजापरिपालने तात्पर्यमधिकृत्य जानाति, तेन साकं आधुनिकानां भरणाधिकारिणां भरणक्रमं चाधिकृत्य तारतम्यपठनम्।

## Background

किरातः दुर्योधनद्वारा सञ्चाल्यमानस्य राज्यस्य स्थितिं वक्तुं आरभते- दुर्योधनस्य न्यायमार्गस्य प्रकारं, पुरुषार्थं, स्वसेवकेषु अनुग्रहः, धर्म-अर्थ-कामान् कथं सेवते राजनीतेः प्रयोगम् इत्यादीनि जानाति।

अस्मिन् एकके प्रजापालनतत्परः एवं सद्गुणसमन्वितः दुर्योधनः सततं स्वकीयराज्यस्य समुन्नतिं अभिलषति। महाकवेः भारवेः कवितायां दृश्यमानां चातुरीं सहृदयेभ्यः नितरां रोचते। महाकाव्यस्य लक्षणं यथावत् युक्तेऽस्मिन् अर्थगाम्भीर्यं वरीवर्ती। अस्माकं खण्डे अस्य प्रतिभायाः परिस्फुरणं पश्यामः।

## Keywords

दुर्योधनस्य दण्डनीतिप्रयोगः, भेदकौशलं, सामादिनीतीनां प्रयोगस्य लाभः, सभायाः वर्णनं, कार्षिकाभिवृद्धिः, अर्थस्य लाभः, धनुर्धारिणं निश्चयः, राष्ट्रविषयम्, शासनव्यवस्था, धर्माचरणम्, भयाकुलः दुर्योधनः।

# Discussion

**वशी दुर्योधनः दण्डयान् धर्मशास्त्रानुसारेण दण्डयति-**

**वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥13॥**

**अन्वयः** - वशी सः वसूनि वाञ्छन् न (निहन्ति), (तथा) मन्युना न (च), (किन्तु) निवृत्तकारणः (सन्) स्वधर्मः इत्येव गुरूपदिष्टेन दण्डेन रिपौ सुते अपि वा (स्थितं) धर्मविप्लवं निहन्ति।

धर्मानुसारं सः नीतिनिर्वहणं करोति

**सारांशः** - दुर्योधनस्य दण्डनीतिप्रयोगः निरूपितः अस्मिन् श्लोके। जितेन्द्रियः सः दुर्योधनः केनापि लोभेन वा क्रोधाभिभूतः न कमपि दण्डयति। लोभक्रोधद्वेषादिकारणरहितः सन् 'दुष्टानां दण्डनं साधूनां रक्षणं' नृपाणां धर्मः इति मत्वा सः दुष्टान् दण्डयति। दण्डप्रयोगे सः स्वेच्छाचारी नास्ति। मन्वादिधर्माचार्यैः उपदिष्टेन दण्डेन सः दुष्टान् दण्डयति। दण्डप्रयोगे सः कदापि पक्षपातं न करोति। सः सर्वान् समदृष्ट्या पश्यति। यः कोऽपि धर्मस्य उल्लंघनं कृत्वा अधर्माचरणं करोति, सः पुरुषः दण्डस्य पात्रं (दण्ड्यः) भवति, सः शत्रुर्वा भवेत् पुत्रो वा। (दुर्योधनः दण्डं कथं प्रयच्छति इति दण्डस्वरूपं कथ्यते)

**भावार्थः** - सः जितेन्द्रियः दुर्योधनः धनलोभकारणेन क्रोधकारेणेन वा कश्चित् अपि न दण्डयति, अपि तु लोभादिना रहितः सः दुर्योधनः मम इदं कर्तव्यम् इति कर्तव्यताभावेन शास्त्रविधानानुसारं सर्वेभ्यः आत्मीयेभ्यः शत्रुभ्यः च समानतया दण्डं प्रयच्छति। सः अधर्मं निवारयति। दुर्योधनस्य दण्डव्यवस्था - सुयोधनः न धनेच्छया न क्रोधवशात् अपि तु स्वधर्म इति बुद्ध्या दण्डव्यवस्थां करोति। सः गुरूपदिष्टेन दण्डेन रिपौ वा सुते वा धर्मविप्लवं (अपराधिनं) निहन्ति।

वशी – जितेन्द्रियः, निवृत्तकारणः - लोभादिकारणात् निवृत्तः। निहन्ति- नि(उप) हन्(हन हिंसागत्योः) परस्मैपदी, कर्तरि लट् प्रपु.ए.व।

**सन्धिः** - स्वधर्म इत्येव - स्वधर्मः + इत्येव (विसर्गसन्धिः), इत्येव - इति + एव (यण्सन्धिः), सुतेऽपि- सुते + अपि (पूर्वरूपसन्धिः)।

अलङ्कारः - काव्यलिङ्गः ।

**समासः** - निवृत्तकारणः - निवृत्तं कारणं यस्य सः (बहुव्रीहिः), गुरूपदिष्टेन - गुरुणा उपदिष्टः गुरूपदिष्टः, तेन (तृतीयतत्पुरुष)। धर्मविप्लवम् - धर्मस्य विप्लवः धर्मविप्लवः (षष्ठीतत्पुरुषः)।

**कृतकर्मणो भृत्यान् दानेन प्रीणयति, विश्वतांश्च परभेदनाय नियोजयति।**

**विधाय रक्षान्परितः परेतरान् अशङ्कितताकारमुपैति शङ्कितः।**
**क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥14॥**

**अन्वयः-** (सः) शङ्कितः (सन्) परितः परेतरान् रक्षान् विधाय अशङ्किताकारं उपैति। क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति।

शङ्काकुलः सन्नपि आत्मीयान् जनान् नियोज्य अशङ्कितः इव सुयोधनः वर्तते।

**सारांशः-** अस्मिन् श्लोके वनेचरः दुर्योधनस्य भेदकौशलं दर्शयति। दुर्योधनस्थ शङ्काभावः सुरक्षाव्यवस्था पारितोषिकादिप्रदानेन कृतज्ञतादिभावाः अप्यत्र प्रतिपादिताः। वञ्चकः दुर्योधनः स्वकीयराज्ये सर्वत्र आत्मीयान् जनान् रक्षकरूपेण नियुज्य निःशङ्कवत् व्यवहरति। सः सर्वदा शङ्कया व्याकुलो वर्तते किन्तु आकृत्या सः शङ्कितो न प्रतिभाति। कर्मणां समाप्तिषु सः स्वसेवकेभ्यः प्रभूतं धनं ददाति । दुर्योधनेन सेवकेभ्यः प्रदत्ताः सम्पत्तयोऽस्य कृतज्ञता प्रकाशयन्ति।

**भावार्थः** - किरातः युधिष्ठिरं वदति यत् भवतः भयात् शङ्कितः सः दुर्योधनः सर्वत्र देशे आत्मीयजनान् एव रक्षकान् नियोजितवान्। शङ्कितः अपि सः आत्मानम् अशङ्कितं सर्वविश्वस्तम् इत्येव प्रदर्शयति। कस्यचित् कार्यस्य सफलतापूर्वकसमाप्तौ सत्यां तेन दुर्योधनेन तत्सम्बद्धेभ्यः सेवकेभ्यः पुरस्काररूपेण प्रदत्तं धनं दुर्योधनस्य कृतज्ञतां सूचयति।

**सन्धिः**- क्रियापवर्गेष्वनुजीविसात्कृताः- क्रियापवर्गेषु + अनुजीविसात्कृताः (यण् सन्धिः)।

**अलङ्कारः** - काव्यलिङ्गः। अत्र परेतरान् रक्षान् विधाय इत्यस्य शङ्कितः इति हेतुः तथैव कृतज्ञतां वदन्ति इत्यस्य अनुजीविसात्कृताः इति च हेतुः अस्ति। अतः अत्र काव्यलिङ्गमलङ्कारः।

**समासः** - परेतरान् - परेभ्यः इतराः परेतराः, तान् (पञ्चमीतत्पुरुषः)। अशङ्किताकारम् - शङ्कितस्य आकारः शङ्किताकारः (षष्ठीतत्पुरुषः), न शङ्किताकारः अशङ्किताकारः, तम् (नञ्-तत्पुरुषः)। क्रियापवर्गेषु - क्रियायाः अपवर्गाः क्रियापवर्गाः, तेषु (षष्ठीतत्पुरुषः)।

दुर्योधनेन सम्यक् प्रयुक्ताः सामाद्युपापायाः सफला भवन्ति।

**अनारतं तेन पदेषु लम्भिताः विभज्य सम्यग्विनियोगसत्क्रियाः ।**
**फलन्त्युपायाः परिबृंहितापतीरुपेत्य संघर्षमिवार्थसम्पदः ॥15॥**

**अन्वयः**- तेन पदेषु सम्यक् विभज्य विनियोगसत्क्रियाः लम्भिताः उपायाः संघर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति।

दुर्योधनेन प्रयुक्ताः सामदानभेददण्डाः चतुरुपायाः सफलाः भवन्ति

**सारांशः**- अस्मिन् श्लोके महाकविः सामदानदण्डभेदानां चतुर्णामुपायानां सम्यक्प्रयोगस्य फलवत्तां दर्शयति। तेन दुर्योधनेन समुचितस्थानेषु यथोचितं विभजनं कृत्वा सम्यक् प्रयुक्ताः तथा समुचितप्रयोगेण सत्कृताः सामदानदण्डभेदरूपाः चत्वारः उपायाः परस्परं स्पर्धमानाः इव तस्मै दुर्योधनाय राज्ञे प्रथितोत्तरकालाः(स्थिराः) अर्थसम्पत्तीः निरन्तरमुत्पादयन्ति (निरन्तरं तस्मै धनवृद्धिं कुर्वन्ति)।

सामदानदण्डभेदरूपाः चत्वारः उपायाः परस्परं स्पर्धमानाः। लम्भिताः प्रापिताः। लभ् धातोः कर्मणि क्त प्रत्ययः(णिचि)।

**भावार्थः**- दुर्योधनः यथायोग्येषु पात्रेषु सामः, दानः, दण्डः भेदः च इति एतान् चतुरः उपायान् सम्यक् विभज्य प्रयोगं करोति। सम्यक् प्रयुक्ताः एते उपायाः परस्परं स्पर्धां कुर्वन्तः इव नैरन्तर्येण दुर्योधनस्य अर्थसम्पत्तिम् अभिवर्धयन्ति।

**सन्धिः**- फलन्त्युपायाः- फलन्ति +उपायः(यणसन्धिः),परिबृंहितायतीरुपेत्य -परिबृंहितायतीः+ उपेत्य (विसर्गसन्धिः)। अलङ्कारः - उत्प्रेक्षालङ्कारः।

**समासः**- विनियोगसत्क्रियाः - विनियोगः एव सत्क्रियाः (कर्मधारयः)। परिबृंहितायतीः -परिबृंहिता आयतिः यासु ताः परिबृंहितायत्यः, ताः (बहुव्रीहिः), अर्थसम्पदः - अर्थस्य सम्पदः (षष्ठीतत्पुरुषः)।

उपायलब्धाः अर्थसंपदः वर्णयति वनेचरः-

**अनेकराजन्यरथाश्वसङ्कुलं तदीयमास्थाननिकेतनाजिरम्।**
**नयत्ययुग्मच्छदगन्धिरार्द्रता भृशं नृपोपायनदन्तिनां मदः ॥16॥**

**अन्वयः**- नृपोपायनदन्तिनां अयुग्मच्छदगन्धिः मदः तदीयम् अनेकराजन्यरथाश्वसङ्कुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रता नयति।

दुर्योधनस्य ऐश्वर्यप्रभावम्

**सारांशः**- अनेन श्लोकेन राज्ञः दुर्योधनस्य महासमृद्धिं निरूप्यते। राज्ञः दुर्योधनस्य वशवर्तिनः(आयत्तीकृताः) ये राजानः करदानार्थं स्वस्वराज्यात् आगताः तेषां राज्ञां रथाश्वसमूहेन तस्य सभामण्डपाङ्गणं सदा व्याप्तमस्ति। तत् प्राङ्गणं नृपोपहारभूतगजानां सप्तपर्णपुष्पसुगन्धियुक्तेन

मदजलेन पङ्किलं भवति। अनेन प्रकारेण दुर्योधनस्य प्राङ्गणे सर्वदा पङ्कः वर्तते। अयं पङ्कः दुर्योधनस्य समृद्धिं सूचयति।

**भावार्थः-** किरातः दुर्योधनस्य सभायाः वर्णनं करोति- दुर्योधनस्य सभायाः प्राङ्गणं विभिन्नानां नृपाणां रथैः अश्वैः च परिपूर्णं भवति। तस्य सभाप्राङ्गणम् उपहारस्वरूपेण प्राप्तानां हस्तिनां गण्डजलेन(मदेन) आर्द्रं भवति। तत् च गण्डजलं सप्तपर्णपुष्पस्य गन्धसदृशं गन्धयुक्तम् अस्ति इति।

**अलङ्कारः** - उदात्तः। लक्षणं तु 'उदात्तमृद्धेश्लाघ्यम्' इति।

**सन्धिः** - नयत्ययुग्मच्छदगन्धिरार्द्रताम् - नयति + अयुग्मच्छदगन्धिः (यण्-सन्धिः) = नयत्ययुग्मच्छदगन्धिः + आर्द्रताम् (विसर्गसन्धिः)।

**समासः-** अनेकराजन्यरथाश्वसंकुलम् - न एके अनेके (नञ्तत्पुरुषः), अनेके च ते राजन्याः अनेकराजन्याः (कर्मधारयः)। रथाः च अश्वाः च रथाश्वम् (समाहारद्वन्द्वः), अनेकराजन्यानां रथाश्वम्, अनेकराजन्यरथाश्वम् (षष्ठीतत्पुरुषः)। आस्थाननिकेतनाजिरम् - आस्थानस्य निकेतनम् आस्थाननिकेतनम्, आस्थाननिकेतनस्य अजिरम्- आस्थाननिकेतनाजिरम्, तत् (षष्ठीतत्पुरुषः)। अयुग्मच्छदगन्धिः-न विद्यन्ते युग्मानि छदानि यस्य सः अयुग्मच्छदः (बहुव्रीहिः), अयुग्मच्छदस्य गन्धः इव गन्धः यस्य सः (बहुव्रीहिः)। नृपोपायनदन्तिनाम् - नृपाणाम् उपायनानि नृपोपायनानि (षष्ठीतत्पुरुषः), नृपोपायनानां दन्तिनः नृपोपायनदन्तिनः, तेषां (षष्ठीतत्पुरुषः)।

**व्याकरणकार्यम्-** अयुग्मच्छदगन्धिः इत्यत्र गन्धशब्दात् पूर्वं किञ्चन उपमानपदं वर्तते चेत्, अन्तिमः अकारस्य इकारादेशः स्यात्।

**जनक्षेमं वितन्वति दुर्योधने कुरुराज्यं समृद्धसस्यं चकास्ति-**

**सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।**
**वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ॥17॥**

**अन्वयः-** चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकाः कुरवः अकृष्टपच्या इव कृषीवलैः सुखेन लभ्याः सस्यसम्पदः दधतः(सन्तः) चकासति।

राज्ये सस्यसमृद्धिः वर्तते

**सारांशः-** प्रजापालनतत्परः दुर्योधनः अन्नवृद्ध्यर्थं राज्ये सर्वत्र कृत्रिमनदीप्रभृतीनां भूमिसेचनसाधनानां निर्माणं कारयति। एतेषां साधनानां साहाय्येन कुरुदेशः वर्षाजलं विनाऽपि प्रचुरान्नसम्पन्नः वर्तते। कृषिकर्म अतीव सुखसाध्यं लाभप्रदं च विद्यते। दुर्योधनस्य राज्ये ये कृषकाः सन्ति ते प्रयासेन विनैव स्वयं जातानीव सस्यानि लभन्ते। अनेन ते

समृद्धाः वर्तन्ते। अन्नप्राचुर्यात् प्रजासु सन्तोषः वर्तते। प्रजानुरञ्जनात् सः दुर्योधनः सुखेन न वश्यः इत्यर्थः।

**भावार्थः**- दुर्योधनः सर्वदा प्रजानां कल्याणाय प्रयत्नशीलः भवति। अतः सः नद्याः जलस्य कुल्या सर्वत्र कृषिक्षेत्रे प्रापणस्य व्यवस्थां कल्पितवान्। तेन तत्रत्याः कृषकाः कृषिनिमित्तं वृष्ट्याः प्रतीक्षाम् अकृत्वा एव कृषिकार्यं कुर्वन्ति। तत्र अल्पप्रयत्नेन एव अधिकं धान्यादिकं भवति। एवं रीत्या सम्पन्नाः कुरुप्रदेशाः सुशोभन्ते। कृषकाणां विषये दुर्योधनस्य हितचिन्तनं कथं भवति ? केन कारणेन कुरुप्रदेशाः सुशोभन्ते। चकासति शोभते। चकासति- चकास्-पर-लट्-प्रपु-ब-व।

**अलङ्कारः**- उत्प्रेक्षा। अत्र कुरुप्रदेशानां सस्यसम्पदः धारणस्य उत्प्रेक्षणात् उत्प्रेक्षालङ्कारः।

**सन्धिः**- कृषीवलैरकृष्टपच्याः - कृषीवलैः + अकृष्टपच्याः (विसर्गसन्धिः)। अदेवमातृकाश्चिराय - अदेवमातृकाः + चिराय। कुरवश्चकासति - कुरवः + चकासति।

**समासः**- अकृष्टपच्याः - न कृष्टपच्याः अकृष्टपच्याः, ताः (नञ्तत्पुरुषः)।

सस्यसम्पदः - सस्यानां सम्पदः सस्यसम्पदः, ताः (षष्ठीतत्पुरुषः)।

अदेवमातृकाः - देवः एव माता येषां ते देवमातृकाः (बहुव्रीहिः), न देवमातृका: अदेवमातृकाः (नञ्तत्परुषः)

**तस्य गुणैराकृष्टा वसुमती स्वयमेव वसूनि ददाति।**

**उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।**
**स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥18॥**

**अन्वयः**- उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी वसूनि स्वयं प्रदुग्धे।

दुर्योधनगुणैराकृष्टा भूमिः तस्मै धनानि ददाति

**सारांशः**- अस्मिन् श्लोके प्रजापालनतत्परः एवं सद्गुणसमन्वितः दुर्योधनः सततं स्वकीयराज्यस्य समुन्नतिं सम्पादयतीति प्रतिपादितम्। महायशस्वी एवं दयालुः सः दुर्योधनः निरन्तरं प्रजानां रक्षणेन स्वकीयराज्यस्य अभ्युदयं सम्पादयति। यथा केनचित् विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वत् कुबेरोपमस्य दुर्योधनस्य दयादाक्षिण्यादिभिः गुणैः प्रसन्ना सती पृथिवी स्वयमेव अस्मै धनानि प्रददाति। (दुर्योधनस्य राज्ये अर्थस्य लाभः कथं भवति।)

**भावार्थः**- महान् यशस्वी दयावान् च अयं दुर्योधनः सर्वतः रक्षणेन बाधारहितां समृद्धिं सम्पादयति। कुबेरसदृशस्य अस्य दुर्योधनस्य गुणैः द्रवीभूता पृथ्वी तस्य राज्ये स्वयमेव धनानि उत्पादयति। यथा केनचिच्चतुरेण प्रसूता गोर्नवतृणग्रासादिभिः पोषिता सती दोहकं

विलोक्य स्वयं हम्भारवं कृत्वा उपस्नुता भवति; तथैव दुर्योधनस्यालौकिकैर्गुणैर्मुदिता मही स्वयं धनानि जनयतीत्यर्थः।

**अलङ्कारः-** समासोक्तिः। लक्षणं तु 'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य' चेत्।

**सन्धिः-** उदारकीर्तेरुदयम् - उदारकीर्तेः + उदयम् (विसर्गसन्धिः)। दिशतोऽभिरक्षया - दिशतः + अभिरक्षया। प्रदुग्धेऽस्य - प्रदुग्धे + अस्य (पूर्वरूपसन्धिः)। गुणैरुपस्नुता - गुणैः + उपस्नुता (विसर्गसन्धिः)।

**समासः-** उदारकीर्तेः- उदारा कीर्तिः यस्य सः उदारकीर्तिः, तस्य (बहुव्रीहिः)। प्रशान्तबाधम्- प्रशान्ता बाधा यत्र सः प्रशान्तबाधः, तम् (बहुव्रीहिः)। वसूपमानस्य- वसुः उपमानं यस्य सः वसूपमानः, तस्य (बहुव्रीहिः)।
**क्रियौ-** प्रदुग्धे- प्र पूर्व दुह् प्रपूरणे- कर्मकर्तरि- आत्म-लट्-प्रपु-ए-व।

**युद्धे लब्धकीर्तयः वीराः धनुर्भृतः अस्य प्राणैरपि प्रियं कर्तुं इच्छन्ति-**

**महौजसो मानधना धनार्चिताः धनुर्भृतः संयति लब्धकीर्तयः।**
**न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥19॥**

**अन्वयः-** महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः न संहताः न भिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति।

वीरभटाः दुर्योधनस्य हितमेव इच्छन्ति।

**सारांशः-** अस्मिन् श्लोके दुर्योधनस्य वीरभटानां सद्गुणाः तेषां वीरभटानां बोधनं प्रति आनुकल्यं च निरूपितम्। दुर्योधनस्य वीरभटाः अतितेजस्विनः कुलशीलाद्यभिमानशालिनः दुर्योधनेन प्रभूतधनप्रदानेन सम्मानिताः समरे समर्जितयशसः च वर्तन्ते। धनुर्धारिणः ते स्वार्थसिद्ध्यर्थं न कदापि सङ्घटिताः, न च विरुद्धमतयः भवन्ति, अपि तु स्वस्वामिनः प्रयोजनस्य पूरकाः एव वर्तन्ते। सर्वे वीरभटाः स्वप्राणप्रदानेनापि स्वस्वामिनः दुर्योधनस्य प्रियकार्याणि कर्तुमिच्छन्ति।

**भावार्थः-** किरातः युधिष्ठिरं वदति - दुर्योधनस्य सैनिकाः महाबलशालिनः, स्वकुलस्य शीलस्य स्वाभिमानस्य च रक्षकाः, धनसम्पत्तिद्वारा सत्कृताः, युद्धभूमौ लब्धकीर्तयः, स्वार्थरहिताः राजनि द्रोहरहिताः च सन्ति। ते धनुर्धारिणः स्वप्राणान् दत्त्वा अपि अस्य दुर्योधनस्य प्रियं कर्तुं तत्पराः सन्ति। (दुर्योधनस्य राज्ये धनुर्धारिणः दुर्योधने कथं समर्पिताः सन्ति।)

**सन्धिः-** संहतास्तस्य - संहताः + तस्य (विसर्गसन्धिः)।
वाञ्छन्त्यसुभिः - वाञ्छन्ति + असुभिः(यणसन्धिः)।

**अलङ्कारः**- अत्र काव्यलिङ्गं परिकरः च इति द्वयोः अलङ्कारयोः मिश्रणम् अस्ति। अत्र असुभिः प्रियाणि समीहितुं वाञ्छन्ति इत्यस्य महौजसादिविशेषणगतहेतोः कथनात् काव्यलिङ्गम्। पुनः महौजसादीनि विशेषणानि साभिप्रायं प्रयुक्तानि। अतः परिकरः अलङ्कारः अपि अस्ति इत्यतः अत्र काव्यलिङ्गपरिकरयोः संसृष्टिः अस्ति।

**समासः**- महौजसः - महद् ओजः येषां ते (बहुव्रीहिः)।
मानधनाः - मानः एव धनं येषां ते (बहुव्रीहिः)।
धनार्चिताः - धनैः अर्चिताः (तृतीयातत्पुरुषः)।
लब्धकीर्तयः - लब्धाः कीर्तयः यैः, ते (बहुव्रीहिः)।
भिन्नवृत्तयः - भिन्नाः वृत्तयः येषां ते भिन्नवृत्तयः (बहुव्रीहिः)।

**फलानुमेयप्रारम्भः चरैः स्वपरराष्ट्रवृत्तान्तं वेति-**

**महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।**
**महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥20॥**

**अन्वयः**- अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। धातुः इव तस्य ईहितं महोदयैः हितानुबन्धुभिः फलैः प्रतीयते।

फलानुमेयाः दुर्योधनस्य क्रायाणि

**सारांशः**- स्वराष्ट्रवत् परराष्ट्रवृत्तान्तं अपि दुर्योधनः वेत्तीति निरूपितं अत्र। स्वराष्ट्रस्य सर्वाणि कार्याणि समाप्य सः दुर्योधनः शुद्धचरितैः गुप्तचरैः अन्येषां राष्ट्राणां सम्पूर्णवृत्तान्तं जानाति। किन्तु यथा परमेश्वरः किं कर्तुमिच्छति इति तस्य कार्यैः एव ज्ञायते तथैव दुर्योधनस्य मनसि स्थितः संकल्पः महावृद्धिभिः शुभपरिणामफलैः एव ज्ञायते। तस्य कार्यस्य ज्ञानं फलोदयात् पूर्वं न भवति। फलानुमेयाः तस्य प्रारम्भा इत्यर्थः।

**भावार्थः**- दुर्योधनः स्वचरितैः प्रशंसनीयैः हितचिन्तकैः च दूतैः अन्येषां नृपाणां सर्वविधाः योजनाः अवगच्छति। देवताः किम् इच्छन्ति इति यथा केवलं फलदर्शनेन एव ज्ञानं भवति तथैव दुर्योधनस्य योजनायाः ज्ञानम् अपि फलदर्शनमात्रेण एव भवति। अर्थात् दुर्योधनः किम् इच्छति स्म इति तु कार्यस्य समाप्तेः पश्चात् तेषां फलदर्शनेन भवति। यथेश्वरस्य केनाशयेन किं कर्म करोतीति पूर्वं कोऽपि न जानाति। तथैव दुर्योधनस्यापि चेष्टितं कार्यपरिणामं विलोक्यैव सर्वैर्ज्ञातं भवतीति भावः। (दुर्योधनः न केवलं स्वराष्ट्रविषये जानाति अपि तु सः अन्यराष्ट्रस्य विषयम् अपि जानाति। कथं जानाति?) अलङ्कारः - उपमा।

**सन्धिः**- सच्चरितैश्चरैः - सच्चरितैः + चरैः। महोदयैस्तस्य - महोदयैः + तस्य (विसर्गसन्धिः)। धातुरिवेहितम् - धातुः+ इव -धातुरिव, धातुरिव + ईहितम् (गुणसन्धिः)।

**समासः**- महीभृताम्- महीं बिभ्रति महीभृतः, तेषाम् (उपपदसमासः)। सच्चरितैः - सत् चरितं येषां ते सच्चरिताः, तैः (बहुव्रीहिः)। अशेषितक्रियः-

न शेषिता: अशेषिताः (नञ्तत्पुरुषः), अशेषिताः क्रियाः येन सः (बहुव्रीहिः)।

अन्यभूपालैरस्य शासनं शिरसि माल्यमिवोह्यते-

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥21॥

**अन्वयः-** तेन क्वचित् सज्यं धनुः न उद्यतम्। आननं वा कोपविजिह्मं न कृतम्। नराधिपैः गुणानुरागेण अस्य शासनं माल्यम् इव शिरोभिः उह्यते।

सर्वे राजानः दुर्योधनस्य शासनामङ्गीकुर्वन्ति

**सारांशः-** अस्मिन् श्लोके कौरवेशस्य दुर्योधनस्य प्रवृद्धः प्रभावः निरूपितः। अधुना कोऽपि नृपः दुर्योधनस्य प्रतिकूलं न आचरति। सर्वे नृपाः सम्मानपूर्वकं तस्य आदेशं पालयन्ति। यद्यपि दुर्योधनेन कस्मिंश्चित् अपि अपकारिणि आरोपितमौर्वीकं धनुर्न उत्थापितं, स्वकीयं मुखं च कदापि क्रोधेन विकृतं न कृतं तथापि सर्वे राजानः तस्य दुर्योधनस्य दयादाक्षिण्यादिगुणैः वशीकृतः तस्य आदेशं तथैव नतशिरोभिः पालयन्ति यथा सुरभिगुणलोभेन जनाः पुष्पमालां नतशिरोभिः धारयन्ति।

**भावार्थः-** सः दुर्योधनः कस्मिश्चिदपि राजनि प्रहारं कर्तुं कदाचिद् अपि धनुः ऊर्ध्वं न कृतवान्। न वा सः कस्मिन् अपि विषये स्वस्य मुखं क्रोधेन व्रकं कृतवान्। अतः दुर्योधनस्य गुणानाम् अनुरागकारणात् सर्वे अपि राजानः तस्य शासनं मालाम् इव मस्तके धरन्ति। (दुर्योधनस्य शासनव्यवस्था कथम् अस्ति?)

**अलङ्कारः** - अत्र पदार्थहेतुककाव्यलिङ्गमलङ्कारः अस्ति।

**सन्धिः-** शिरोभिरुह्यते - शिरोभिः + उह्यते (विसर्गसन्धिः)।
नराधिपैर्माल्यम् - नराधिपैः + माल्यम् (विसर्गसन्धिः)।
इवास्य - इव + अस्य (सवर्णदीर्घसन्धिः)।

**समासः-** सज्यम् – ज्याया सह वर्तते इति सज्यम् (सहपूर्वपदबहुव्रीहिः)। कोपविजिह्मम् - कोपेन विजिह्मम् (तृतीयातत्पुरुषः)। गुणानुरागेण - गुणस्य अनुरागः गुणानुरागः, तेन (षष्ठीतत्पुरुषः)। नराधिपैः - नराणाम् अधिपाः नराधिपाः, तैः (षष्ठीतत्पुरुषः)।

यागाद्यानुष्ठानेन धर्मं आर्जयति च-

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥22॥

**अन्वयः-** इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः(सन्) मखेषु हव्येन हिरण्यरेतसं धिनोति।

दुर्योधनः यागाद्यनुष्ठाने व्यापृता दृश्यते

**सारांशः**- अस्मिन् श्लोके दुर्योधनस्य धार्मिकत्वं निरूप्यते। अप्रतिहतादेशः सः दुर्योधनः अभिनवयौवनप्रगल्भं स्वानुजं दुःशासनं युवराजपदे नियुज्य स्वयं पुरोहितेन उपदिष्टः निरन्तरं यज्ञेषु हवनद्रव्येण अग्निं प्रीणयति। अतीव कुटिलः सः दुर्योधनः प्रजासु आत्मानं धार्मिकत्वेन प्रदर्शयितुं प्रयत्नशीलः अस्ति। दुर्योधनः धर्माचरणं करोति, पुरोहितानामाज्ञां पालयति, स्वानुजान् प्रति स्निह्यति इत्यादिरूपा तस्य प्रशंसा प्रजासु श्रूयते। सः दुर्योधनः सम्यक् रूपेण जानाति यत् धार्मिकस्य राज्ञः सर्वे जनाः साहाय्यं कुर्वन्ति। (दुर्योधनस्य धार्मिकत्वं निरूप्यते।)

**भावार्थः**- दूतः वदति यत् - दुर्योधनस्य आज्ञां सर्वेऽपि पालनं कुर्वन्ति। कोऽपि तस्य आज्ञायाः उल्लङ्घनं न करोति। दुर्योधनः नवयौवनेन उन्मत्तं स्वस्य अनुजं दुःशासनं युवराज्ये नियोजयति। पुनः सः पुरोहितस्य अनुमतिद्वारा आलस्यरहितः सन् यज्ञेषु हवनसामग्र्या यज्ञाग्निं तोषयति। न केवलमौहिकं लोकरञ्जनं क्रियते, अपि तु पारलौकिकोऽपि धर्मोऽनुष्ठीयते तेन। धर्मवतो राज्ञो राज्ये न हि जनाः क्लेशभागिनो भवन्तीति। (दुर्योधनः धर्माचरणं कथं करोति।)

**अलङ्कारः** – उपमा।

**सन्धिः** - मखेष्वखिन्नः - मखेषु + अखिन्नः (यण्सन्धिः)। अखिन्नोऽनुमतः - अखिन्नः + अनुमतः।

**समासः**- यौवराज्यम् - युवा चासौ राजा च युवराजः (कर्मधारयसमासः), युवराजस्य कर्म यौवराज्यम्। नवयौवनोद्धतम् - नवं च तद् यौवनं नवयौवनम् (कर्मधारयसमासः), नवयौवनेन उद्धतः नवयौवनोद्धतः तम् (तृतीयातत्पुरुषः)। इद्धशासनः - इद्धं शासनं यस्य सः (बहुव्रीहिसमासः)। अखिन्नः - न खिन्नः (नञ्तत्पुरुषसमासः)।

**इत्थमसामान्यबलयुतोऽपि सः युधिष्ठिराद्बिभेति-**

**प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।**
**स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥23॥**

**अन्वयः**- सः प्रलीनभूपालं स्थिरायति भुवो मण्डलं आवारिधि प्रशासत् अपि त्वत् एष्यतीः भियः चिन्तयति एव। अहो बलवद्विरोधिता दुरन्ताः।

प्रबलैः शत्रुभिः सह वैरं विनाशकरम्

**सारांशः**- यद्यपि अधुना शत्रुरहितः सः दुर्योधनः अद्वितीयः शासकः वर्तते। कोऽपि तस्य अनिष्टं कर्तुं न समर्थः। तथापि भवतः विपत्तीः आशङ्कमानः सः सुखेन स्थातुं न शक्नोति। सः चिन्तयति यत् भवान् वनात् प्रत्यागत्य तस्य द्यूतक्रीडया उपार्जितं राज्यं गृहीष्यति तस्य अनिष्टं च करिष्यति। अहो महदाश्चर्यं विद्यते बलवद्भिः सह शत्रुतां कृत्वा कोऽपि चिन्तारहितः

भवितुं न शक्नोति। एष्यतीः- इ धातोः शतृ(अत्) प्रत्यये -स्त्रीलिङ्गे-द्वि-ब-व।

**भावार्थः-** शत्रुरहितस्य समग्रभूमण्डलस्य शासनं कुर्वन् अपि सः दुर्योधनः युधिष्ठिरात् भयं करोति। अहो! सर्वसम्पन्नस्य राज्ञः अपि प्रबलैः शत्रुभिः सह वैरं विनाशकरं भवति।

**सूक्तिः-** "अहो दुरन्ता बलवद्विरोधिता।" प्रबलैः शत्रुभिः सह वैरं सर्वदा विनाशकरं भवति।

**सन्धिः-** प्रशासदावारिधि - प्रशासत् + आवारिधि (जश्त्वसन्धिः)। चिन्तयत्येव - चिन्तयति + एव (यणसन्धिः)। भियस्त्वदेष्यतीरहो- भियः + त्वदेष्यतीः + अहो (विसर्गसन्धिः)।

**अलङ्कारः-** अर्थान्तरन्यासः।

> सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
> यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥

अत्र अहो दुरन्ता बलवद्विरोधिता इति सामान्येन दुर्योधनद्वारा क्रियमाणस्य वैरस्य समर्थनात् अर्थान्तरन्यासः अलङ्कारः भवति।

**समासः-** प्रलीनभूपालम् - प्रकर्षेण लीनाः प्रलीनाः (उपपदसमासः)।, प्रलीनाः भूपालाः यस्मिन्, तत् (बहुव्रीहिः)। आवारिधि - आ वारिधिभ्यः आवारिधि (अव्ययीभावः) आवारिधि इतियत्र मर्यादार्थो आङ्। अतः पञ्चमी। दुरन्ता - दुःखेन अन्तः यस्याः सा (बहुव्रीहिः)। बलवद्विरोधिता- बलवद्भिः विरोधिता (तृतीयातत्पुरुषः)। स्थिरायति- स्थिरा आयतिः यस्य तत् (बहुव्रीहिः)।

**प्रसङ्गात् युधिष्ठिरनामग्रहणेऽपि सः नताननः व्यथते-** पूर्वस्मिन् श्लोके दुर्योधनः युधिष्ठिरात् भयं करोति इति उक्तम् आसीत्। दुर्योधनः भयं करोति इति किरातः कथं ज्ञातवान् इति अत्र उच्यते-

**कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।**
**तवाभिधानाद् व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः॥24॥**

**अन्वयः-** कथाप्रसंगेन जनैः उदाहृतात् तव अभिधानात् अनुस्मृताखण्डलसूनुविक्रमः सः दुःसहात् मन्त्रपदात् उरगः इव नताननः (सन्) व्यथते।

दुर्योधनः अर्जुनस्य पराक्रमं स्मृत्वा व्यथते

**सारांशः-** 'युधिष्ठिरः वनात् प्रतिनिवृत्तः स्वकीयं राज्यं ग्रहीष्यति दुर्योधनस्य अनिष्टं च करिष्यति' इति मनसि विचिन्तयन् दुर्योधनो महत् भयं अनुभवति। 'गूढाकारेङ्गितस्य तस्य दुर्योधनस्य भयं त्वया कथं ज्ञातम्' इति प्रश्नस्य उत्तरं ददाति गुप्तचरोऽस्मिन् श्लोके। यथा विषवैद्येन

उच्चारितं तार्क्ष्यवासुकिनामसमन्वितं सोढुं अशक्यं मन्त्रपदं श्रुत्वा स्मृतगरुडपादप्रहारः सर्पः भयाकुलः सन् स्वकीयफणां नतीकृत्य दुःखायते तथा परस्परालापप्रसङ्गे तत्रत्यैः जनैः उच्चारिते दुःसहनीयं तव (भवतः) नामधेयं श्रुत्वा स्मृतार्जुनपराक्रमः दुर्योधनः स्वपराजयाशङ्कया अवनतमुखः सन् दुःखायते। दुर्योधनस्य मुखाकृत्या मया ज्ञातं यत् सः पराजयाशङ्कया महद् भयमनुभवति। अत्युत्कटभयदोषादिविकारा दुर्वाराः। मुखाकृतिं दृष्ट्वैव हृदयस्था भावाः ज्ञातुं शक्यन्ते। (दुर्योधनः अर्जुनस्य पराक्रमं स्मृत्वा अत्यन्तं व्यथितः भवति)

**भावार्थः**- कदाचित् चर्चायां प्रसङ्गवशात् यदा युधिष्ठिरस्य नाम आयाति, तदा सः दुर्योधनः अर्जुनस्य पराक्रमं स्मरति। यथा सर्पः अतिदुःसहं गरुडादियुक्तं मन्त्रपदं श्रुत्वा व्यथितः भवति तथैव सः दुर्योधनः अपि अर्जुनस्य पराक्रमं स्मृत्वा अत्यन्तं व्यथते।

**सन्धिः**- जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः- जनैः + उदाहृतात् (विसर्गसन्धिः), जनैरुदाहृतात् + अनुस्मृताखण्डलसूनुविक्रमः (जश्त्वसन्धिः)। तवाभिधानात्- तव + अभिधानात् (सवर्णदीर्घसन्धिः)। स दुःसहान्मन्त्रपदादिवोरगः- सः + दुःसहात् (विसर्गसन्धिः), स दुःसहात् + मन्त्रपदात् (अनुनासिकसन्धिः), मन्त्रपदात् + इव (जश्त्वसन्धिः), मन्त्रपदादिव + उरगः (गुणसन्धिः)।

**अलङ्कारः** – उपम।

**समासः**- कथाप्रसङ्गेन- कथानां प्रसङ्गः कथाप्रसङ्गः, तेन (षष्ठीतत्पुरुषः)। अनुस्मृताखण्डलसूनुविक्रमः- आखण्डलस्य सूनुः आखण्डलसूनुः, आखण्डलसूनोः विक्रमः आखण्डलसूनुविक्रमः (षष्ठीतत्पुरुषः) अनुस्मृतः आखण्डलसूनुविक्रमः येन सः (बहुव्रीहिः)। नताननः- नतम् आननं यस्य सः (बहुव्रीहिः)। उरगः- उरसा गच्छति इति (उपपदतत्पुरुषः)।

## Summarised Overview

दुर्योधनस्य दण्डनीतिप्रयोगः निरूपितः। दुर्योधनः दण्डदानेन सः अधर्मं निवारयति। जितेन्द्रियः दुर्योधनः आत्मीयेभ्यः शत्रुभ्यः च समानरूपेण स्मृत्यादिषु कथितेन दण्डदानेन अधर्मं निवारयति। भयात् शङ्कितः सः दुर्योधनः सर्वत्र देशे आत्मीयजनान् एव रक्षकान् नियोजितवान्। आशङ्कितः अपि दुर्योधनः आत्मानं सर्वविश्वस्तम् इव प्रदर्शयति। दुर्योधनस्य सामादीनां प्रयोगस्य लाभः कथ्यते। साम-दाम-भेद-दण्डाख्याः उपायाः निरन्तरम् उत्तरोत्तरवर्धमानाम् अर्थसम्पत्तिं वर्धयन्ति। दुर्योधनस्य सभाभवनस्य प्राङ्गणम् अन्यैः राजभिः उपहाररूपेण प्रदत्तानां हस्तिनां मदेन अर्थात् गण्डजलेन आर्द्रं भवति। अल्पप्रयत्नेन लब्धुं शक्यां धान्यसमृद्धिं धारयन्तः कुरुप्रदेशाः शोभन्ते। कुरुप्रदेशेषु दुर्योधनः कृषकाणां कृते नद्याः जलं कुल्यामाध्यमेन कृषिक्षेत्रं प्रापयति। दुर्योधनः महान् यशस्वी दयावान् च अस्ति। दुर्योधनस्य भटाः कुबेरस्य सदृशाः सन्ति। महाबलशालिनः, स्वकुलस्य स्वाभिमानस्य रक्षकाः, धनसम्पत्तिद्वारा सत्कृताः, युद्धभूमौ लब्धकीर्तयः, स्वार्थरहिताः द्रोहरहिताः च धनुर्धारिणः स्वप्राणान् अपि दत्त्वा दुर्योधनस्य प्रियं कर्तुम् इच्छन्ति। दुर्योधनस्य कार्ययोजना देवानाम् इव भवति। दुर्योधनस्य दया दाक्षिण्यादिगुणानां कारणेन अन्ये राजानः तस्य शासनं मालाम् इव मस्तके धारयन्ति। दुर्योधनः दुःशासनं युवराजपदे नियोज्य आलस्यरहितः भूत्वा पुरोहितस्य आज्ञया यज्ञाग्निं तोषयति। शत्रुरहिते समग्रभूमण्डले शासनं कुर्वन् अपि दुर्योधनः युधिष्ठिरात् भयं करोति। दुर्योधनः चर्चाप्रसङ्गे आगतं युधिष्ठिरस्य नाम श्रुत्वा अर्जुनस्य पराक्रमं स्मृत्वा पीडाम् अनुभवति।

# Assignments

**श्लोकान् व्याख्यात**

1. विधाय रक्षान्परितः परेतरान् अशङ्किताकारमुपैति शङ्कितः।
   क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः॥
2. अनारतं तेन पदेषु लम्भिताः विभज्य सम्यग्विनियोगसत्क्रियाः ।
   फलन्त्युपायाः परिबृंहितापतीरुपेत्य संघर्षमिवार्थसम्पदः॥
3. प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
   स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता॥
4. कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
   तवाभिधानाद् व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः॥

**आशयं विशदयत ।**

1. “अहो दुरन्ता बलवद्विरोधिता ।”

**व्याकरणविशेषं लिखत ।**

1. अयुग्मच्छदगन्धिः।

**अलङ्कारविशेषं प्रतिपादयत ।**

1. विधाय रक्षान्परितः परेतरान् अशङ्किताकारमुपैति शङ्कितः।
   क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥
2. सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
   वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ॥
3. प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
   स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥
4. महौजसो मानधना धनार्चिताः धनुर्भृतः संयति लब्धकीर्तयः।
   न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥
5. प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
   स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥

**निबन्धं रचयत ।**

1. युधिष्ठिरां प्रति वनेचरस्य उक्तिं संक्षिप्य लिखत।

# Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed), Sahitya Academy, Trissur
3. The Kiratarjuniya of Bharavi, Ed.by mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh, Tukaram Javaji, Nirnayasagar Press, Bombay1907
4. Sri Gurunathavidyanithi, Kiratarjuniya, Rudra Printing Works, Culcutta


# References

1. आचार्य श्रीरामचन्द्रमिश्रकः, संसकृतसाहित्येतिहासः, Printed & published - 1985, चौखम्बा विद्याभवन्, वारणासि।
2. अभिराज डा.राजेन्द्र मिश्र,किर्तार्जुनीयम् (प्रथमसर्गः), अक्षयवट प्रकाशन्, इलह्बाद्
3. Sri Bharavi's Kiratharjuneeyam, Canto 1, T.K.Ramachardra Aiyer, R.S.Vadhyar and Sons, Kalpathi Palakkad 2008


## Space for Learner Engagement for Objective Questions

**Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.**

UNIT 3

# प्रथमसर्गे 25-35 श्लोकाः

(द्रौपद्याः वचांसि, पाण्डवानां दुरवस्था च)

## Learning Outcomes

- किरातार्जुनीयम् महाकाव्यमधिकृत्य उद्बोधनम्।
- इतरमहाकाव्यानि अपेक्ष्य किरातार्जुनीयस्य वैशिष्ट्यम्।
- वनेचरोक्तिमाकर्ण्य द्रौपद्याः चिन्तां गृह्णाति।
- भरणादिकारिषु अवश्यं वर्तितव्यान् गुणान् अधिकृत्य उद्बोधनम्।

## Background

दुर्योधनः आत्मीयेभ्यः शत्रुभ्यः च समानरूपेण स्मृत्यादिषु कथितेन दण्डदानेन अधर्मं निवारयति। धनलोभकारणेन क्रोधकारणेन च दण्डं न प्रयच्छति। सामादीनां चतुरुपायानां प्रयोगं सम्यक् विभज्य यथोचितपात्रेषु करोति। अल्पप्रयत्नेन लब्धुं शक्यां धान्यसमृद्धिं धारयन्तः कुरुप्रदेशाः शोभन्ते। दुर्योधनः न केवलं स्वराष्ट्रविषयं जानाति अपि तु सः अन्यराष्ट्रस्य विषयं चारमुखेन जानाति। दुर्योधनस्य शासनव्यवस्था कथम् अस्ति, दुर्योधनः धर्माचरणं कथं करोति, सर्वसम्पन्नः अपि दुर्योधनः युधिष्ठिरात् भयं करोति ,इत्यादीनि वनेचरः दुर्योधनं कथयित्वा ततः गच्छति। अनन्तरं युधिष्ठिरः वनेचरेण कथितं सर्वं विषयम् अनुजान् द्रौपदीं च श्रावयति। अस्मिन् एकके द्रौपदी भीमस्य दुःखस्य प्रदर्शनेन युधिष्ठिरस्य क्रोधस्य उद्दीपनं करोति। स्त्रीणां चित्तेषु भयाशङ्काः ताः क्रूरवचांसि वक्तुं प्रेरयति। पुरातनकाले समूहे स्त्रीणां स्थानं कीदृशमासीदिति ज्ञातुमयं भागः उपकरोति। तस्मादमुं पाठभागं प्रविश्यामः।

## Keywords

युधिष्ठिरः कृष्णागृहं प्रवेशयति, सर्वं विषयम् अनुजान् द्रौपदीं च श्रावयति, क्रोधजनकम् उद्यमजनकं च वचनं, मतङ्गजेन स्रगिव, राज्यलक्ष्मी प्राप्त्युपायः, द्रौपदी प्रतीकाराय युधिष्ठिरस्य कोपं उद्भावयति।

# Discussion

## दुर्योधने यत् कर्तव्यं तत् शिघ्रमेव विधातव्यम् इति वनेचरस्योक्तिः।

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥25॥

**अन्वयः-** तत् त्वयि जिह्मं कर्तुम् उद्यते तत्र विधेयम् उत्तरम् आशु विधीयताम्। परप्रणीतानि वचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु।

किं कर्तव्यमिति भवान् चिन्तयतु इति वनेचरः वदति

**सारांशः-** स्वकीयसंदेशस्य अन्ते किरातः कथयति-अतीव कुटिलः सः कौरवेश्वरः दुर्योधनः कपटमाश्रित्य त्वां हन्तुं इच्छति। अतः तस्मिन् दुर्योधने करणीयः प्रतीकारः शीघ्रं क्रियताम्। ननु कर्तव्यमपि त्वयेवोच्यतामिति चेत्तत्राह परोक्तवचनसंग्राहकाणां अस्मद्विधानां वार्ताहारिणां गुप्तचराणां वचनानि तु केवलं समाचारज्ञापकान्येव भवन्ति। वार्तामात्रवादिनः वयं, न तु कर्तव्योपदेशसमर्थाः। अधुना किं कर्तव्यं कथं च कर्तव्यमिति वक्तुं न वयं समर्थाः। अतः भवता सुविचार्य समुचितं कर्म करणीयम्। (दूतः युधिष्ठिरेण दुर्योधनाय यत् प्रत्युत्तरं देयं तत् शीघ्रं दानाय निवेदयति)

**भावार्थः-** दूतः युधिष्ठिरं वदति यत् - तत्र दुर्योधनः भवता सह कपटं कर्तुम् उद्यतः अस्ति । अतः भवता यत् प्रत्युत्तरं दातव्यं तत् शीघ्रं दीयताम्। अस्मत्सदृशाः दूताः तु केवलम् अन्यैः कथिताः वार्त्ताः आनेतुम् एव समर्थाः, न तु 'अनेन प्रकारेण करोतु' इति उपदेशं दातुं समर्थाः। अतः यत् करणीयं तत् स्वयं निर्णीय शीघ्रं क्रियताम् इति।

**अलङ्कारः** - अर्थान्तरन्यासः।

**समासः-** परप्रणीतानि - परैः प्रणीतानि (तृतीयातत्पुरुषः)। प्रवृत्तिसाराः प्रवृत्तिः एव सारः यासां ताः (बहुव्रीहिः)

**क्रिया-** विधीयताम्- वि+धा-कर्मणि-लोट्-प्रपु-ए-व।

**वनेचरोक्तं कृष्णामनुजांश्च बोधयति युधिष्ठिरः-** दूतः दुर्योधनस्य राज्यस्य विषये सर्वं कथयित्वा ततः गच्छति। युधिष्ठिरः दूतेन कथितं सर्वं विषयं सर्वान् श्रावयति -

**इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम्।**
**प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥26॥**

**अन्वयः-** वनसन्निवासिनां पत्यौ इति गिरम् ईरयित्वा आत्तसत्क्रिये गते (सति)अथ महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधो तत् वचः आचचक्षे।

अनुजानां द्रौपद्याः च पुरतः वनेचरवचनं युधिष्ठिरः कथितवान्

**सारांशः-** वनेचराणां अधिपः सः गुप्तचरः किरातः दुर्योधनस्य सम्पूर्णवृत्तान्तं उक्त्वा युधिष्ठिरात् समुचितं पुरस्कारं च गृहीत्वा स्वगृहं गतः। तदनन्तरं राजा युधिष्ठिरः द्रौपदीभवनं प्रविश्य भीमादीनां समक्षं वनेचरेणोक्तं तत् सर्व वृत्तान्तं अकथयत्। (राजा युधिष्ठिरः द्रौपद्याः भवनं प्रविश्य भीमादीनां भ्रातृणां पुरतः तत् सर्व वृत्तान्तं अकथयत्।)

**भावार्थः-** किरातः दुर्योधनस्य विषये सर्वं वृत्तान्तं युधिष्ठिरं कथितवान्। सर्वं श्रुत्वा युधिष्ठिरः किराताय पारितोषिकं दत्त्वा सम्मानम् अकरोत्। सत्कारानन्तरं किरातः ततः गच्छति। अनन्तरं युधिष्ठिरः द्रौपद्याः भवनं प्रविशति। तत्र युधिष्ठिरः वनेचरेण कथितं सर्वं विषयम् अनुजान् द्रौपदीं च श्रावयति । (गुप्तचरः दुर्योधनस्य सम्पूर्णवृत्तान्तं उक्त्वा युधिष्ठिरात् समुचितं पुरस्कारं च गृहीत्वा स्वगृहं गतः।)

**सन्धिः-** ईरयित्वा- ईर + क्त्वान्तम्। ईरयित्वा- उक्त्वा। इतीरयित्वा - इति + ईरयित्वा (सवर्णदीर्घसन्धिः)। गतेऽथ - गते + अथ (पूर्वरूपसन्धिः) तदाचचक्षेऽनुजसन्निधौ - तत् + आचचक्षे (जश्त्वसन्धिः), आचचक्षे + अनुजसन्निधौ (पूर्वरूपसन्धिः)।

**समासः-** आत्तसत्क्रिये - आत्ता सत्क्रिया येन सः आत्तसत्क्रियः, तस्मिन् (बहुव्रीहिः)। वनसन्निवासिनाम् वने सन्निवसन्ति तच्छीलाः वनसन्निवासिनः, तेषाम् (उपपदतत्पुरुषः)। कृष्णासदनम् - कृष्णायाः सदनं कृष्णासदनम्। (षष्ठीतत्पुरुषः)। महीभुजा - महीं भुनक्ति इति महीभुक्, तेन। अनुजसन्निधौ - अनुजस्य सन्निधिः अनुजसन्निधिः, तस्मिन् (षष्ठीतत्पुरुषः)।

**द्विषतां सिद्धिं श्रुत्वा विकारान् नियन्तुमक्षमा जगाद कृष्णा-**

**निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा |**
**नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥27॥**

**अन्वयः**- ततः द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा (सती)नृपस्य मन्युव्यवसायदीपिनी :गिरः उदाजहार।

द्रौपदी युधिष्ठिरस्य क्रोधस्य उद्दीपनं यथा स्यात् तथा वक्तुं प्रारभते

**सारांशः**- युधिष्ठिरमुखात् शत्रूणां समृद्धिं श्रुत्वा द्रौपदी अतीव क्रुद्धा जाता। द्विषद्भ्यः आगतान् अपमानजन्यविकारान् निरोद्धुमसमर्था सा नृपस्य युधिष्ठिरस्य क्रोधोद्योगसंवर्धिनी वाणी कथितवती येन सः शत्रूणां विनाशाय प्रयतेत। (दुर्योधनस्य राज्यस्य वृद्धिं श्रुत्वा द्रौपदी युधिष्ठिरस्य क्रोधस्य उद्दीपनं यथा स्यात् तथा वक्तुं प्रारभते।)

**भावार्थः**- युधिष्ठिरः किरातेन कथितं सर्वं विषयं द्रौपदीं सर्वान् अनुजान् च श्रावितवान्, ततः तत्रत्यां दुर्योधनस्य राज्यस्य वृद्धिं श्रुत्वा द्रौपदी द्यूतसभायां दुःशासनादिभिः कृतान् वस्त्रहरणं रूक्षभाषणादीन् अपकारान् स्मरति। पुनः सा आत्मानः प्रतिकारं कर्तुम् अक्षमा इति चिन्तयति। अतः सा द्रौपदी युधिष्ठिरं क्रोधजनकम् उद्यमजनकं च वचनं कथयति। (यथा प्रकृत्या शान्तचित्तस्य युधिष्ठिरस्य हृदये शत्रुप्रतीकारकरणार्थं बुद्धिस्तेजिता भवति, तथा जगादेत्यर्थः।)

**सन्धिः**– अपाकृतीस्ततस्ततस्त्याः- अपाकृतीः + ततः + ततस्त्याः (विसर्गसन्धिः)। मन्युव्यवसायदीपिनीरुदाजहार - मन्युव्यवसायदीपिनीः + उदाजहार (विसर्गसन्धिः)। अलङ्कारः - पदार्थहेतुककाव्यलिङ्गम् ।

**समासः**- अक्षमा - न क्षमा (नञ्तत्पुरुषः)। मन्युव्यवसायदीपिनीः - मन्युः च व्यवसायः च मन्युव्यवसायौ (इतरेतरद्वन्द्वः) मन्युव्यवसायौ दीपयन्ति तच्छीलाः मन्युव्यवसायदीपिन्यः, (उपपदतत्पुरुषः)। द्रुपदात्मजा- द्रुपदस्य आत्मजा (षष्ठीतत्पुरुषः)।

**वक्तुं अनुचिदमपि दुराधयः वक्तुं प्रेरयन्ति-**

**भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।**
**तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥28॥**

**अन्वयः**- भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेप इव भवति। तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति।

द्रौपदी युधिष्ठिराय स्वस्याः दुरवस्थां निवेदयति

**सारांशः**- हे युधिष्ठिर! अहं मन्ये यत् भवद्विधेषु विज्ञेषु स्त्रीजनोक्तं उपदेशवचनं अपमानमेव भवति। अतः न युक्तं वक्तुम्। वक्तुं अनुचितत्वेऽपि अहं किञ्चिद्वदिष्याम्येव। शत्रूणां समृद्धिं श्रुत्वा मम मनसि याः तीव्राः व्यथाः जाताः ताः मम नारीजनसुलभां शालीनतां विनाशयन्ति मां वक्तुं च

प्रेरयन्ति। न किञ्चिदयुक्तं दुःखिनामिति भावः। (द्रौपदी युधिष्ठिरं स्वपरिस्थितिम् अवगमयति।)

**भावार्थः-** द्रौपदी युधिष्ठिरं कथयति यत् - यद्यपि भवत्सदृशानां पण्डितानां कृते स्त्रीभिः कृतः अनुशासनस्य उपदेशः भवतां तिरस्कारः इव भवति, तथापि नारीणां शीलयुक्तं व्यवहारं त्यजन्त्यः मम दुःसहाः मनोव्यथाः मां वक्तुं प्रेरयन्ति। (व्यवसाययन्ति - प्रेरयन्ति, न त्वहं प्रकृत्या अपितु भवत्कर्तृ कद्यूतपरित्यक्तस्त्रीसमुचितशालीनतया अगत्या वदामीति भावः।)

**सन्धिः-** भवत्यधिक्षेप इवानुशासनम् - भवति + अधिक्षेपः, इव + अनुशासनम् (सवर्णदीर्घसन्धिः)। तथापि- तथा + अपि (सवर्णदीर्घसन्धिः)।

**समासः-** प्रमदाजनोदितम्- प्रमदा जनः प्रमदाजनः (कर्मधारयः), प्रमदाजनैः उदितम् (तृतीयातत्पुरुषः)। निरस्तनारीसमयाः- नारीणां समयाः नारीसमयाः (षष्ठीतत्पुरुषः), निरस्ताः नारीसमयाः यैः, ते (बहुव्रीहिः)। दुराधयः - दुःसहाः आधयः (प्रादितत्पुरुषः)।

**प्रथमं तावत् युधिष्ठिरप्रभादादेव राज्यभ्रंशः इत्याह-**

**अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।**
**त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥29॥**

**अन्वयः-** आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डं धृता मही त्वया मदच्युता मतङ्गजेन स्रक् इव आत्महतेन अपवर्जिता।

पूर्विकैः आर्जिता पृथिवी त्वयैव परित्यक्ता

**सारांशः-** हे युधिष्ठिर! इन्द्रसदृशपराक्रमशालिनः भवतः पूर्वजाः राजानः भरतादयः इमां पृथिवीं समग्ररूपेण बहुकालपर्यन्तं भुक्तवन्तः(रक्षितवन्तः)। निजकुलोत्पन्नैः पूर्वजैः रक्षिता (भुक्त) एषा पृथिवी भवता प्राणपणेनापि रक्षणीया। किन्तु भवता तु पृथिव्याः रक्षा न कृता। यथा मदमत्तः गजः स्वशिरसि धृतां पुष्पमालां स्वकीयनैव शुण्डेन अधः क्षिपति तथैव भवतापि पूर्वपुरुषैः प्राप्ता एषा पृथिवी स्वकीयेन चापलेन परित्यक्ता। अहो विस्मयकरी भवतः मूढता। भवतः प्रमादजनितेव एषा विपत्तिः न दैवकृता इति द्रौपद्याः अभिप्रायः।

**भावार्थः-** द्रौपदी युधिष्ठिरं वदति- भवतां कुले उत्पन्नैः इन्द्रतुल्यपराक्रमैः भरतादिनृपैः अस्याः पृथिव्याः चिरकालं यावत् अखण्डं पालनं कृतम् आसीत्। किन्तु यथा मदोन्मत्तः गजः स्वकण्ठे विद्यामानां मालां नाशयति तथैव भवान् अपि एतां पृथिवीं स्वचापल्येन त्यक्तवान्।(युधिष्ठरस्य कारणेन एव राज्यलक्ष्मीः गता इति द्रौपदी युधिष्ठिरं स्मारयति)।

**सन्धिः–** आखण्डलतुल्यधामभिश्चिरम्- आखण्डलतुल्यधामभिः + चिरम् (श्चुत्वसन्धिः)। त्वयात्महस्तेन - त्वया + आत्महस्तेन (सवर्णदीर्घसन्धिः)। स्रगिवापवर्जिता – स्रक् + इव + अपवर्जिता। अलङ्कारः- उपमालङ्कारः अस्ति।

**समासः-** अखण्डम् - नखण्डम् (नञ्तत्पुरुषः), आखण्डलतुल्यधामभिः- आखण्डलेन तुल्यम् आखण्डलतुल्यम् (तृतीयातत्पुरुषः), आखण्डलतुल्यं धाम येषां ते आखण्डलतुल्यधामानः, तैः (बहुव्रीहिः)। भूपतिभिः- भुवां पतयः भूपतयः, तैः (षष्ठीतत्पुरुषः)। स्ववंशजैः- स्वस्य वंशः स्ववंशः (षष्ठीतत्पुरुषः) स्ववंशे जाताः इति स्ववंशजाः, तैः। आत्महस्तेन- आत्मनः हस्तः आत्महस्तः, तेन (षष्ठीतत्पुरुषः)। मदच्युता - मदं च्योतति इति मदच्युत्, तेन।

### ये शठेषु न शठास्ते मूढाः परिभूयन्ते-

**व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥30॥**

**अन्वयः-** ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति। शठाः तथाविधान् असंवृताङ्गान् निशिताः इषवः इव प्रविश्य घ्नन्ति हि।

कपटेषु कापट्यं प्रकटितव्यम्

**सारांशः-** शठे शाठ्यं समाचरेद् इति प्रतिपादितमस्मिन् श्लोके। ये जनाः कपाटयुक्तेषु कपटं न कुर्वन्ति ते मूर्खाः सर्वदा पराजयं प्राप्नुवन्ति। यथा तीक्ष्णाः वाणाः कवचादिभिः अनाच्छादिताङ्गानां पुरुषाणां शरीरं प्रविश्य तान् विनाशयन्ति, तथा कपटयुक्ताः जनाः सज्जनानां मनसि आत्मनः विश्वासमुत्पाद्य आत्मीयाः भूत्वा तान् सज्जनान् विनाशयन्ति। अत एव हि शठेन दुर्योधनेन सह शाठ्यस्य व्यवहारः एव करणीयः इति द्रुपदात्मजायाः कथनस्याभिप्रायः।

**सूक्तिः** - 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः'

**भावार्थः-** ये जनाः कुटिलजनैः सह कुटिलतापूर्णं व्यवहारं न कुर्वन्ति ते कदापि जयं न प्राप्नुवन्ति। यथा तीक्ष्णाः बाणाः कवचादिना अनाच्छादितम् अङ्गं प्रविश्य तं जनं नाशयन्ति, तथैव तादृशाः अपकारिणः जनाः अपि छद्मरहितं जनं नाशयन्ति। अतः भवता मायाविषु कौरवादिषु मायावता एव भवितव्यम्। (द्रौपदी युधिष्ठिरेण कथं भवितव्यम् इति वदति - ये छद्मपरेषु जनेषु छद्मपराः न भवन्ति। तादृशाः मन्दमतयः जनाः पराजयं प्राप्नुवन्ति। अर्थात् शठे शाठ्यं समाचरेत्।)

**सन्धिः**– शठास्तथाविधान्- शठाः + तथाविधान् (विसर्गसन्धिः)।
निशिता इवेषवः- निशिताः + इव + इषवः (गुणसन्धिः)।
**अलङ्कारः**- अर्थान्तरन्यासः।

**समासः**- मूढधियः - मूढा धीः येषां ते (बहुव्रीहिः)। असंवृताङ्गान् - न संवृतम् असंवृतम् (नञ्तत्पुरुषः), असंवृतम् अङ्गं येषां ते असंवृताङ्गाः, तान् (बहुव्रीहिः)।

न दैवात् किन्तु स्वस्यैव उपेक्षया राज्यं परहस्तगतमित्याह-

**गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।**
**परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥31॥**

**अन्वयः**- अनुरक्तसाधनः कुलाभिमानी त्वत् अन्यः कः इव नराधिपः गुणानुरक्तां कुलजां मनोरमाम् आत्मवधूम् इव )गुणानुरक्ता कुलजा मनोरमा (श्रियं परैः अपहारयेत्।

भवन्तं विना कः मनोरमां कुलवधूं भार्यामिव वर्तमानं राज्यलक्ष्मीमुपेक्ष्यते

**सारांशः**- अस्मिन् श्लोके पत्न्या सह राजलक्ष्म्याः तुलना कृता। अत्र द्रौपदी कथयति-लोके यथा भार्यायाः परैः अपहरणं गर्हितं अकीर्तिकरं च भवति तथैव राज्ञां कृते स्वराजलक्ष्याः परैः अपहरणमपि गर्हितं अकीर्तिकरं प्रतिष्ठाविनाशकं च भवति। अनुकूलसहायवान् कुलीनत्वाभिमानी च भवदन्यः को गुणमुग्धां(शौर्यसौन्दर्यादिभिः गुणैः अनुरागिणीं) कुलीनां (सत्कुलोत्पन्नां) मनोहारिणीं निजभार्यामिव राजलक्ष्मीं परैः अपहारयेत्। भवता तु स्वपत्नी राजलक्ष्मीः च उभे परैः अपहारिते। अहो विस्मयकरी ते मूढता।

**भावार्थः**- द्रौपदी आश्चर्येण युधिष्ठिरं वदति - रथादिसमुचितसाधनैः सम्पन्नः स्वस्य कुलीनत्वस्य अभिमानी भवादृशः अन्यः राजा कः स्यात्। यः शौर्यादिगुणैः अनुरक्तायाः, वंशपरम्परया प्राप्तायाः, मनोहारिण्याः स्वभार्यासदृश्याः च राज्यलक्ष्म्याः स्वयमेव शत्रुद्वारा अपहरणं कारयेत्।

**सन्धिः**– परैस्त्वदन्यः - परैः + त्वत् + अन्यः। क इवापहारयेन्मनोरमाम् - कः + इव + अपहारयेत् + मनोरमाम् (अनुनासिकसन्धिः)।

**अलङ्कारः** - मालोपमा। तस्य लक्षणम् – 'मालोपमा यदेकस्योपमानं बहु दृश्यते'। अर्थात् यत्र एकस्य उपमेयस्य बहूनि उपमानानि वर्ण्यन्ते तत्र मालोपमा अलङ्कारः भवति। अस्मिन् श्लोके श्रीः इति उपमेयस्य गुणानुरक्ता, कुलजा, मनोरमा, आत्मवधूः इत्यादीनि उपमानानि सन्ति, अतः मालोपमा अलङ्कारः अस्ति।

**समासः-** गुणानुरक्ताम्- गुणैः अनुरक्ता गुणानुरक्ता, ताम् (तृतीयातत्पुरुषः)। अनुरक्तसाधनः- अनुरक्तं साधनं यस्य सः (बहुव्रीहिः)। कुलाभिमानी- कुलस्य अभिमानं कुलाभिमानम् (षष्ठीतत्पुरुषः), कुलाभिमानम् अस्य अस्मिन् वा अस्ति इति कुलाभिमानी (कुलाभिमानिन्- तद्धितान्तम्)। कुलजाम् - कुले जाता इति कुलजा, ताम्। नराधिपः- नराणाम् अधिपः(षष्ठीतत्पुरुषः)। त्वदन्यः- त्वत्तः अन्यः (पञ्चमीतत्पुरुषः)। आत्मवधूम्- आत्मनः वधूः आत्मवधूः, ताम् (षष्ठीतत्पुरुषः)।

**अथ दशभिः क्रोधोद्दीपनं करोति। इदानीमपि मनस्विगर्हिते मार्गे वर्तमानं त्वां कथं क्रोधः नोद्दीपयति?**

अस्मात् श्लोकात् आरभ्य ४२ श्लोकं यावत् द्रौपदी युधिष्ठिरस्य कोपम् उद्दीपयति

**भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।**
**कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥32॥**

**अन्वयः-** हे नरद! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानं भवन्तं उदीरितः मन्युः शुष्कं शमीतरुं उच्छिखः अग्निः इव कथं न ज्वलयति?

द्रौपदी युधिष्ठिरस्य कोपमुद्दीपयति

**सारांशः-** शत्रुकृतेन अपमानेन व्यथिता दुर्दशामापन्ना च द्रौपदी प्रतीकाराय युधिष्ठिरस्य कोपं उद्भावयति। हे नरेन्द्र !अस्मिन् आपत्काले यां शत्रुकृतां दशां भवान् सपरिवारः सम्प्राप्तः तां शूरजनाः निन्दन्ति। इमां दशामनुभवन्तं भवन्तं क्रोधः तथा कथं न दहति यथा प्रज्वलितोऽग्निः शुष्कं शमीवृक्षं भस्मसात्करोति। शत्रुविनाशाय भवतः क्रोधः कथं न प्रवर्तते, प्रतीकारार्थं भवान् कथं न प्रयतते। (द्रौपदी युधिष्ठिरस्य कोपम् उद्दीपयति)

**भावार्थः-** द्रौपदी आश्चर्येण युधिष्ठिरं पृच्छति यत् - हे राजन्! यथा अग्निः ऊर्ध्वशिखः सन् शुष्कशमीवृक्षं ज्वलयति, तथैव अस्यां शत्रुकृतायां विपदवस्थायां वर्तमानम् अपि भवन्तम् उद्दीपितः क्रोधाग्निः कथं न ज्वलयति! इति।

**सन्धिः–** मन्युर्ज्वलयति- मन्युः + ज्वलयति (विसर्गसन्धिः)। ज्वलयत्युदीरितः- ज्वलयति + उदीरितः (यण्सन्धिः)। इवाग्निः - इव + अग्निः (सवर्णदीर्घसन्धिः)।

**अलङ्कारः** - अत्र उपमालङ्कारः। अत्र क्रोधः उपमेयम्, अग्निः उपमानम्, इव इति उपमाबोधकं पदम्, ज्वलनं समानधर्मः।

**समासः**- मनस्विगर्हिते- मनस्विभिः गर्हितं मनस्विगर्हितम्, तस्मिन् (तृतीयातत्पुरुषः)। नरदेव- नराणां देवः नरदेवः, तत्सम्बुद्धौ (षष्ठीतत्पुरुषः)। शमीतरुम्- शमी च असौ तरुः शमीतरुः, तम् (कर्मधारयः)। उच्छिखः- उद्गता शिखा यस्य सः (बहुव्रीहिः)।

**अस्थाने कोपः दोषाय, किन्तु स्थाने कृतः गुणायैव भवति-**

**अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।**
**अमर्षशून्येन जनस्य जन्तुना न जातहार्दैन न विद्विषादरः ॥33॥**

**अन्वयः**- अवन्ध्यकोपस्य आपदां विहन्तुः देहिनः स्वयमेव वश्याः भवन्ति। अमर्षशून्येन जन्तुना जातहार्देन (सता) जनस्य आदरः न, विद्विषा(सता) दरः न।

भवता शत्रुषु क्रोधः कार्यः

**सारांशः**- हे धर्मराज युधिष्ठिर! राज्ञा यथाकालं पात्रानुरूपमवस्थानुरूपं च कोपः कार्यः। निग्रहानुग्रहसमर्थस्य विपद्विनाशकस्य च पुरुषस्य वशे सर्वे प्राणिनः स्वयमेव भवन्ति। अस्मिन् संसारे दृश्यते यत् क्रोधशून्यः पुरुषः मित्रैः सम्मानं न प्राप्नोति शत्रवश्च तस्मान्न न बिभ्यति। भवत्सदृशः यः पुरुषः यथाकालं क्रुध्यति सः प्रसन्नः भवतु अप्रसन्नः वा भवतु तं कोऽपि न गणयति। अतः भवता शत्रुषु क्रोधः कार्यः। (जनाः कदा वशे भवन्ति? कस्मात् च भीतिः न भवति? इति द्रौपदी युधिष्ठिरं बोधयति।)

**भावार्थः**- द्रौपदी युधिष्ठिरं वदति यत्- येषां क्रोधः कदापि निष्प्रयोजनः (निष्फलः) न भवति, ये च विपत्तीनां नाशकाः भवन्ति, तादृशानां जनानां सर्वे प्राणिनः स्वयमेव अधीने भवन्ति। परन्तु क्रोधरहितेन मित्रेण सह शत्रुतायां सत्याम् अपि तस्मात् कस्यचिद् अपि भयं न भवति। अतः भवता उचितस्थले क्रोधः करणीयः एव।

**सन्धिः** – विहन्तुरापदाम् -विहन्तुः + आपदाम् (विसर्गसन्धिः)।

**समासः**- अवन्ध्यकोपस्य- न विद्यते वन्ध्यः कोपः यस्य सः अवन्ध्यकोपः, तस्य (बहुव्रीहिः)। अमर्षशून्येन- अमर्षेण शून्यः अमर्षशून्यः, तेन (तृतीयातत्पुरुषः)। जातहार्देन- जातं हार्दं यस्य सः जातहार्दः, तेन (बहुव्रीहिः)।

**युधिष्ठिरस्य कोपोद्दीपनाय भीमस्य कष्टां दशां वर्णयति-**

**परिभ्रमन् लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः।**
**महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥34॥**

**अन्वयः-** (प्राक्) लोहितचन्दनोचितः महारथः अयं वृकोदरः (अद्य) रेणुरूषितः पदातिः अन्तर्गिरि परिभ्रमन् सत्यधनस्य(ते) मानसं नो दुनोति कच्चित्?

भीमेनानुभूयमानं दुःखं भवतः मनसि खिन्नतां जनयति किं न?

**सारांशः-** अत्र भीमसेनस्य दयनीयाम् अवस्थामुक्त्वा द्रौपदी युधिष्ठिरस्य कोपोद्दीपनं कर्तुं इच्छति। रक्तचन्दनालंकृतः यः भीमः पुरा विशालरथं आरुह्य परिभ्रमति स्म सः एव सम्प्रति धूलिव्याप्तशरीरः पादाभ्यां एव पर्वतेषु परिभ्रमति। अनेनापि सत्यवादिनः भवतः चेतसि पीडा न भवति किम्? अपूर्वा खलु ते सत्यवादिता (सत्यप्रियता)! अद्यापि सत्यमेव रक्ष्यते न तु भ्रातॄन्। (द्रौपदी भीमस्य दुःखस्य प्रदर्शनेन युधिष्ठिरस्य क्रोधोद्दीपनाय यतते।)

**भावार्थः-** द्रौपदी राज्ञः युधिष्ठिरस्य क्रोधस्य उद्दीपनाय युधिष्ठिरं वदति यः सर्वदा रक्तचन्दनं धरति स्म, सः अधुना धूलियुक्तः अस्ति। किञ्च यः सर्वत्र रथेन एव चलति स्म, सः अधुना पर्वतेषु पद्भ्यामेव भ्रमणं करोति । एतत् सर्वं दृष्ट्वा सत्यमार्गे गच्छतः भवतः मनः खिन्नं न भवति किम्?

**सन्धिः-** परिभ्रमल्लोहितचन्दनोचितः- परिभ्रमन् + लोहितचन्दनोचितः (परसवर्णसन्धिः)। पदातिरन्तर्गिरि - पदातिः + अन्तर्गिरि (विसर्गसन्धिः)।

**अलङ्कारः** – परिकरः। अत्र सत्यधनः इति युधष्ठिरस्य कृते प्रयुक्तं विशेषणं साभिप्रायकम् अतः परिकरालङ्कारः।

**समासः-** लोहितचन्दनोचितः- लोहितं च तत् चन्दनं लोहितचन्दनम् (कर्मधारयः), लोहितचन्दनाय उचितः (चतुर्थीतत्पुरुषः)। अन्तर्गिरि- गिरिषु अन्तः (अव्ययीभावः)। रेणुरूषितः- रेणुभिः रूषितः (तृतीयातत्पुरुषः)। महारथः - महान् रथः यस्य सः (बहुव्रीहिः)। सत्यधनः - सत्यं धनं यस्य सः (बहुव्रीहिः)।

**द्रौपदी अर्जुनस्य कष्टं दर्शयति -**

**विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।**
**स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः॥35॥**

**अन्वयः-**वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यं वसु अयच्छत्, सः धनञ्जयः अधुना तव वल्कवासांसि आहरन् (तव)मन्युं कथं न करोति?

**सारांशः-** अत्र अर्जुनस्य दयनीयाम् अवस्थामुक्त्वा द्रौपदी युधिष्ठिरस्य कोपोद्दीपनं कर्तुमिच्छति। इन्द्रतुल्यः यः अर्जुनः पुरा उत्तरान् कुरुप्रदेशान्

इदानीमर्जुनस्य दयनीयामवस्थां भवान् न पश्यति किम्?

विजित्य प्रचुरं सुवर्णरजतात्मकं धनं तुभ्यं दत्तवान् सः एव धनञ्जयः सम्प्रति वस्त्रनिर्माणार्थ वृक्षेभ्यः वल्कलवस्त्राणि आनयति। अर्जुनस्य एषा दीनदया कस्मात् कारणात् तव चेतसि शत्रून् प्रति कोपं न उत्पादयति। अर्जुनस्य दीनदशाम् अवलोक्य भवता कोपिना भवितव्यम् इत्यर्थः। धनञ्जयः अर्जुनः। धनं जयतीति धनञ्जयः।

**भावार्थः-** द्रौपदी पुनः वदति- इन्द्रसदृशः इन्द्रसदृशः पराक्रमी अयम् अर्जुनः उत्तरकुरुदेशान् जित्वा भवते प्रचुरं सुवर्णधनं दत्तवान् आसीत्। तादृशः अपि अर्जुनः अधुना भवतां कारणेन वल्कलानां वस्त्राणि धरति । एतादृशम् अर्जुनं दृष्ट्वा अपि भवतः क्रोधः न जायते? (इन्द्रसदृशः पराक्रमी अर्जुनः अधुना भवतां कारणेन वल्कलवस्त्राणि धरति।)

**सन्धिः–** अयच्छदुत्तरान्- अयच्छत् + उत्तरान् (जश्त्वसन्धिः)। तवाधुना- तव + अधुना (सवर्णदीर्घसन्धिः)। अधुनाहरन्- अधुना + आहरन् (सवर्णदीर्घसन्धिः)।

**समासः-** अकुप्यम्- न कुप्यम् अकुप्यम्(नञ्तत्पुरुषः)। वासवोपमः- वासवः उपमा यस्य सः (बहुव्रीहिः)। वल्कवासांसि– वल्कान्येव वासांसि वल्कवासांसि।

## Summarised Overview

दुर्योधनः युधिष्ठिरेण सह कपटं कर्तुम् उद्यतः अस्ति इति कारणात् वनेचरः युधिष्ठिरं प्रतिक्रियाय प्रेरितवान्। पुरस्कारादिना सत्कृतः वनेचरः यदा गतवान् तदा वनेचरेण उक्तं सर्वं विषयं द्रौपदीं सर्वान् अनुजान् च युधिष्ठिरः कथितवान्। द्रौपदी दुर्योधनस्य राज्यस्य वृद्धिं श्रुत्वा युधिष्ठिरे क्रोधोत्पादनाय यतितवती। युधिष्ठिरसदृशानां पण्डितानां कृते स्त्रीभिः कृतः उपदेशः तेषां तिरस्कारसदृशः भवति। इन्द्रतुल्यपराक्रमैः भरतादिभिः युधिष्ठिरस्य वंशजैः अखण्डं पालिता पृथिवी स्वदोषकारणात् युधिष्ठिरेण त्यक्ता। ये छद्मपराः जनाः भवन्ति। ते यथा तीक्ष्णाः बाणाः अनाच्छादितम् अङ्गं प्रविश्य जनं नाशयन्ति तथैव साधुजनान् नाशयन्ति। दुर्योधनः शौर्यादिगुणैः युक्तायाः, वंशपरम्परया प्राप्तायाः, मनोहारिण्याः स्वभार्यासदृश्याः च राज्यलक्ष्म्याः अपहरणं कृतवान्। भवान् कथं एतत्सहते? युधिष्ठिरः शत्रुकृतायां विपदवस्थायाम् अस्ति। द्रौपदी युधिष्ठिरं कुतः भवतः क्रोधाग्निः न ज्वलति इति पृच्छति। येषां क्रोधः कदापि निष्फलः न भवति ये च विपत्तीनां नाशकाः भवन्ति। तादृशानां जनानाम् अधीने सर्वे प्राणिनः भवन्ति। स्वस्य भ्रातुः भीमस्य दीनां एतादृशीं परिस्थितिं दृष्ट्वा भवतः मनः पीडां न अनुभवति इति द्रौपदी पृच्छति। अर्जुनः युधिष्ठिराय उत्तरकुरुदेशान् जित्वा प्रचुरं सुवर्णधनं दत्तवान्। सः अधुना वल्कलरचितानि वस्त्राणि एव धरति। तामवस्थां पश्यन् कुतः त्वं न खेदसे इति क्षोभजनकं उत्तेजात्मकं वचनं द्रौपदी अपृच्छत्।

## Assignments

आशयं विशदयत

1. 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः'।
2. परप्रणीतानि वचांसि चिन्वतां, प्रवृत्तिसाराः खलु मादृशां गिरः।
3. अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
   अमर्षशून्येन जनस्य जन्तुना न जातहार्दैन न विद्विषादरः ॥

अलङ्कारविशेषं प्रतिपादयत

1. गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
   परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥
2. भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
   कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥
3. परिभ्रमन् लोहितचन्दनोचितः पदातिरन्तगिरि रेणुरूषितः।
   महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥

निबन्धं रचयत

1. नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः।

## Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur
3. mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh, The Kiratarjuniya of Bharavi, Ed. Tukaram Javaji, Nirnayasagar Press, Bombay1907
4. Sri Gurunathavidyanithi, Kiratarjuniya, , Rudra Printing Works, Culcutta


## References

1. संस्कृतसाहित्येतिहासः, आचार्य श्रीरामचन्द्रमिश्रकः, Printed & published - 1985, चौखम्बा विद्याभवन्, वारणासि।
2. किर्तार्जुनीयम् (प्रथमसर्गः), अभिराज डा.राजेन्द्र मिश्र, अक्षयवट प्रकाशन्, इलहबाद्
3. T.K.Ramachardra Aiyer, Sri Bharavi's Kiratharjuneeyam, Canto 1, R.S.Vadhyar and Sons, Kalpathi Palakkad 2008

## Space for Learner Engagement for Objective Questions

**Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.**

UNIT 4

# प्रथमसर्गे 36-46 श्लोकाः

(द्रौपद्याः प्रोज्वलवचांसि)

## Learning Outcomes

- किरातार्जुनीयम् महाकाव्यमधिकृत्य उद्बोधनम्।
- इतरमहाकाव्यानि अपेक्ष्य किरातार्जुनीयस्य वैशिष्ट्यम्।
- वनवासिनां पाण्डवादीनाम् इदानीन्तनावस्थां जानाति।
- समाजे स्त्रीणां स्थानं तासं दृढनिश्चयस्य प्राधान्यं चावगच्छति।

## Background

युधिष्ठिरः वनेचरस्य वचनानन्तरं विदितवृत्तान्तः। सर्वं विषयम् अनुजान् द्रौपदीं च श्रावयति। दुर्योधनस्य राज्यस्य वृद्धिं श्रुत्वा द्रौपदी युधिष्ठिरस्य क्रोधस्य उद्दीपनं यथा स्यात् तथा वक्तुं प्रारभते। युधिष्ठिरस्य राज्यलक्ष्मीः कीदृशी आसीत् इत्यादीन् विषयान् विशदयति। अस्मिन् एकके द्रौपदी प्रतीकाराय युधिष्ठिरस्य कोपम् उद्दीपयति। द्रौपदी युधिष्ठिराय राज्यलाभाय आशीर्वादं ददाति। भर्तुः वंशस्य चाभिवृद्ध्यर्थं प्रेरणात्मकानि द्रौपद्याः वचांसि पठामः।

## Keywords

धृतिसंयमौ यमौ, 'विचित्ररूपाः खलु चित्तवृत्तयः', युधिष्ठिरस्य शयन-जागरण-सम्बन्धि-कष्टं, पराभवोऽपि उत्सवः, युद्धार्थं प्रेरयति, राज्यलाभस्य आशीर्वादः, निराश्रया हता मनस्विता, जटाधरः पावकं जुहुधि।

# Discussion

**अधुना द्रौपदी युधिष्ठिरस्य क्रोधोद्दीपनाय नकुलसहदेवयोः विषये अपि कथयति-**

**वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥36॥**

**अन्वयः-** वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ (अत एव) अगजौ गजौ इव(स्थितौ) एतौ यमौ विलोकयन् त्वं धृतिसंयमौ बाधितुं कथं न उत्सहसे?

नकुलसहदेवयोः दयनीयस्था

**सारांशः-** नकुलसहदेवयोः दयनीयामवस्थामुक्त्वा द्रौपदी युधिष्ठिरं कोपोद्दीपनं करोति। पुरा भवतः शासनकाले ययोः नकुलसहदेवयोः सुकोमलायां शय्यायां शयने भवति स्म तौ अधुना वनभूमौ शयनं कुरुतः। वनभूमिः एव तयोः कृते शय्या। अनेन तयोः शरीरे कठोरतरे संजाते। पुरा ययोः सुन्दरस्य केशकलापस्य यथाकालं संस्कार भवति स्म तयोः केशाः अधुना संस्काराभावात् सर्वतः व्याप्ताः। अनेन इमौ नकुलसहदेवौ पर्वतीयौ गजौ इव प्रतीयेते। अनयोः ईदृशीं दुर्दशां दृष्ट्वापि भवान् कस्मात् कारणात् सन्तोषनियमौ न जहाति। भवान् कथं स्वस्थचित्तः प्रतीकाररहितश्च। अहो भवतः महत् धैर्यं इति भावः।

**भावार्थः-** द्रौपदी पुनः वदति- हे राजन्! एतौ पर्वते उत्पन्नौ गजौ इव दृश्यमानौ नकुलसहदेवौ वनभूमौ एव शयनं कुरुतः। अतः एतयोः शरीरं कठोरं जातम् अस्ति, एतयोः केशाः च सर्वतः अव्यवस्थिताः जाताः सन्ति। एतादृशौ एतौ नकुलसहदेवौ दृष्ट्वा भवान् धैर्यं सन्तोषं च किमर्थं न त्यजति?

**सन्धिः-** इवागजौ- इव + अगजौ (सवर्णदीर्घसन्धिः)।

**अलङ्कारः** - उपमा। अत्र यमौ अर्थात् नकुलसहदेवौ उपमेयम्, गजौ इति उपमानम्, इव इति उपमाबोधकं पदम्, नैसर्गिकबलविक्रमादिगुणयुतौ इति समानधर्मः।

**समासः-** वनान्तशय्याकठिनीकृताकृती- वनस्य अन्तः वनान्तः (षष्ठीतत्पुरुषः), वनान्ते शय्या वनान्तशय्या (सप्तमीतत्पुरुषः), वनान्तशय्यया कठिनीकृता- वनान्तशय्याकठिनीकृता (तृतीयतत्पुरुषः), वनान्तशय्याकठिनीकृता आकृतिः ययोः तौ वनान्तशय्याकठिनीकृताकृती

(बहुव्रीहिः)। कचाचितौ - कचैः आचितौ कचाचितौ (तृतीयातत्पुरुषः)। अगजौ- न गः अगः (नञ्तत्पुरुषः), अगे अजायेताम् अगजौ (उपपदतत्पुरुषः)। धृतिसंयमौ - धृतिः च संयमः च धृतिसंयमौ तौ (इतरेतरद्वन्द्वः)।

**अथ राज्ञः दुर्दशां वर्णयितुम् उपोद्घातमाह-**

**इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।**
**विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥37॥**

**अन्वयः-** इमां तावकीं धियं अहं न वेद। चित्तवृत्तयः विचित्ररूपाः खलु। परां भवदापदं विचिन्तयन्त्याः मम चेतः आधयः प्रसभं रुजन्ति।

युधिष्ठिरादीनां कष्टं दृष्ट्वा द्रौपद्याः मनः विदीर्णमभूत्

**सारांशः-** राज्ञः युधिष्ठिरस्य दुर्दशां दर्शयितुं द्रौपदी उपोद्घातरूपेण कथयति अनुजानां दुर्दशां पश्यन्नपि स्वयं अत्यधिकं दुखम् अनुभवन् अपि च भवान् स्वस्थचित्तः प्रतिकाररहितश्च। कस्मात् कारणात्? एतत् सर्वं भवता क्रियते। एतादृशीं भवतः बुद्धिमहं न जानामि। महदाश्चर्यं विद्यते यत् मम (द्रौपद्याः) कृतेऽपि भवतः बुद्धिः अगम्यजाता। अस्मिन् संसारे जनानां मनोवृत्तयः विविधप्रकाराः भवन्ति। किन्तु भवतः महतीं विपत्तिं दृष्ट्वा मम चित्तं मनोव्यथाः बलपूर्वकं विदारयन्ति। भवद्विपत्तिरनुभवितारं भवन्तं न विकरोति इति महच्चित्रम् इत्यर्थः।

**सूक्तिः–** 'विचित्ररूपाः खलु चित्तवृत्तयः'। अर्थात् अस्यां जगति प्रत्येकं जनस्य मनसः स्वभावः पृथक्-पृथक् भवति।

**भावार्थः-** हे राजन्! जनस्य मनसः स्वभावः पृथक् पृथक् भवति इति तु सर्वानुभवसिद्धम् अस्ति एव। तथापि अहं भवतः आपत्कालिकं चिन्तनं ज्ञातुं प्रयत्नं कृतवती। किन्तु किमपि अवगन्तुं न शक्तवती। भवतः एतत् कष्टं दृष्ट्वा एव मनोव्यथाः मम मनः बलात् पीडयन्ति। किन्तु भवान् तु स्वयं कष्टम् अनुभवति तथापि भवन्तं मनोव्यथाः न पीडयन्ति इति तु आश्चर्यम् एव। (युधिष्ठिरादीनां कष्टं दृष्ट्वा द्रौपद्याः मनः कथं व्यथितं भवति।)

**सन्धिः-** ममाधयः - मम + आधयः (सवर्णदीर्घसन्धिः)।

**समासः-** विचित्ररूपाः - विचित्राणि रूपाणि यासां ताः (बहुव्रीहिः)। चित्तवृत्तयः - चित्तस्य वृत्तयः (षष्ठीतत्पुरुषः)। भवदापदम्- भवतः आपद् भवदापद्, ताम् (षष्ठीतत्पुरुषः)।

**युधिष्ठिरस्य दुर्दशां वर्णयति-**

**पुराऽधिरुढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।**
**अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥38॥**

युधिष्ठिरस्य शयनजागरणस्थितिं परामृशति।

**अन्वयः-** यः(त्वं) महाधनं शयनम् अधिरूढः(सन्) स्तुतिगीतिमङ्गलैः पुरा विबोध्यसे, सः(त्वं) अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां(अद्य)जहासि।

**सारांशः-** अस्मिन् लोके युधिष्ठिरस्य दुर्दशां उक्त्वा द्रौपदी युधिष्ठिरं कोपोद्दीपनं कर्तुम् इच्छति। हे राजन्! पूर्वस्मिन् काले यदा भवान् राज्यसिंहासनारूढः आसीत् तदा निशायां बहुमूल्यशय्यायां शयानः भवान् प्रातः स्तुतिगायनरूपैः मङ्गलशब्दैः निद्रां परित्यजति स्म। किन्तु अधुना कुशबहुलायां अपरिष्कृतायां वनभूमौ सुप्तः भवान् प्रातः अशुभैः शृगालशब्दैः निद्रां परित्यजति। एतादृशीं विपत्तिम् अनुभवन्नपि भवान् प्रतीकाररहितः इति महदाश्चर्यम्। वयं तु भवतः क्लेशेन अत्यन्तं व्यथिताः भवामः। (युधिष्ठिरस्य दुर्दशां उक्त्वा द्रौपदी युधिष्ठिरस्य कोपोद्दीपनं कर्तम् इच्छति।)

**भावार्थः-** प्रातःकाले भवान् मूल्यवत्यां शय्यायां शयनं करोति स्म, तदा वैतालिकाः गुणानां कीर्तनेन स्वरतालपदप्रयोगेण जयोऽस्तु जयोऽस्तु इत्यादिपदानाम् उच्चारणेन च जागरणं कारयन्ति स्म। परन्तु अधुना भवान् बहुकुशयुक्तायाम् अकृत्रिमायां भूमौ शयनं करोति, शृगाल्याः रोदनादिभिः अमङ्गलसूचकैः शब्दैः च भवतः जागरणं भवति। (अधुना द्रौपदी युधिष्ठिरस्य शयन-जागरण-सम्बन्धि-कष्टं प्रदर्शयति।)

**सन्धिः-** पुराधिरूढः - पुरा + अधिरूढः (सवर्णदीर्घसन्धिः)।

**अलङ्कारः-** विषमः। यः युधिष्ठिरः स्तुतिगीतिमङ्गलैः निद्रां जहाति स्म, इदानीं शिवारुतैः निद्रां जहाति इति विरूपसङ्घटनात् अत्र विषमः अलङ्कारः भवति।

**समासः-** महत् धनं यस्य तं महाधनम् (बहुव्रीहिः)। स्तुतिगीतिमङ्गलैः - स्तुतिः च गीतिः च मङ्गलं च स्तुतिगीतिमङ्गलानि, तैः (इतरेतरद्वन्द्वः)। अदभ्रदर्भाम्- अदभ्राः दर्भाः यस्यां सा अदभ्रदर्भा, ताम् (बहुव्रीहिः)। अशिवैः- न शिवानि अशिवानि, तैः (नञ्समासः)। शिवारुतैः- शिवानां रुतानि शिवारुतानि, तैः (षष्ठीतत्पुरुषः)।

**व्याकरणकार्यम्-** 'स्थलीम् अधिशय्य' इत्यत्र अधिपूर्व 'शीङ्धातोः अधिशीङ्स्थासां कर्म' इति सूत्रेण आधारस्य कर्मत्वे द्वितीयाविभक्तिः।

**शरारं यशसा सह कार्श्यमुपैति-**

**पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा।**
**तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥39॥**

युधिष्ठिरस्य यशसः शरीरस्य च कृशता जाता।

**अन्वयः**- हे नृप! यत् एतत् वपुः पुरा द्विजातिशेषेण अन्धसा रामणीयकम् उपनीतम् वन्यफलाशिनः ते तत् वपुः अद्य यशसा समं कार्श्यम् परैति।

**सारांशः**- युधिष्ठिरस्य शरीरस्य दुर्दशामुक्त्वा द्रौपदी युधिष्ठिरस्य कोपोद्दीपनं कर्तुमिच्छति। हे राजन्! पूर्वस्मिन् काले यदा भवान् राज्यसिंहासनारूढः आसीत् तदा ब्राह्मणभुक्तावशिष्टान्नभक्षणेन तव शरीरं रमणीयम् आसीत्। अधुना वन्यानि फलान्यश्नतः भवतः तदेव शरीरं क्षीणातां प्राप्नोति। पुरा दानादिना भवतः यशः यथा प्रवृद्धम् आसीत् तथैव भवतः शरीरमपि पवित्रान्नभक्षणेन रमणीयमासीत्। इदानीं तु राज्यनाशात् दानाभावे कीर्तिनाशः भवति, पवित्रभोजनाभावे च शारीरं कृशं भवति। (द्रौपदी युधिष्ठरस्य शरीरस्य कृशतायाः कारणं वदति।)

**भावार्थः**- द्रौपदी युधिष्ठिरं वदति हे राजन्! भवान् पूर्वं ब्राह्मणान् भोजयित्वा तत्र अवशिष्टम् अन्नं खादति स्म । तेन अवशिष्टेन अन्नेन पोषितं भवतः शरीरम् अत्यन्तं रमणीयं दृश्यते स्म। परन्तु अधुना वने प्राप्यमाणानि फलानि खादति इति कारणेन यशसा सह भवतः शरीरम् अपि क्षीणं जातम् अस्ति। (पवित्रभोजनाभावे च शारीरं कृशं भवति।)

**अलङ्कारः** - सहोक्तिः। तस्य लक्षणम् -

> सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः।
> सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्॥

अतिशयोक्तियुक्तः सहार्थकशब्दप्रयोज्यः एकपदार्थस्य अनेकपदार्थे सम्बन्धः सहोक्तिः इति अलङ्कारः भवति। अस्मिन् श्लोके कार्यं परैति अर्थात् कृशतां याति इत्यस्य यशसा वपुषा च सम्बन्धः, अतः सहोक्तिः अलङ्कारः।

**सन्धिः** – पुरोपनीतम्- पुरा + उपनीतम् (गुणसन्धिः)।

**समासः**- द्विजातिशेषेण- द्विजातिभिः भुक्तं द्विजातिभुक्तम् (तृतीयातत्पुरुषः), द्विजातिभुक्तात् शेषं द्विजातिशेषम्, तेन। वन्यफलाशिनः - वन्यानि च तानि फलानि वन्यफलानि (कर्मधारयः), वन्यफलानि अश्नाति तच्छीलः वन्यफलाशी, तस्य (उपपदसमासः)।

**व्याकरणकार्यम्**- 'यशसा समम्' इत्यत्र सहार्थकस्य 'समम्' इत्यस्य योगे 'सहयुक्तेऽप्रधाने' इति तृतीया ।

**मणिपीठशायिनौ ते चरणौ अद्य वनेषु निषीदतः-**

**अनारतं यौ मणिपीठशायिनावरजयद्राजशिरःस्रजो रजः।**
**निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ।।40।।**

**अन्वयः-** (पुरा)राजशिरःस्रजां रजः, अनारतं मणिपीठशायिनौ यौ ते चरणौ अरञ्जयत्, तौ(अद्य) मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः।

**सारांशः-** अस्मिन् श्लोके युधिष्ठिरस्य दुर्दशामुक्त्वा द्रौपदी युधिष्ठिरस्य कोपोद्दीपने कर्तुमिच्छति। हे राजन्! पूर्वस्मिन् काले यदा भवान् राज्यसिंहासनासीनः आसीत् तदा भवतः चरणौ निरन्तरं रत्ननिर्मितपादपीठे विराजमानौ आस्ताम्। प्रणमतां सामन्तनृपाणां मुकुटस्थितपुष्पमालानां परागः भवच्चरणौ अरञ्जयत्। अधुना वनवासकाले तु इतस्ततः संचरतः भवतः तौ एव चरणौ हरिणतपस्विजनच्छिन्नाग्रभागेषु कुशानां काननेषु तिष्ठतः। छिन्नाग्रत्वात् कुशानां स्पर्शं दुःसहः वर्तते। तत्र चरणन्यासेन महान् क्लेशः जायते। इयं भवतः दुर्दशा जातेत्यर्थः।

चरणन्यासेन महान् क्लेशः जायते

**भावार्थः-** द्रौपदी पुनः वदति- हे राजन्! पूर्वम् अन्ये राजानः भवतः अभिवादनं कुर्वन्ति स्म । भवतः चरणौ च मणिना निर्मिते पीठे स्थापितौ भवतः स्म। यदा ते अभिवादनं कुर्वन्ति स्म तदा तेषां शिरसि स्थितानां पुष्पमालानां परागः भवतः पादौ रञ्जयति स्म। किन्तु अधुना तौ एव पादौ मृगैः ब्राह्मणैः च कर्तितेषु अग्रभागेषु कुशेषु भवतः। (द्रौपदी युधिष्ठिरस्य कष्टं प्रदर्शयति।)

**सन्धिः-** निषीदतस्तौ- निषीदतः + तौ (विसर्गसन्धिः)। मणिपीठशायिनावरञ्जयद्राजशिरः स्रजाम्- मणिपीठशायिनौ + अरञ्जयत्, अरञ्जयत् + राजशिरःस्रजाम्।

**अलङ्कारः-** विषमः। अत्र मणिपीठशायिनौ चरणौ वनेषु बर्हिषां निषीदतः इति विरूपसङ्घटनात् विषमालङ्कारः।

**समासः–** मणिपीठशायिनौ- मणिभिर्युक्तं पीठं मणिपीठम्, मणिपीठे शयाते तच्छीलौ। राजशिरःस्रजाम- राज्ञां शिरांसि राजशिरांसि (षष्ठीतत्पुरुषः), राजशिरःसु स्रजः राजशिरःस्रजः, तासाम् (सप्तमीतत्पुरुषः)। मृगद्विजालूनशिखेषु- मृगाः च द्विजाः च मृगद्विजाः (इतरेतरद्वन्द्वः), मृगद्विजैः आलूना शिखा येषां तानि मृगद्विजालूनशिखानि, तेषु (बहुव्रीहिः)।

आपदां द्विषन्निमित्तत्वादेवैदृशी वेदना, दैवकी तु आपन्नैवं दःखाय-

द्विषन्निमित्ता तव चेदियं दशा ततः समलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥41॥

**अन्वयः-** यत् इयं दशा द्विषन्निमित्ता ततः मे मनः समूलम् उन्मूलयति इव परैः अपर्यासितवीर्यसम्पदां मानिनां पराभवः अपि उत्सवः एव (भवति)।

विधिवशादागता विपत् सोढुं शक्यते। मानहानिस्तु दुःसहा

**सारांशः-** मनस्विजनानां कृते मानहानिः दुःसहा भवति इति उक्त्वा द्रौपदी युधिष्ठिरं प्रतीकाराय प्रेरयति। हे राजन्! यतो हि भवतः अस्माकं च इयं दुर्दशा शत्रुकृताऽस्ति अत एव मम मनसि महान् विषादः वर्तते। शत्रुकृता ईदृशी दुर्दशा मनस्विनां कृते अपमानजनका भवति। शत्रुभिः अनिष्टवलसम्पदां मनस्विनां कृते पराजयोऽपि हर्षहेतुः भवति। भाग्यवशादागता विपत् सोढुं शक्यते किन्तु मानहानिस्तु दुःसहा भवति। अत एव भवता प्रतीकारः विधेयः इत्यर्थः।

**भावार्थः-** द्रौपदी वदति- येषां मानिनां पराक्रमः सम्पत् च शत्रूणां द्वारा विनाशिता चेत् दुःसहा। दैवद्वारा नाशिता भवति चेत् तेषां पराजयः अपि उत्सवः (उत्साहवर्धकः) एव भवति। परन्तु, अस्माकम् एषा अवस्था दुर्योधनादीनां शत्रूणां कारणेन जाता, अतः मम मनः अत्यन्तं खिन्नम् अस्ति। (द्रौपदी युधिष्ठिरादीनां कष्टं दृष्ट्वा स्वस्याः स्थितिं वदति।)

**सन्धिः–** उन्मूलयतीव- उन्मूलयति + इव (सवर्णदीर्घसन्धिः)। परैरपर्यासितवीर्यसम्पदाम्- परैः + अपयासितवीर्यसम्पदाम् (विसर्गसन्धिः)। पराभवोऽप्युत्सवः- पराभवः + अपि + उत्सवः (यण् सन्धिः), उत्सव एव- उत्सवः + एव (विसर्गसन्धिः)।

**अलङ्कारः-** उत्प्रेक्षा अर्थान्तरन्यासः च इति अनयोः अलङ्कारयोः मिश्रणम् अस्ति।

**समासः-** द्विषन्निमित्ता- द्विषन्तः निमित्तं यस्याः सा (बहुव्रीहिः)। अपर्वासितवीर्यसम्पदाम्- न पर्यासिताः अपर्यासिताः (नञ्तत्पुरुषः), वीर्यस्य सम्पदः वीर्यसम्पदः (षष्ठीतत्पुरुषः), अपर्यासिताः वीर्यसम्पदः येषां ते अपर्यासितवीर्यसम्पदः, तेषाम् (बहुव्रीहिः)।

### शत्रूनवधूय शमेन सिद्धिं मुनयः वाञ्छन्ति, न रजानः-

**विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।**
**व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥42॥**

**अन्वयः-** (हे) नृप! शान्तिं विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि। प्रसीद। निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति, भूभृतः न।

शान्तिः त्यक्त्वा युद्धाय प्रेरयति द्रौपदी

**सारांशः-** कर्तव्योपदेशं कुर्वन्ती द्रौपदी युधिष्ठिरं शत्रूणां वधाय प्रेरयति। हे राजन्! शान्तिं परित्यज। शत्रूणां वधाय तत् क्षत्रियजनोचितं तेजः पुनः धारय। प्रसन्नः भव। दीनतां परित्यज्य उत्साहसम्पन्नः भव। आकाङ्क्षाविहीनः एव कामक्रोधादिषड्रिपून् विजित्य शमेन मोक्षरूपां सिद्धिं प्राप्नुवन्ति। राज्यप्राप्तिरूपा सिद्धिस्तु कथमपि शमेन न भवति।

राज्ञां सिद्धिस्तु बलायत्तैव वर्तते। कैवल्यकार्यवत् राजकार्यं न शान्तिसाध्यमित्यर्थः।

**भावार्थः-** हे राजन्! भवान् क्षमां त्यक्त्वा दुर्योधनादीनां शत्रूणां मारणाय पुनः पूर्वतनं तेजः धरतु प्रसन्नः भवतु च। यतः इच्छारहिताः मुनयः एव कामक्रोधादीन् शत्रून् तिरस्कृत्य शान्तिद्वारा इष्टसिद्धिं प्राप्नुवन्ति, न तु राजानः । राजभिः तु स्वशत्रून् जेतुम् अवश्यं युद्धं करणीयमेव भवति। (द्रौपदी युधिष्ठिरं युद्धार्थं प्रेरयति)।

**अलङ्कारः** - अर्थान्तरन्यासः।

**समासः–** निःस्पृहाः - निर्गता स्पृहा येभ्यः ते (बहुव्रीहिसमासः)। भूभृतः - भुवं बिभ्रति इति भूभृत्, तस्य । सन्धेहि- सम् + धा-पर-लोट्-मपु-एव।

**तेजस्विनः यशोधनाः यदि पराभवे सन्तुष्टाः तर्हि तेजस्विजनैकशरणा मनस्विता निराश्रया-**

**पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।**
**भवादृशाश्चदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥43॥**

**अन्वयः-** धामवतां पुरःसराः यशोधनाः भवादृशाः सुदुःसहं ईदृशं निकारं प्राप्य रतिम् अधिकुर्वते चेत् हन्त, मनस्विता निराश्रया (सती) हता।

असौ पराक्रमः एव कार्यः, न तु शान्तिः

**सारांशः-** पराक्रमः एवोचितः न क्षमा इत्युक्त्या द्रौपदी युधिष्ठिरं प्रेरयति। हे धर्मराज युधिष्ठिर! तेजस्विजनानां मध्ये अग्रेसराः, यशः एव धनं मन्यमानाः भवत्समाः महापुरुषाः अपि यदि एतादृशमसह्यं पराभवं (तिरस्कारं) प्राप्य सन्तोषं स्वीकुर्वते तदा मनस्विजनैकशरणा मनस्विता कुत्र स्थास्यति। शरणाभावे सा तु विनष्टैव भविष्यतीति विचिन्त्य मे मनसि महान् विषादः विद्यते। अतः पराक्रमितव्यमिति भावः।

**भावार्थः-** खेदं प्रकटयन्ती द्रौपदी युधिष्ठिरं वदति यत्- हे राजन् यदि भवत्सदृशाः यशस्विनः एतादृशम् अतिदुःसहं शत्रुकृतं पराजयं प्राप्य अपि सन्तोषं कुर्वन्ति, तर्हि तेजस्विषु विद्यमाना अभिमानिता निराश्रया भूत्वा नष्टा एव भविष्यति ।

**सन्धिः-** पुरस्सरा धामवताम्- पुरस्सराः + धामवताम् (विसर्गसन्धिः)। भवादृशाश्चेत् -भवादृशाः + चेत्।

**अलङ्कारः-** अर्थान्तरन्यासः। अत्र 'निराश्रया हन्त हता मनस्विता' इति सामान्यस्य वैधर्म्येण समर्थनात् अर्थान्तरन्यासः। अत्र भवादृशाः पराक्रमिणः रिपुकृतम् अवमाननं सहन्ते चेत् मनस्विता कुत्र गच्छेत् इति आशयः।

**समासः–** यशोधनाः- यशः एव धनं येषाम्, ते (बहुव्रीहिः)। निराश्रया- निर्गतः आश्रयः यस्याः सा (बहुव्रीहिः)।

**अथ क्षमामेव सुखसाधनं मन्यसे, राजचिह्नं धनुः विसृज्य पावकं जुहुधि-**
युधिष्ठिरः स्वशत्रुणा सह युद्धं न करोति इति कारणेन युधिष्ठिरं दृष्ट्वा द्रौपदी क्रुद्धा भवति। अतः सा धनुः त्यजतु इत्यादि उक्त्वा युधिष्ठिरं युद्धार्थं प्रेरयति-

**अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।**
**विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥44॥**

**अन्वयः-** अथ निरस्तविक्रमः चिराय क्षमाम् एव सुखस्य साधनम्। पर्येषि (तर्हि) लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहुधि।

'समाधानकाङ्क्षी चेत् धनुः मुमोचय' इति युधिष्ठिरं परिहसति द्रौपदी

**सारांशः-** शान्तिमार्गमाक्षिपन्ती द्रौपदी व्यङ्ग्यरूपेण युधिष्ठिरं प्रतीकाराय प्रेरयति। हे राजन्! यदि पराक्रमं परित्यज्य एवं चिरकालपर्यन्तं शान्तिमेव कल्याणस्य साधनम् अवगच्छति तर्हि राजचिह्नेन धनुषा किं प्रयोजनम्? विरक्तस्य किं धनुषेत्यर्थः। अतः राजचिह्नम् एतत् धनुः परित्यज्य शिरसि जटा धारयन् च अस्मिन्नेव वने मुनिर्भूत्वा अग्नौ हवनं कुरु। 'मुञ्च धनुः' इति रूपेण धनुर्धारणं प्रेरयति द्रौपदी अस्मिन् श्लोके।

**भावार्थः-** द्रौपदी पुनः वदति - हे राजन्! यदि भवान् क्षमा एव सुखस्य साधनम् अस्ति न तु पराक्रमः इति चिन्तयति, तर्हि इदं राजचिह्नयुक्तं धनुः त्यक्त्वा जटाधारणं कृत्वा अस्मिन् तपोवने अग्नौ हवनं करोतु । अस्य धनुषः का आवश्यकता इति। (सा धनुः त्यजतु इति उक्त्वा युधिष्ठिरं युद्धार्थं प्रेरयति।)

**सन्धिः–** निरस्तविक्रमश्चिराय- निरस्तविक्रमः + चिराय।

**समासः–** निरस्तविक्रमः- निरस्तः विक्रमः येन सः (बहुव्रीहिः)। लक्ष्मीपतिलक्ष्म- लक्ष्म्याः पतिः लक्ष्मीपतिः, लक्ष्मीपतेः लक्ष्म लक्ष्मीपतिलक्ष्म।

**वञ्चकेषु शत्रुषु समयोल्लङ्घनमपि कार्यमेवेत्याह-**
**न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।**
**अरिषु हि विजयार्थिनः क्षितीशः विदधति सोपधि सन्धिदूषणानि ॥45॥**

**अन्वयः-** परेषु निकृतिपरेषु (सत्सु) भूरिधाम्नः ते समयपरिरक्षणं न क्षमम्। हि विजयार्थिनः क्षितीशाः अरिषु सोपधि सन्धिदूषणानि विदधति।

**सारांशः-** 'पुनः राज्यप्राप्त्यर्थं प्रतिज्ञामनादृत्य भवता प्रतीकारः करणीयः' इति रूपेण युधिष्ठिरं प्रेरयति द्रौपदी। हे राजन्! यदा दुर्योधनादयः शत्रवः

विजयेच्छुः शत्रौ सन्धिदूषणानि करिष्यति

निरन्तरम् अपकारतत्पराः वर्तन्ते तदा महाशक्तिशालिनः प्रतीकारक्षमस्य भवतः त्रयोदशसंवत्सरान् वने वत्स्यामीत्येव रूपायाः प्रतिज्ञायाः पालनं न युक्तम्। यतो हि विजयाभिलाषिणिनः राजानः केनचिद् व्याजेन दोषमापाद्य सन्धिं दूषयन्ति। शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानम्। अन्यत् समयरक्षणादिकम् अशक्तस्येति भावः। अत एव भवत्सदृशानां सबलानां कृते प्रतिज्ञापालनं न शोभनं न च कल्याणकरं वर्तते।

**भावार्थः-** हे राजन्! कपटतत्पराणां शत्रूणां कृते भवत्सदृशस्य प्रतीकारार्थं सामर्थ्ययुक्तस्य राज्ञः कृते समयस्य परिरक्षणं न युक्तम्। अतः त्रयोदशवर्षाणि यावत् वने स्थास्यामि इति एवंरूपायाः प्रतिज्ञायाः पालनं भवतां कृते न उचितम्। यतः विजेतुम् इच्छन्तः राजानः शत्रुषु केनचित् व्याजेन अपि दोषम् उत्पाद्य सन्धिभङ्गं कुर्वन्ति। प्रतिज्ञायाः पालनं तु अशक्तानां कृते अस्ति न तु भवत्सदृशानां सामर्थ्यवतां कृते इति द्रौपद्याः भावः। (द्रौपदी युधिष्ठिरं दुर्योधनसदृशस्य शत्रोः प्रतिज्ञायाः पालनं न आवश्यकम् इति वदति)।

**सन्धिः-** क्षितीशा विदधति- क्षितीशाः + विदधति (विसर्गसन्धिः)। **अलङ्कारः -** अस्मिन् श्लोके अर्थान्तरन्यासः अलङ्कारः अस्ति।

**समासः-** समयपरिरक्षणम्- समयस्य परिरक्षणम् (षष्ठीतत्पुरुषः)। निकृतिपरेषु- निकृतौ पराः निकृतिपराः, तेषु (सप्तमीतत्पुरुषः)। भूरिधाम्नः- भूरि धाम यस्य सः भूरिधामा, तस्य (बहुव्रीहिः)। विजयार्थिनः- विजयम् अर्थयन्ते तच्छीलाः। क्षितीशाः- क्षितेः ईशाः (षष्ठीतत्पुरुषः)। सोपधि- उपधिना सह वर्तते इति। सन्धिदूषणानि - सन्धेः दूषणानि (षष्ठीतत्पुरुषः)।

**इदानीं द्रौपदी युधिष्ठिराय राज्यलाभाय आशीर्वादं दत्त्वा स्वस्याः विषयम् अत्रैव समापयति -**

**विधिसमयनियोगाद्दीप्तिसंहारजिह्मं**
**शिथिलवसुमगाधे मग्नमापत्पयोधौ ।**
**रिपुतिमिरमुदस्योदीयमानं दिनादौ**
**दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥46॥**

**अन्वयः-** विधिसमयनियोगात् अगाधे आपत्पयोधौ मग्नं दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतम् इव लक्ष्मीः भूयः समभ्येतु।

(विधिसमयनियोगात् अगाधे आपत्पयोधौ मग्नं दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य दिनादौ उदीयमानं) त्वां लक्ष्मीः पुनः समभ्येतु।

द्रौपदी युधिष्ठिरस्य समृद्ध्यर्थं मङ्गलं प्रार्थयन्ति

**सारांशः-** प्रथमसर्गस्य अन्तिमेऽस्मिन् श्लोके द्रौपदी युधिष्ठिरस्य समृद्ध्यर्थं मङ्गलं कामयते। सा कथयति- विधिनिर्मितनियमवशात् सायंकाले अगाधे विपत्तिस्वरूपे पश्चिमे समुद्रे निमग्नं, रश्मिसंकोचेन प्रकाशहीनं, शत्रुभूतमन्धकारं दूरीकृत्य अन्येद्युः प्रातःकाले उद्यन्तं दिनकरं यथा दिवसशोभा (दिवसलक्ष्मीः) पुनः अलंकरोति तथैव भाग्यवैपरीत्यात् कालप्रभावाच्च गम्भीरे विपत्समुद्रे निमज्जमानं, धनहीनं, शत्रून् विनाश्य पुनरात्मनः राज्यप्राप्यर्थमुद्योगं कुर्वन्तं च त्वां युधिष्ठिरमपि राज्यलक्ष्मीः पुनः समाश्रयतु।

**भावार्थः-** युधिष्ठिराय आशीर्वादं प्रयच्छन्ती द्रौपदी वदति- भवान् कालचक्रकारणात् गभीरे कष्टस्वरूपे समुद्रे पतितः नष्टधनः च अस्ति। भवान् शत्रुरूपम् अन्धकारं नाशयित्वा प्रातःकाले उदीयमानः तापस्य अन्धकारस्य च नाशकः सूर्यः इव राज्यलक्ष्मीं पुनः प्राप्नुयात् इति।

**सन्धिः–** विधिसमयनियोगाद्दीप्तिसंहारजिह्मम्- विधिसमयनियोगात् + दीप्तिसंहारजिह्मम्। उदस्योदीयमानम्- उदस्य + उदीयमानम् (गुणसन्धिः)। लक्ष्मीस्त्वाम्- लक्ष्मीः + त्वाम् (विसर्गसन्धिः)।

**छन्दः-** अस्मिन् श्लोके मालिनी छन्दः अस्ति।
**अलङ्कारः-** अस्मिन् श्लोके पूर्णोपमा अलङ्कारः अस्ति।

**समासः-** विधिसमयनियोगात्- विधिः च समयः च विधिसमयौ (इतरेतरद्वन्द्वः), विधिसमययोः नियोगः विधिसमयनियोगः, तस्मात् (षष्ठीतत्पुरुषः)। दीप्तिसंहारजिह्मम्- दीप्तेः संहारः दीप्तिसंहारः (षष्ठीतत्पुरुषः), दीप्तिसंहारेण जिह्मः दीप्तिसंहारजिह्मः, तम् (तृतीयतत्पुरुषः)। शिथिलवसुम्- शिथिलं वसु यस्य सः शिथिलवसुः, तम् (बहुव्रीहिः)। आपत्पयोधौ- आपत् एव पयोधिः आपत्पयोधिः, तस्मिन् (कर्मधारयः)। रिपुतिमिरम्- रिपुरेव तिमिरं रिपुतिमिरम्, तत् (कर्मधारयः)। दिनादौ- दिनस्य आदिः दिनादिः, तस्मिन् (षष्ठीतत्पुरुषः)। दिनकृतम्- दिनं करोति इति दिनकृत्, तम् (उपपदतत्पुरुषः)।

## Summarised Overview

पर्वते उत्पन्नयोः गजयोः इव दृश्यमानयोः नकुलसहदेवयोः वनभूमौ शयनकारणेन शरीरं कठोरं जातम् अस्ति। द्रौपदी आपत्कालिकं युधिष्ठिरस्य चिन्तनं न अवगच्छति। युधिष्ठिरस्य कष्टं दृष्ट्वा द्रौपद्याः मनोव्यथाः मनः पीडयन्ति। युधिष्ठिरः पूर्वं बहुमूल्यवत्यां शय्यायां शयनं करोति स्म। पूर्वं वैतालिकैः युधिष्ठिरस्य गुणानां कीर्तनेन, स्वरतालप्रयोगेण जयोऽस्तु इत्यादिपदानाम् उच्चारणेन च युधिष्ठिरस्य

जागरणं भवति स्म। अधुना युधिष्ठिरस्य शृगाल्याः रोदनादिभिः अमङ्गलसूचकैः शब्दैः जागरणं भवति। ब्राह्मणानां भोजनानन्तरम् अवशिष्टस्य अन्नस्य खादनेन युधिष्ठिरस्य शरीरं रमणीयं जातम् आसीत्। युधिष्ठिरः वन्यफलानि खादति इति कारणेन तस्य यशसा सह शरीरम् अपि क्षीण जातम्। पूर्वं युधिष्ठिरस्य चरणौ मणिना निर्मिते पीठे स्थापितौ आस्ताम्। विभिन्नानां राज्ञां मालायाः रागेण रञ्जितौ च आस्ताम्। अधुना युधिष्ठिरस्य चरणौ मृगैः ब्राह्मणैः च कर्तितेषु अग्रभागेषु कुशेषु भवतः। शत्रूणां कारणेन जातां दुर्दशां दृष्ट्वा द्रौपदी अत्यन्तं कष्टम् अनुभवति। मानिनः यदा दैवद्वारा पराजयं प्राप्नुवन्ति तदा कष्टं न अनुभवन्ति। द्रौपदी युधिष्ठिरं शान्तिं त्यक्त्वा शत्रूणां विनाशाय पुन :तेजः धरतु इति वदति। द्रौपदी मुनयः कामक्रोधादीन् शत्रून् तिरस्कृत्य शान्त्या इष्टसिद्धिं प्राप्नुवन्ति इति वदति। युधिष्ठिरसदृशाः तेजस्विनः शत्रुद्वारा पराजयं प्राप्य अपि सन्तोषम् अनुभवन्तः स्वस्य अभिमानितां नाशयन्ति। अतः आश्रयरहिता अभिमानिता नष्टा भविष्यति। द्रौपदी युधिष्ठिरं वदति यत् यदि क्षमा एव सुखस्य साधनम् अस्ति इति भवान् चिन्तयति तर्हि इदं राजचिह्नयुक्तं धनुः त्यजतु इति। त्रयोदशवर्षाणि यावत् वने स्थास्यामि इति एतादृशस्य समयस्य परिरक्षणं न उचितम्। जयं प्राप्तुम् इच्छन्तः राजानः शत्रुषु केनचित् व्याजेन दोषम् उत्पाद्य सन्धिभङ्गं कुर्वन्ति। युधिष्ठिरः कष्टस्वरूपे समुद्रे पतितः नष्टधनः च जातः। द्रौपदी युधिष्ठिराय शत्रूणां नाशनं कृत्वा प्रातःकालिकः सूर्यः इव भूत्वा भवान् पुनः राज्यलक्ष्मीं प्राप्नुयात् इति एतादृशम् आशीर्वादं ददाति।

# Assignments

**श्लोकं व्याख्यात**

1. वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
   कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ।।
2. पुराऽधिरुढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
   अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥
3. द्विषन्निमित्ता तवचेदियं दशा ततः समलमुन्मूलयतीव मे मनः।
   परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥
4. विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।
   व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ।।
5. न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।
   अरिषु हि विजयार्थिनः क्षितीशः विदधति सोपधि सन्धिदूषणानि ॥

**आशयं विशदयत ।**

1. 'विचित्ररूपाः खलु चित्तवृत्तयः'।

**व्याकरणकार्यं लिखत**

1. स्थलीम् अधिशय्य ।
2. यशसा समम्।

अलङ्कारविशेषं प्रतिपादयत ।

1. वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
   कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ।।
2. पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
   तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः॥
3. पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।
   भवादृशाश्चदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ।।

## Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed), Sahitya Academy, Trissur
3. mahamahopadhyaya Pandit Durga Prasad and Kashinathpandurangh Parabh, The Kiratarjuniya of Bharavi, Ed. Tukaram Javaji, Nirnayasagar Press, Bombay1907
4. Sri Gurunathavidyanithi, Kiratarjuniya, Rudra Printing Works, Culcutta


## References


1. आचार्य श्रीरामचन्द्रमिश्रकः, संसकृतसाहित्येतिहासः, Printed & published - 1985, चौखम्बा विद्याभवन्, वारणासि।
2. अभिराज डा.राजेन्द्र मिश्र, किर्तार्जुनीयम् (प्रथमसर्गः), अक्षयवट प्रकाशन्, इलहबाद्
3. T.K.Ramachardra Aiyer, Sri Bharavi's Kiratharjuneeyam, Canto 1, R.S.Vadhyar and Sons, Kalpathi Palakkad 2008


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the

paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# नैषधीयचरितम्

# BLOCK - 3

UNIT 1

# द्वितीयसर्गे 1-14 श्लोकाः

## Learning Outcomes

- नैषधीयचरितमहाकाव्यविषये परिचयं लभेयुः।
- काव्यानां व्याकरणविशेषज्ञानम्।
- नैषधीयचरितमहाकाव्ये नलकथा महत्वं प्रतिपादयितुं शक्ष्यति
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

महाकविना श्रीहर्षेण नैषधीयचरितमहाकाव्ये नलदमयन्त्याः स्नेहकथायाः चित्ताकर्षकं वर्णनं द्वाविंशतिसर्गेषु समाहितम्। प्रथमसर्गेऽस्मिन् महाकविः श्रीहर्षः राज्ञः नलस्य बहुधा प्रशंसां कुर्वन् "निपीय यस्य क्षितिरक्षिणः" इत्येवं रूपेण कथानकं समुपस्थापयति। भूपतेः नलस्य कीर्तिकथां श्रुत्वा विदर्भराजतनया भैमी (दमयन्ती) नलं प्रति समाकृष्टचित्ता भवति। राजा नलोऽपि भैमीं प्रति समाकृष्टमानसः सन् मानसविनोदाय अश्वं समारुह्य निजोपवनं प्रति समागच्छत। तत्र सरोवरस्यान्तिके हिरण्यमयं हंसं दृष्ट्वा राजा तं गृह्णाति। राज्ञा संगृहीतो हंसः प्रथमं नृपतेरात्मानं मोचयितुं बहुप्रयासं विदधाति; किन्तु अन्ततोगत्वा सः सकरुणविलापं करोति यं श्रुत्वा राजा नलः दयार्द्रः सन् तं हिरण्यमयं हंसं काञ्चित् प्रतिश्रुतिं विनैव मुमोच। इत्थं प्रथमसर्गस्यावसानं सञ्जायते। प्रथमसर्गे 145 श्लोकाः सन्ति। द्वितीयसर्गे 110 शेलोकाः सन्ति। द्वितीयसर्गारंभे हंसः नलं प्रति कृतज्ञतां ज्ञापयति। दमयन्त्याः गुणान् वर्णयति च। सर्गान्ते नलस्य प्रार्थनया कुण्डिनपुरी नगरे दमयन्तीसमीपं गच्छति। अस्मिन् खण्डे (1-50श्लोकाः) हंसमुखेन भैमीवर्णनं विशदयति।

# Keywords

नलः, भीमः, भैमी, दमयन्ती, हंसः, द्विजः, अधुनीत, पक्षती, अङ्घ्रिणा, धृतरुद्राक्षमधुव्रतं, नुनुदे, कटु, निजनीडद्रूमपीडिनः, आतपसङ्ग्वरम्, करकल्पजनान्तरात्, अर्तयः, औपयिकीम्, गृहयालुः।

# Discussion

हंसमुखेन भैमीवर्णनार्थ द्वितीयं सर्गमारभते-

**अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।**
**वचसामपि गोचरो न यः सतमानन्दमविन्दत द्विजः ॥1॥**

**अन्वयः** - अथ स द्विजः जगत्यधीश्वरात् पुरुषोत्तमात् ततः मुक्तिं अधिगत्य यः वचसाम् अपि गोचरः न, तम् आनन्दम् अविन्दत।

**व्याख्या-** अथ= मोचनानन्तरं, सः= पूर्वोक्तः, द्विजः= पक्षी विप्रश्च, जगत्यधीश्वरात्= भूपतेः, पुरुषोत्तमात्= पुरुष श्रेष्ठात्, विष्णोश्च, ततः= तस्मात् नलात्, प्रसिद्धाश्च, मुक्तिं= मोचनं निर्वाणं च, अधिगत्य= प्राप्य, यः= आनन्दः, वचसाम् अपि= वाक्यानाम् अपि, गोचरः= ग्राह्यः, न वक्तुमशक्य इति भावः। तं= तादृशम्, आनन्दं= सुखं, परमानन्दं च भावः। अविन्दत= अलभत।

हंसः नृपतेः मोचनं प्रापयति।

**सारांशः-** यथा विप्रः भुवनपतेर्विष्णोर्मोक्षं प्राप्य अनिर्वचनीयमानन्दं प्राप्नोति तथैव स हंसोऽपि नृपतेः मोचनं प्राप्य वाचामविषयं सुखं प्राप्तवानिति भावः।

**अलङ्कारः-** अत्र "त्य त मा" दिवर्णानामावृत्तित्वाद् अनुप्रासः, द्विजः' इत्यनेन पदेन पक्षिविप्रयोः द्वयोरर्थयोः ज्ञानाच्छलेषः।

**वृत्तम्-** अस्मिन् सर्गे एकशतश्लोकपर्यन्तं वियोगिनीवृत्तम्। "विषमे ससजा गुरुसप्तमे सभरा लोऽथ गुरुर्वियोगिनी" इति लक्षणादिति संक्षेपः॥

अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम्।
करयन्द्रणदन्तुराऽन्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥2॥

**अन्वयः-** स खगः उत्फुल्लतनूरुहीकृतां तनुम् एकधा न अधुनीत, करयन्त्रणदन्तु-राऽन्तरे पक्षती चञ्चुपुटेन व्यलिखत्।

खगः = हंसः

**व्याख्या-** सः= पूर्वोक्तः, खगः= पक्षी, हंस इत्यर्थः। उत्फुल्लतनूरुहीकृतां = सम्फुल्लपतत्रीकृतां, नलकरपीडनादिति भावः। तनुं= शरीरं, नैकधा= अनेकधा, अनेकप्रकारेणेत्यर्थः, अधुनीत= कम्पितवान्, करयन्त्रणदन्तुराऽन्तरे= नलहस्तपीडननिम्नोन्नतमध्यप्रदेशे, पक्षती= पक्षमूले, चञ्चुपुटेन= त्रोटिपुटेन, ब्यलिखत्= विलेखनेन ऋजूचकारेत्यर्थः।

नैकधा- नञर्थस्य नशब्दस्य "सुप्सुपा" इति समासः। नञ्समासे नलोपप्रसङ्गः। उत्फुल्लतनूरुहीकृतां- उत्फुल्लानि विकसितानि तनूरुहाणि रोमाणि यस्यां सा, अनुत्फुल्लतनूरुहा उत्फुल्लतनूरुहा कृता ताम्। **अलङ्कारः-** एतदादिश्लोकचतुष्टये स्वभावोक्तिः

अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥3॥

**अन्वयः-** अयं स्खलनक्षण एव एकतमेन अङ्घ्रिणा पक्षतेः अधिमध्योर्ध्वगजङ्घं द्रुतकण्डूयितमौलिः (सन्) आलयं शिश्रिये ॥

हंसजातिः।

**व्याख्या-** अयं= हंसः, स्खलनक्षण एव= मोचनसमय एव। एकतमेन= एकेन, अङ्घ्रिणा=चरणेन, पक्षतेः= पक्षमूलस्य, अधिमध्योर्ध्वगजङ्घम्= मध्योर्ध्वगामिप्रसृतं(यथा तथा), द्रुतकण्डूयितमौलिः= शीघ्रघर्षितमस्तकः सन्, आलयं= निजावासं, नीडमित्यर्थः, शिश्रिये= श्रितवान्। अस्मिन् श्लोके स्वभावोक्तिरलङ्कारः।

स्खलनक्षण एव- स्खलनस्य क्षणः तस्मिन्(षष्टीतत्पुरुषः)। अधिमध्यम्- मध्ये इति अधिमध्यम्(अव्ययीभावः)। ऊर्ध्वगजङ्घम्- ऊर्ध्वं गच्छतीति ऊर्ध्वगा, सा जङ्घा यस्मिन्(कर्मणि)।

स गरुद्वनदुर्गदुर्गृहान् कटु कीटान् दशतः सतः क्वचित्।
नुनुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः॥4॥

**अन्वयः** - पण्डितः सः गरुद्वनदुर्गदुर्ग्रहान् कटु दशतः क्वचित् सतः कीटान् पटुचञ्चूपुटकोटिकुट्टनैः तनुकण्डु नुनुदे॥

हंसः कीटाद्यपनयने समर्थः

**व्याख्या-** पण्डितः= निपुणः, कीटाद्यपनयनप्रवीण इति भावः। सः हंसः, गरुद्धनदुर्गदुर्ग्रहान्= पक्षसमूहदुर्गमस्थानदुर्ग्राह्यान्, कटुतीक्ष्णं, दशतः= तुदतः दन्तैरिति शेषः। क्वचित्= कुत्रचित्, सतः= वर्तमानान्। कीटान्= क्षुद्रजन्तून्, पटुचञ्चूपुटकोटिकुट्टनैः= समर्थत्रोटयग्रघट्टनैः। तनुकण्डु= अल्पखर्जु यथा तथा। नुनुदे= निवारितवान्।

गरुद्धनदुर्गदुर्ग्रहान्- गरुतां वनम्(षष्टी तत्पुरुषः), तदेव दुर्गम्, दुखेन ग्रहीतुं शक्या दुर्ग्रहः। तान्, दशतः- दशन्तीति दशतः। सतः- सन्तीति सन्तः, तान्। पटुचञ्चूपुटकोटिकुट्टनैः- चञ्चोः पुटम्(षष्टी तत्पुरुषः), पटुः च तत् चञ्चूपुटम्(कर्मधारयन्)तस्य कोटिः, तया कुट्टनानिः, तैः। तनुः कण्डू यस्मिन्, तद्यथा तथा। नुनुदे- "णुद प्रेरणे" इति धातोः लिट्।

**अलङ्कारः-** अत्र स्वभावोक्तिः श्लेशश्चालंकारौ। शब्दालंकारस्तु छेकानुप्रासः।

**अयमेत्य तडागनीडजैर्लघु पर्यव्रियताऽथ शङ्कितैः।**
**उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः॥5॥**

**अन्वयः** –अयं तडागनीडजैः लघु एत्य पर्यव्रियत। अथ अस्य करग्रहजात् वैकृतात् शङ्कितैः विकस्वरस्वरैः उदडीयत।।

हंसः तडागनीडजः

**व्याख्या -** अयं= हंसः, तडागनीडजैः= पद्माकरकुलायोत्पन्नैः पक्षिभिः, लघु = शीघ्रम्, एत्य= आगत्य, पर्यव्रियत= परिवृतः। अथ= परिवेष्टनाऽनन्तरम्, अस्य= हंसस्य, करग्रहजात्= हस्तपीडनजनितात्, वैकृतात्= विकारात्, शङ्कितैः= भीतैः, विकस्वरस्वरैः= उच्चैर्घोषैः पक्षिभिः, उदडीयत= उड्डीनम्। अस्मिन् श्लोके स्वभावोक्तिरलङ्कारः।

तडागनीडजैः- तडागे नीडाः(स०त०), समीपः अर्थः सप्तमी। तडागनीडे जातास्तडागनीडजाः, तैः। वैकृतात्- विकृतम् एव वैकृतं तस्मात्. दन्तुरपक्षत्वरूपादिति भावः। विकस्वरस्वरैः- विकसन्तीति विकस्वराः। वृणोतेः कर्मणि लङ्। डीङो भावे लङ्।

**दधतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः।**
**स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ।।6।।**

**अन्वयः-** स खगः बहुशैवलक्ष्मतां दधतः सरसः बहुशैवलक्ष्मतां दधतो नलस्य धृतरुद्राक्षमधुव्रतं करं कोकनदभ्रमात् इव पुनः ययौ॥

रक्तवर्णे
नलहस्ते हंसः
रक्तकमलभ्रान्ते
रिव पुनर्जगाम

**व्याख्या-** सः= पूर्वोक्तः, खगः= पक्षी, हंस इत्यर्थः। बहुशैवलक्ष्मतां= भूरिशैवलभूमितां, दधतः= धारयतः, सरसः= पल्वलात्। बहुशैवलक्ष्मतां= अधिकशिवभक्तचिह्नतां, नलस्य= नैषधस्य, धुतरुद्राक्षमधुव्रतं= भ्रमरसदृशरुद्राक्षधारकं, करं= हस्तं, कोकनदभ्रमात् इव= रक्तकमलभ्रान्तेः इव, पुनः= भूयः, ययौ= जगाम, रक्तवर्णे नलहस्ते रक्तकमलभ्रान्तेरिव हंसः पुनर्जगामेति भावः।

बहुशैवलक्ष्मताम्- बहूनि शैवलानि यस्यां सा बहुशैवला(बहु.)। "जलनीली तु शैवालं शैवालः" इत्यमरः। बहुशैवला क्ष्मा (भूमिः) यस्मिस्तत् बहुशैवलक्ष्मम् (बहु.) तस्य भावः तत्ता, ताम्, बहुशैवलक्ष्म+तल्+टाप्+अम्। दधतः - दधातीति दधत् तस्य, धा + लट् (शतृ) + ङस्।

**टिप्पणी-** राज्ञो नलस्य रत्नकरत्वात् हंसस्य कोकनदभ्रान्तिः।

**अलङ्कारः-** अत्र बहुशैवलेत्यादीनामनेकार्थत्वात् श्लेषः, नलस्य करे कोकनदस्य भ्रमसंभावनया चोत्प्रेक्षया।

**पतगश्चिरकाललालनादतिविश्रम्भमवापितो नु सः।**
**अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः॥7॥**

**अन्वयः-** सः पतगः चिरकाललालनात् अतिविस्रम्भम् अवापितः नु एतस्य महीभुजः भुजं भजन् अतुलं कुतूहलं विदधे॥

महीभुजः भुजं
भजन् अतुलं
कुतूहलं विदधे

**व्याख्या** -अथाऽस्य स्वयमागमनादुत्प्रेक्षते-पतग इति। सः=पूर्वोक्तः, पतगः =हंसः। चिरकाललालनात् =बहुसमयोपलालनात्, चिरकालं लालनं, तस्माद्। अतिविस्रम्भम् =अविश्वासम् प्रापितः, नु=प्रापितः किम्, नोचेत्कथं पुनः स्वयमागच्छेदितिभावः। एतस्य =अस्य, महीभुजः= राज्ञः, भुजं =करं, भजन्= सेवमानः, स्वयमाप्लुवनिति भावः। अतुलम् = अनुपमं, कुतूहलं =कौतुकं, विदधे= चकार।।

पतगः- पतैः(पक्षैः)गच्छतीति, पत-उपपदपूर्वक गम् धातोः "पुंसि सञ्ज्ञायां घः प्रायेण" इति सूत्रेण च प्रत्ययः। अतिविस्रम्भम् - अत्यन्तं विस्रम्भः, तम्, “कुगतिप्रादयः" इति समासः, महीभुजः- महीं भुनक्तीति महीभुक्, तस्य, नलस्येत्यर्थः, मही + भुज् + क्विप् (उपपद०) + ङस्। अतुलम् - अविद्यमाना तुला(उपमा) यस्य, तत् ( नञ् बहु०)।

**अलङ्कारः-** अत्र उत्प्रेक्षावृत्त्यनुप्रासयोः शब्दार्थालङ्कारयोः तिलतण्डुलवत्संसृष्टिः।

नृपमानसमिष्टमानसः स निमज्जत्कुतुकाऽमृतोर्मिषु।
अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत ॥8॥

**अन्वयः-** इष्टमानसः सः कुतुकाऽमृतोर्मिषु निमज्जत् नृपमानसम् अवलम्बितकर्णशष्कुली कलसीकं रचयन् अवोचत॥

**व्याख्या–** इष्टमानसः =प्रियमानसः, "कैलासपर्वते राम! मनसा निर्मितं परम्। ब्रह्मणा नरशार्दूल! तेनेनं मानसं सरः।।"( रामायणम् आ० का० २४ सर्गः) "मानसं सरसि स्वान्ते" इति विश्वः। सः=हंसः, कुतुकाऽमृतोर्मिषुः= कौतुक सुघातरङ्गेषु, "कौतूहलं कौतुकं च कुतुकं च कुतुहलम्" इत्यमरः। निमज्जत् = अन्तर्गतं, नृपमानसं = नलमनः, अवलम्बितकर्णशुष्कुलीकलसीकम् =आलम्बितश्रोत्रशष्कुलीघटद्वयं, रचयन् =कुर्वन्, रचयतीति। अवोचत= उक्तवान्

राज्ञो मनः स्ववचन-श्रवणोत्सुकं कुर्वन्नुवाचेति

**सारंशः-** जले निमज्जन्तं पुरुषं यथा कश्चित्तारणाय कलसप्रदानेन तमुद्धरति तथैव कौतुकतरङ्गेषु ब्रुडत् राजमानसमपि हंसः तत्कौतुकप्रशमनाय वक्ष्यमाणवाक्यं जगादेति भावः।।

इष्टमानसः- इष्टं मानसं यस्य सः। कुतुकम् एव अमृतम्। कुतुकाऽमृतोर्मिषुः- कुतुकाऽमृतस्य ऊर्मयः, तेषु (ष० त०)। मानसं- मन एव मानसम्, “प्रज्ञादिभ्यश्च”, मनस् + अण्। नृपस्य मानसं तत् (ष० त०)।

मृगया न विगीयते नृपैरपि धर्माऽऽगममर्मपारगैः।
स्मरसुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः।।9।।

**अन्वयः-** धर्माऽऽगममर्मपारगैः अपि नृपैः मृगया न विगीयते(तथाऽपि) हे स्मरसुन्दर ! मां यत् अत्यजः, स तव दयोदयोज्ज्वलः धर्मः।

धर्माऽऽगममर्म पारगैः अपि नृपैः मृगया न गह्येते

**व्याख्या-** धर्माऽऽगममर्मपारगैः अपि= धर्मशास्त्रतत्वपारदर्शिभिः अपि, नृपैः = राजभिः, मृगया = आखेटः। न विगीयते = न गह्येते, हे स्मरसुन्दर= हे काममनोरम!। मां-पक्षिणं, मृगयालक्ष्यभूतमपि यत्, अत्यजः=त्यक्तवान्, सः=त्यागः, तव=भवतः, दयोदयोज्ज्वलः=दयाया उदयः, करुणाऽवतारनिर्मलः, धर्मः सुकृतमेव। त्वं न केवलमाकारत उज्ज्वलः प्रत्युत दयारूपधर्मेणाऽपीति भावः।। अस्मिन् श्लोके पदार्थहेतुक काव्यलिङ्गालङ्कारः।

धर्मस्य आगमाः(ष० त०), तेषां मर्माणि (ष० त०), पारं गच्छन्तीति, पार-उपपदपूर्वक गम् धातोः "अन्ताऽत्यन्ताऽध्वदूरपारसर्वाऽनन्तेषु डः" इति सूत्रेण ड प्रत्ययः। धर्माऽऽगममर्मणां पारगाः, तैः(ष० त०)। विगीयते =वि + गै + लट् (कर्म) + त। तथाऽपि।"उपमानानि सामान्यवचनैः" इति सूत्रेण उपमानपूर्वपद(क०धा०)। दयाया उदयः (ष० त०), तेन उज्ज्वलः (तृ० त०)।

### मृगयायाः अनिन्दने कारणमाह-

**अबलस्वकुलाऽशिनो झषान्निजनीडद्रुमपीडिनः खगान्।**
**अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भूभृतां घ्नताम् ॥10॥**

**अन्वयः**- अबलस्वकुलाऽशिनः झषान्(घ्नताम्), निजनीडद्रूमपीडिनः खगान् (घ्नताम् ), अनवद्यतृणादिनः मृगान् घ्नतां भूभृतां मृगया अघाय न॥

राज्ञां कृते मृगया पापाय न भवति इति प्रतिपादयति

**व्याख्या** - अबलस्वकुलाऽशिनः=निर्बलनिजवंशभक्षकान्, झषान् =मत्स्यान्। घ्नताम्, एवं परत्राऽपि। निजनीडद्रुमपीडिनः=स्वनिवासवृक्षपीडकान्। खगान्=पक्षिणः, तथा अनवद्यतृणार्दिनः= निरपराधाऽर्जुनहिंसकान्, मृगान्=पशून्, घ्नतां= हिंसतां, भूभृतां = राज्ञां, मृगया = आखेटः, अघाय=पापाय, न=न भवति। तेषां झषखगपशूनां वधस्य दण्डरूपत्वाद्दण्डनाऽभाव एव दोष इति भावः॥ अस्मिन् श्लोके काव्यलिङ्गालङ्कारः।

अबलस्वकुलाऽशिनः- अविद्यमानं बलं यस्य तत् अबलं, (नञ्- बहु०), स्वस्य कुलम् (ष० त०), अबलं च तत् स्वकुलम् (क० धा०) अबलस्वकुलम्, अश्नन्तीति तच्छीलाः, तान्, अबलस्वकुल + अ + णिनि (उपपद०)+शस्। निजनीडद्रुमपीडिनः - नीडानां द्रुमाः(ष०त०), निजाश्च ते नीडद्रुमाः (क० धा०), तान् पीडयन्तीति तच्छीलाः, तान्, निजनीडद्रुम+पीड+णिनि + (उपपद०) शस्। विष्ठात्यागफलभक्षणादिनेति भावः। न उद्यन्त इति अवद्यानि, नञ्-उपपदपूर्वक वद धातोः "अवद्यपण्यवर्या गर्ह्यपणितव्याऽनिरोधेषु" इति सूत्रेण गर्ह्यं अर्थः यत्प्रत्ययान्त निपातन। न अवद्यानि अनवद्यानि (नञ्०), अनवद्यानि च तानि तृणानि (क० धा०); तानि अर्दन्तीति तच्छीला तान् अनवद्यतृण+अर्द + णिनि ( उपपद०) + शस्। "अन्तःसञ्ज्ञा भवन्त्येते सुखदुःखसमन्विताः। घ्नतां=घ्नन्तीति ध्नन्तः, तेषाम्, हन् + लट् (शतृ) +

आम्। भूभृतां - भुवं बिभर्तीति, भूभृतः, तेषाम् भू+भृ + क्विप् (उपपद०) + आम्। अघाय - तादर्थ्ये चतुर्थी।

**यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।**
**कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥11॥**

**अन्वयः** - (हे राजन्!) तव यत् अप्रियम् अवादिषं, प्रियम् आधाय तत् तरोः कृतम् आतपसङ्ज्वरम् अमृतम् अभिवृष्य अंशुमान् इव नुनुत्सुः अस्मि ।।

**व्याख्या-** हंसः पुनः स्वागमनकारणं प्रतिपादयति-यदिति। (हे राजन्!) तव= भवतः, यत्, अप्रियम् = अप्रीतिजनकं वाक्यं, अवादिषम्=अवोचम्, प्रियं=प्रीतिजनकं वाक्यम्, आधाय=निधाय, कथयित्वेति भावः। तत् =अप्रियं, तरोः=वृक्षस्य, कृतं =स्वयं विहितम्, आतपसज्वरं=द्योतकृतं सन्तापम्, अमृतं=जलम्, अभिवृष्य= वर्षित्वा, अंशुमान् इव=सूर्य इव, नुनुत्सुः=निवारयितुम् इच्छुः, अस्मि = भवामि ।। अस्मिन् श्लोके उपमालङ्कारः।

पुनः स्वागमनकारणं

**सारांशः-** हंसं राजानां स्वागमनकारणमेवं प्रतिपादयति। अहं तत् यद् निन्दावाक्यमुक्तवानस्मि। तदप्रियं निराकर्तुमिच्छुरस्मि। तत्र दृष्टान्तमाह- सूर्यः वृक्षस्य आतपेन कृतं पीडां जलं वर्षित्वा यथा नुदति तद्वद् इत्यर्थः।

अप्रियम्- न प्रियं, तत् (नञ्०)। आतपसज्वरं- आतपेन सज्वरः, तम् (तृ० त०)। अंशुमान्-प्रशस्ता अंशवः सन्ति यस्य सः, अंशु+मतुप्। नुनुत्सुः - नोदितुम् इच्छुः, नुद् + सन् + उः।

**उपनम्रमयाचितं हितं परिहर्तुं न तवाऽपि साम्प्रतम्।**
**करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥12॥**

**अन्वयः** - अयाचितम् उपनम्रं हितं तव अपि परिहर्तुं न साम्प्रतम्। हि सः प्रतिग्रहः करकल्पजनान्तरात् शुचितः विधेः प्रापि ॥

**व्याख्या-** त्वदीयोपकृतिनं मया ग्राह्येति चेत्तत्राह= उपनम्रमिति। अयाचितम् = अप्रार्थितम्, उपनम्रम्=उपनतं, हितं = हितसम्पादकं, तव अपि=भवतः अपि, परिहर्तुं=परित्यक्तुं, न साम्प्रतं= न युक्तम्, हि= यस्मात्कारणात्। सः=पूर्वोक्तः, मयाऽभिहित इति भावः। प्रतिग्रहः=दत्तपदार्थः, करकल्पजनान्तरात्= हस्तस्थानीयाऽन्यलोकात्, शुचितः= शुद्धात्, विधेः=भाग्यात्, प्रापि= प्राप्तः, न तु मत्त इति भावः।

अहं तु निमित्तमात्रं, दातृस्थानीयं तु भाग्यमेवेति अतो न ग्रहणलाघवमिति तात्पर्यम्। अस्मिन् श्लोके काव्यलिङ्गालङ्कारः।

**सारांशः-** अप्रार्थितमुपस्थितं प्रियं त्यक्तुं सार्वभौमस्यापि न युक्तम्। यतः सर्वं हि शुभाशुभं दैवात्प्राप्यते। यद् दैववशात् भवति तद् केनापि निराकर्तुं न शक्यते। विधिरेव ते दाता, अहं तस्योपकारणमात्रम् इत्यत्राशयः।

अयाचितम्- न याचितम् (नञ्०)। उपनम्रम्- उपनमनशीलम्, उप-उपसर्गपूर्वक "णम प्रह्वत्वे शब्दे" इति धातोः "नमिकम्पिस्म्यजसकमहिंसदीपो "रः" इति सूत्रेण र प्रत्ययः। करकल्पजनान्तरात्- ईषत् असमाप्तः करः करकल्पं हस्तसदृशमित्यर्थः। 'कर' शब्दस्य "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति सूत्रेण कल्पप् प्रत्ययः। करकल्पं च तद् जनान्तरं तस्मात् (क० धा०)।

शुचितः- शुचेः इति शुचितः, "शुचि" शब्दे "अपादाने चाऽहीयरुहोः" इति सूत्रेण तसि प्रत्ययः।

### स्वगर्वं परिहरति-

> **पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते।**
> **इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥13॥**

**अन्वयः** - पतगेन मया जगत्पतेः तव उपकृत्यै किं प्रभूयते? इति वेद्मि, तदपि अर्तयः तु मां प्रत्युपकर्तुं न त्यजन्ति॥

**व्याख्या-** हंसः स्वगर्वं परिहरति=पतगेनेति। पतगेन=पक्षिणा, मया= हंसेन, तुच्छजन्तुना इति भावः। जगत्पतेः=सार्वभौमस्य, जगतः पतिः, तस्य( ष० त०)। तव=भवतः, उपकृत्यै=उपकाराय, किं प्रभूयते=किं क्षम्यते? इति=एवं, वेद्मि=जानामि, तदपि=तथाऽपि, अर्तयस्तु =प्रत्युपकराऽर्थमुत्कण्ठारूपाः पीडास्तु, मां=पतगं, प्रत्युपकर्तुं=प्रयुपकारं कर्तुं, न त्यजन्ति= न मुञ्चन्ति, प्रत्युपकाराय प्रेरयन्तीत्यर्थः। पतगोऽप्यहं दयालोस्ते महोपकारं करवाणीति भावः॥

पतगोऽप्यहं दयालोस्ते महोपकारं करवाणीति

**सारांशः-** पक्षिमात्रेण हंसेन सार्वभौमस्य नलस्य उपकारस्य न भूयत इति चिन्ता वर्तते चेत् पतगोऽप्यहं महोपकारिणः ते महोपकारं करवाणीति भावः।

जगत्पतेः- जगतः पतिः, तस्य(ष० त०)। उपकृत्यै- उपकरणम् उपकृतिः, तस्यै, उप-उपसर्गपूर्वक 'कृ' धातोः "स्त्रियां क्तिन्" इति सूत्रेण क्तिन्,

चतुर्थी। किं प्रभूयते- समर्थेन न भूयत इति भावः।अत्र अनुप्रासोहेतुश्चालंकारौ।

उपकर्तुं शक्यते न वेति विचारो मास्तु, किं तूपकर्तुः प्रत्युपकर्तव्यमेवेति विधिरस्तीत्याह-

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।
पृथुरित्थमथाऽणुरस्तु सा न विशेषे विदुषामिह ग्रहः ।।14।।

**अन्वयः-** अथवा उपकर्तुः अचिरात् औपयिकीम् उपक्रियाम् आचरेत्, इत्थं सा पृथुः अथ अणुः अस्तु। विदुषाम् इह ग्रहः न॥

**व्याख्या** - स्वशक्त्यनुसारेण उपकारस्य प्रत्युपकारः शीघ्र कर्तव्य इति प्रतिपादयति-अचिरादिति। अथ वा = पक्षान्तरे, उपकर्तुः = उपकारकस्य, अचिरात = अविलम्बात्, औपयिकीं=स्वोपायसाध्याम्, उपाय एव औपयिकः। उपक्रियाम्= उपकारम् आचरेत्= कुर्यात् जीवनस्य अनित्यत्वाच्छीघ्रं प्रत्युपकारं विदधीतेति भावः। इत्थम् = एवं सति, सा= उपक्रिया, पृथुः = अधिका, अथ=अथ वा, अणुः=अल्पा, अस्तु= भवतु, विदुषां=बुधानां, तेषाम्, विवेकिनामिति भावः। इह=अस्मिन् विषये, ग्रहो न= आग्रहो न।

विवेकिनः कृतज्ञतामेव पश्यन्ति; न दोषम्

**सारांशः-** जीवनस्य अनित्यत्वाद् उपकारस्य प्रत्युपकारं शीघ्रमेव विदधीत इति हंसस्याभिप्रायः। सः उपकारः अधिका वा अल्पा वा भवतु गुणग्राहिणः विवेकिनः कृतज्ञतामेवाऽस्य पश्यन्ति; न दोषं न्विष्यन्तीति भावः॥

उपकर्तुः - उपकरोतीति उपकर्ता, तस्य। औपयिकीं - उपाय एव औपयिकः- ङीप्। विदुषां - विदन्तीति विद्वांसः। आचरेत्- चर् धातोः विधिलिङ्।

**टिप्पणी-** जीवनस्थैर्यं न निश्चितमतो यथाशीध्रमेव प्रत्युपकारः कर्तव्यः इति कविनोपदिष्टः।

**अलङ्कारः-** चरपयादीनां वर्णनामावृत्तित्वादनुप्रासः।

# Summarised Overview

श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरित्। अस्मिन् महाकाव्ये द्वाविंशतिसर्गाः(22)वर्तन्ते। महाकाव्येऽस्मिन् अष्टविंशत्यधिक अष्टविंशतिशतम् (2828) श्लोकाश्च सन्ति। नैषधे नायकः नलः(धीरोधात्तः), नायिका दमसन्ती, प्रतिनायकाः अग्निः, वरुणः, इन्द्रः, यमः च। काव्ये प्रधानरसः शृङ्गारः। अन्यरसाः वीरः, हास्यः, करुणः, रौद्रः, अद्भुतः इत्यादयः। गुणाः- माधुर्यः, ओजः, प्रसादः च। मुख्यतया वैदर्भीरीतिः। अनुप्रासः, अतिशयोक्तिः च अलङ्काराः। काव्येऽस्मिन् प्रयुक्तः नवदश छन्दसां प्रयोगः तत्र भवता श्रीहर्षेण कृतः वर्तते। एषु छन्दसु प्रचुरमात्रेण उपजाति छन्दः वर्तते। ग्रन्थस्यास्य त्रयोविंशतिः (23) टीकाः समुपलभ्यन्ते।

महाकविना श्रीहर्षेण नैषधीयचरिते नलदमयन्त्याः प्रेमकथायाः आकर्षकं वर्णनं द्वाविंशतिसर्गेषु प्रतिपादितम्। राज्ञः नलस्य कीर्तिकथां श्रुत्वा सा विदर्भराजपुत्री दमयन्ती तस्मिन् समाकृष्टचित्ता अवर्तत। नलोऽपि दमयन्तीं प्रति समाकृष्टमनसः सन् मानसविनोदाय अश्वमारुह्य निजोपवनं अगच्छत्। तत्र सरोवर तटे हिरण्मयं हंसं दृष्ट्वा राजा नलः तं गृह्णाति। राज्ञा संगृहीतो हंसः प्रथमं नृपतेरात्मानं मोचयितुं बहुप्रयासं विदधाति। किन्तु अन्ततः सः करुणविलापं करोति यं श्रुत्वा राजानलः दयार्द्रः सन् तं हिरण्मयं हंसं मुमोच। हंसः राजा नलात् स्वतन्त्रतां प्राप्य अवर्णनीयमानन्दं प्रस्नवान्। हंसः उत्फुल्लतनूरुहीकृतां तनुं नैकधा अधुनीत, करयन्त्रणदन्तुराऽन्तरे पक्षती चञ्चुपुटेन व्यलिखत्। ततः सः चतुरः हंसः पुनः हस्ते उपविष्टवान्। स पतगः चिरकाललालनात् अतिविस्रम्भम् अवापितो नु एतस्य महीभुजः भुजं भजन् अतुलं कुतूहलं प्राप्य तत्कौतुकप्रशमनाय वक्ष्यमाणवाक्यं जगाद च 'नृपैः क्रियमाणा मृगया धर्मागममर्मपारगैरपि न निन्द्यते'। हंसं राजानां स्वागमनकारणमेवं प्रतिपादयति। अहं तत् यद् निन्दावाक्यमुक्तवानस्मि। तदप्रियं निराकर्तुमिच्छुरस्मि। तत्र दृष्टान्तमाह- सूर्यः वृक्षस्य आतपेन कृतं पीडां जलं वर्षित्वा यथा नुदति तद्वद् इत्यर्थः। अप्रार्थितमुपस्थितं प्रियं त्यक्तुं सार्वभौमस्यापि न युक्तम्। यतः सर्वं हि शुभाशुभं दैवात्प्राप्यते। यद् दैववशात् भवति तद् केनापि निराकर्तुं न शक्यते। विधिरेव ते दाता, अहं तस्योपकारणमात्रम् इत्यत्राशयः। पक्षिमात्रेण हंसेन सार्वभौमस्य नलस्य उपकारस्य न भूयत इति चिन्ता वर्तते चेत् पतगोऽप्यहं महोपकारिणः ते महोपकारं करवाणीति भावः। जीवनस्य अनित्यत्वाद् उपकारस्य प्रत्युपकारं शीघ्रमेव विदधीत इति हंसस्याभिप्रायः। सः उपकारः अधिका वा अल्पा वा भवतु गुणग्राहिणः विवेकिनः कृतज्ञतामेवाऽस्य पश्यन्ति; न दोषं न्विष्यन्तीति भावः॥

## Assignments

उत्तरं लिखत

1. वचसामपि गोचरः तमानन्दमविन्दत। कः? कुतः?
2. व्यलिखच्चञ्चुपुटेन पक्षती। कः? कुत्र?
3. नलस्य करं पुनः ययौ। कः?
4. अतुलं कुतूहलं विदधे कः? कुतः?

5. कीदृशैः नृपैः मृगाय न विगीयते?
6. कीदृशानां भूभृतां मृगाय अघाय न वर्तते?
7. अंशुमान् इव नुनुत्सुः। कः? कुतः?
8. न विदुषामिह ग्रहः। कुत्र?

आशयं विशदयत

1. मृगया घाय न भूभृतां ध्नताम् ।
2. कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव।
3. करकल्पजनान्तराद्विधेः शुचितः प्रापिस हि प्रतिग्रहः ॥
4. वचसामपि गोचरे न यः स तमानन्दमविन्दत द्विजः।
5. पृथुरित्थमथाऽणुरस्तु सा न विशेषे विदुषामिह ग्रहः ।।

व्याकरणविशेषं लिखत

1. अधिमध्यम्
2. दुर्ग्रहान्
3. वैकृतात्

अलङ्कारविशेषं प्रतिपादयत

1. अयमेत्य तडागनीडजैर्लघु पर्यव्रियताऽथ शङ्कितैः।
   उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः॥ 5॥

निबन्धमारचयत

1. नैषधचरितस्य प्रथमसर्गस्य कथानकम्।
2. नलं प्रति हंसस्य कृतज्ञताप्रकाशनम्।
3. हंसस्य स्वागमनकारणम्।

# Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed), Sahitya Academy, Trissur


# References

1. आचार्य श्रीशेषराजषर्म रेग्मीः, नैषधीयचरितम्, (1-3 सर्गाः), चौखम्बा सुरभारती प्रकाशन् वारणासि 2008
2. श्रीहर्षरचितं नैषधीयचरितम्, दाधीचपण्डितशिवदत्तशर्मणा
3. डा.सुरेन्द्रदेवशास्त्री, नैषधीयचरितमहाकाव्यम् –मल्लिनाथकृतजीवातुसहितम्, चौखम्बा अरियण्टालिया, वारणासि. सं.20321
4. आचार्यजगन्नाथपाठकः, ध्वन्यालोकः- चौखम्बाविद्याभवन्, वारणासी 1992
5. आचार्यः कृष्णमोहनशास्त्री, साहित्यदर्पणः-व्याख्याकारः, चौखम्बा संस्कृतसंस्थान्, वारणासी।
6. डा. रत्नमोहनझा, चन्द्रालोकः – सम्पादकः, , प्रकाशन्-राष्ट्रीयसंस्कृतसंस्थान्, नवदेहली
7. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
8. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak Prakasan, Kanpur 1981


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# द्वितीयसर्गे 15-30 श्लोकाः

## Learning Outcomes

- नैषधीयचरितमहाकाव्यविषये परिचयं लभेयुः।
- महाकवेः व्याकरणविशेषज्ञानम्।
- नैषधीयचरितमहाकाव्ये नलकथायाः महत्वं प्रतिपादयितुं शक्ष्यति
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

हंसः नलहस्तात् स्वतन्त्रतां प्राप्य अवर्णनीयमानन्दं प्राप्तवान्। सः चतुरः हंसः पुनः नलस्य हस्ते उपविष्टवान्। एतत् दृष्ट्वा नलः अतीव जिज्ञासुः अभवत्। सः हंसः नलं प्रति एवम् - "राजन्! यत्किमपि अप्रियं मया भवद्भ्यः उक्तं, तत् अपसारयितुम् इच्छा भवतः प्रियं कार्यं कृत्वा। यद्यपि अहं साधारणः पक्षी अस्मि तथापि अहं भवतः कृते किं कर्तुं शक्नोमि? एतत् सम्यक् जानामि।, तथापि भवतः उपकारं कर्तुं तीव्राभिलषितं मां तत् कर्तुं प्रेरयति। अथ कविः हंसद्वारा दमयन्तीवर्णनं अस्मिन् एकके प्रतिपादयति

## Keywords

विचारचारु, कीरगीः, मुदं, शक्रभर्तृकां, अमनाक्, दमनात्, तनुश्रिया, धराऽधिपात्, मृडचूडानिलयां, चिकुरप्रकरा, तदखर्वेक्षणशोभया, लोकयुगं, खञ्जनम् रुचिगर्वदुर्विधं, धृतगम्भीरखनीखनीलिम, विधि, धृतलाञ्छनगोमयाञ्जनम्, सलिलोन्मज्जनं, कृतसीम्नी।

# Discussion

वचनप्रसङ्गार्थमाह-

**भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम्।**
**खगवागियमित्यतोऽपि किं न मुदं दास्यति कीरगीरिव ॥15॥**

**अन्वयः** -(हे नृप!) इदं मदीरितं विचारचारु न भविता चेत् तदपि श्रव्यम्। इयं खगवाक् इत्यतः अपि कीरगीः इव मुदं कि न दास्यति?

**व्याख्या-** स्ववचः श्रवणे आदरं याचते-भवितेति। (हे नृप!) इदं =वक्ष्यमाणं, मदीरितं=मत्कथितं, , वच इति भावः। विचारचारु= विमर्श मनोहरं। न भविता चेत्= न भविष्यति यदि, तदपि= तथाऽपि; मदीरिते विचारचारुत्वाऽभावेऽपीति भावः। श्रव्यं= श्रोतव्यम्, इयम्=एषा, खगवाक् =पक्षिवाणी, खगस्य वाक् (ष० त०)। इत्यतः अपि= अस्मात्कारणात् अपि, कीरगीः इव =शुकवाणी इव, मुदं=हर्ष, किं न दास्यति=किं न वितरिष्यति? दास्यत्येवेति भावः। विचारचारुत्वाऽभावेऽपि कौतुकादपि मदीरितं वचः श्रौतव्यमिति भावः॥ अस्मिन् श्लोके उपमालङ्कारः।

हंसः स्ववाक्ये आदरं याचते

**सारांशः-** यद्यपि इदं मद्वचनं खगवाक् विचारविषये चारुयुक्तं न भविष्यति। अहं लोकोत्तरमुपकारं करिष्यामीति चेत्तदपि श्रवणार्हं भवत्येव।

मदीरितम्- मया ईरितम् (तृ० त०)। विचारचारु- विचारे चारु (स० त०)। श्रव्यं- श्रोतुम् अर्हम्, श्रु धातोः "अचो यत्" इति सूत्रेण यत् प्रत्ययः, “सार्वधातुकार्धधातुकयोः” इति गुणः "धातोस्तन्निमित्तस्यैव " इति सूत्रेण अव् आदेशे। खगवाक्- खगस्य वाक् (ष० त०)। कीरगीः- कीरस्य गीः (ष०

त०)। श्रव्यम् अहर्थि- 'अचो यत्' इति यत्, 'सार्व- धातुकार्धधातुकयोः' इति गुणः, धातोस्तन्निमित्तस्यैव' इति वान्तादेशः। ददातेः लट्।

अथ यद्वक्तव्यं तदाह-

स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥16॥

**अन्वयः** - अरिसार्थसार्थकीकृतनामा सः भीमभूपतिः जयति किल। यं प्रभुम् अवाप्य विदर्भभूः शक्रभर्तृकां द्याम् अपि हसति॥

**व्याख्या-** साम्प्रतं हंसः स्ववचो वक्तुमुपक्रमते-स जयतीति। अरिसार्थसार्थकीकृतनामा=शत्रुसमूहाऽन्वर्थीकृताऽभिधानः, सः = प्रसिद्धः, भीमभूपतिः= भीमाऽऽख्यनृपः, जयति किल=सर्वोत्कर्षेण वर्तते खलु। यं=भीमभूपतिं, प्रभुं=भर्तारम्, अवाप्य=प्राप्य, विदर्भभूः=विदर्भभूमिः, शक्रभर्तृकाम् =इन्द्रस्वामिकां, द्याम् अपि =दिवम् अपि। हसति= उपहसति, किमुत अन्यभर्तृ कदेशानित्यर्थः। स्त्रियो हि भर्तु रुत्कर्षाद् हासं कुर्वन्तीति भावः॥

स्त्रियो हि भर्तृ रुत्कर्षादन्याः स्त्रीरूपहसन्ती ति

**सारांशः-** 'बिभ्यत्यस्माद्वैरिणः' इत्यन्वर्थनामधेययुक्तः भीमसंज्ञको राजा सर्वोत्कर्षेण वर्तते। यं भीमं भर्तारमवाप्य विदर्भदेशः दिवमपि हसति। स्त्रियः हि भर्तुरुत्कर्षाद् हासं कुर्वन्तीति भावः।

साऽर्थकम्- अर्थेन सहितं साऽर्थकम्। भूपतिः- भुवः पतिः (ष० त०)। भीमः- बिभ्यत्यस्मादिति भीमः। 'भियो म' इत्यपादानार्थे निपात नान्मप्रत्यय औणादिकः। शक्रभर्तृकाम्- शक्रो भर्ता यस्यास्तां शक्रभर्तृकाम्। "नद्यतश्च" इति कप्।

**अलङ्कारः-** अतिशयोक्तिः। अत्र विदर्भभुः हसतीत्यनयोः असम्बन्धेऽपि सम्बन्धख्यापनमिति अतिशयोक्तिर्नामालङ्कारः।

भैम्याः लोकोत्तरे गुणोत्कर्षे मिथ्यात्वनिरासार्थं पुराणप्रसिद्धमितिहासं सूचयन्नाह –

दमनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात्।
वरमाप स दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयाम् ॥17॥

**अन्वयः** - सः अमनाक् प्रसेदुषः तथ्यगिरः दमनात् तपोधनात् दिष्टविष्टपत्रितयाऽनन्यसद्गुणोदयां तनयां वरम् आप ॥

**व्याख्या-** हंसः साम्प्रतं दमयन्त्याः उत्पत्तिं वर्णयति-दमनादिति। सः=भीमभूपतिः, अमनाक्= अत्यर्थं। प्रसेदुषः = प्रसन्नात्, तथ्यगिरः=सत्यवचसः, दमनात् =दमननामकात्, तपोधनात्=तपस्विनः, दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयां=काललोकत्रयाऽनितरसदृशसौन्दर्या दिगुणाविर्भावां, तनयां= पुत्रीं ,वरम्= अभीप्सितम्, आप= प्राप, वरत्वेन पुत्री लब्धवानिति भावः। अस्मिन् श्लोके यमकालङ्कारः।

वरत्वेन पुत्रीं लब्धवान्

**सारांशः-** हे राजन्! भूपतिः भीमः निजोपासनया प्रसन्नात् दमननाम्नः ऋषेः अमोघवचनात् काललोकत्रयाऽऽनितरसदृशसौन्दर्यादिगुणाविर्भावां पुत्रीं वरत्वेन लब्धवान्।

अमनाक्- न मनाक् (नञ्०)। प्रसेदुषः- प्रससादेति प्रसेदिवान्, तस्य। प्रसेदुषः प्र - सदो लिटः 'भाषायां सदवसश्रुवः' इति क्वसुः। दमनात्- दमयतीति दमनः, तस्मात्। दमनात् 'सहितपिदमः संज्ञायाम्' इति ल्युः। तपोधनात्- तप एव धनं यस्य तस्मात्(बहु०)। दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयां- त्रयः अवयवा, गुणानाम् उदयः (ष० त०)। अनन्यसदृक्- अनन्यसदृक् 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवद्भावः।

**भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।**
**उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ॥18॥**

**अन्वयः** - असौ यतः तनुश्रिया भुवनत्रयसुभ्रुवां कमनीयतामदं दमयन्ती उदियाय, ततः दमयन्तीति अभिधां दधौ ॥

**व्याख्या** -अथाऽस्याः नामधेयं तद्व्युत्पत्तिं च प्रदर्शयति- भुवनेति। असौ= तनया, यतः यस्मात्कारणात्, तनुश्रिया= निजशरीरसौन्दर्येण, भुवनत्रयसुभ्रुवां= लोकत्रितयसुन्दरीणां, कमनीयतामदं= सौन्दर्य गर्वं, दमयन्ती= अस्तं गमयन्ती सती, उदियाय= उदिता, उत्पन्नेति भावः। ततः= तस्मात्कारणात्, दमयन्ती इति= दमयन्तीत्यानुपूर्विकाम्, अभिधां= नाम, दधौ= बभार।

अस्तं गमयन्ती सती, दमयन्ती

**सारांशः-** यस्मात् कारणात् असौ भीमतनया भुवनत्रये सुन्दरीणां सौदर्यगर्वं शरीरसौन्दर्येण दमयन्ती उत्पन्ना तस्मात् कारणात् सा दमयन्ती इति सार्थकं नाम बभार।

तनुश्रिया- तनोः श्रीः, तया (ष०त०)। त्रयम्- त्रयः अवयवाः यस्य तत् त्रयम्, शोभने भ्रुवौ यासां ताः सुभ्रुवः(बहु०), भुवनानां त्रयम् (ष० त०),

तस्मिन् सुभ्रुवः(स०त०)तासाम्। कमनीयतामदं- कमनीयस्य भावः (कमनीय + तल् + टाप् ), कमनीयताया मदः, तम् (ष० त०)। उदियाय- उदिता इणो लिट्। दधौ- दधातेर्लिट्। दमयन्ती-'भूसूधूभ्रस्जिभ्यश्छन्दसि' इति क्युनि साधितस्य शब्दस्य बाहुलकाद् भाषायां प्रयोगः। 'अणावकर्मकात्' इति कर्त्रभिप्राये क्रियाफले यत् परस्मैपदं विहितं तस्यैव 'न पादमि' इत्यादिना निषेधादणावकर्मकत्वे च तत्रैव चित्तवत्कर्तृकत्वाभावात् तेन परस्मैपद अप्राप्तेः निषेधाशङ्काया अभावाद् च्चाकर्त्रभिप्राये यथाप्राप्तं परस्मैपदं भवत्येवेति दमयन्तीत्यत्र शता युज्यते।

**अलङ्कारः-** दमयन्तीति संज्ञया भुवनत्रसुभ्रुवां कमनीयतामददमनसम्भावनं कृतं विद्यते अतः “संभावनामथोत्पेक्षा प्रकृतस्य समेन यद्” इति लक्षणसमन्वयात् उत्प्रेक्षालङ्कारः।

**श्रियमेव परं धराऽधिपाद्गुणसिन्धोरुदितामवेहि ताम्।**
**व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः॥19॥**

**अन्वयः-** (हे राजन् !) तां गुणसिन्धोः धराऽधिपात् उदितां प्रियम् एव परम् अवेहि, वा व्यवधौ अपि मृडचूडानिलयां विधोः कलां कः न वेद।।

**व्याख्या-** अथ पद्यानामेकविंशत्या चिकुरादारभ्य दमयन्तीं वर्णयति- श्रियमिति। (हे राजन्!) तां= दमयन्तीं, गुणसिन्धोः= दया दाक्षिण्यादिगुणसमुद्रात्, धराऽधिपात्= भीमनरेन्द्रात्, उदिताम्= उत्पन्नां, श्रियम् एव= लक्ष्मीम् एव, परं ध्रुवम्, अवेहि= जानीहि। देशव्यवधानान्न श्रीरेवेति वाच्यमित्याह- व्यवधावपीति। वा= अथवा, व्यवधौ अपि= व्यवधाने सत्यपि, मृडचूडानिलयां= शिवशिखाऽऽश्रयां, विधोः चन्द्रमसः, कलां षोडशं भागं, को न वेद= को न जानाति ? सर्वोऽपि वेदेत्यर्थः। अत एव पारम्परिकारुपकं दृष्टान्तश्च अलङ्कारः, उभयमपि सृष्टिः।

भैमीं गुणसिन्धो उदितां श्रियमित्यवेहि

**सारांशः-** यथा शिवशिरस्थिताऽपि कला चन्द्रकलैव तथैव गुणसिन्धोर्भीमभूपालादुत्पन्नाऽपि एषा दमयन्ती श्रीरेवेति भावः। अस्मिन् श्लोके राजा भीम स्य सिन्धुत्वस्य आरोपः एव दमयन्त्यां श्रीत्वस्य आरोपस्य कारणम्।

गुणसिन्धोः- गुणानां सिन्धुः तस्मात् (ष०त०)। धराऽधिपात्- धराया अधिपः, तस्मात् (ष०त०)। व्यवधौ- व्यवधानं व्यवधिः तस्मिन्। मृडचूडानिलयां- मृडस्य चूडा (ष० त०), "गिरीशो गिरिशो मृडः" इत्यमरः। मृडचूडा निलयो यस्यः सा, ताम् (बहु०)। अवेहि- अवपूर्वादिणो

लोटि सेर्हिरिति ह्यादेशे ङित्त्वान्न सार्वधातुकगुणः संहितायां आद्गुणः। अत्र केवलावपूर्वस्य इणो ज्ञानार्थत्वादाङ्प्रश्लेषे तदलाभात्। प्रश्लेषेऽपि "ओमाङोश्च" इति पररूपमिति केषाञ्चित्प्रक्रियोपन्यासो वृथा प्रक्षाळ्य त्यागः। अवेहीति वृद्धिरवद्येति वामनसूत्रमप्यवाङ्प्रश्लेष एव भ्रान्तिप्राप्तवृद्धिप्रतिषेधपरम्। गुण एव युक्त इति व्याख्यानात् अन्यथा "ओमाङोश्च" इति पररूपमेव युक्तमित्युच्येत इति। को वा न वेद- "विदो लटो वा" इति वैकल्पिको णलादेशः।

**अलङ्कारः-** यथा हरशिरोगतापि कला चन्द्रकलैव तथा भीमभवनोदितापि दमयन्ती श्रीरेवेति सौन्दर्यातिशयोक्तिः। अत्र श्रीकलयोः नृपमृडौ वाक्यद्वये बिम्बप्रतिबिम्बभावेन सामान्यधर्मवत्तया निर्दिष्टो इति दृष्टान्तालङ्कारः।

**चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान्।**
**पशुनाऽप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ।।20।।**

**अन्वयः** - ते चिकुरप्रकरा जयन्ति, विदुषी सा यान् मूर्धनि बिभर्ति। पशुना अपि अपुरस्कृतेन चामरेण तत्तुलनां कः इच्छतु ॥

**व्याख्या** - साम्प्रतं दमयन्त्याः केशादारभ्य वर्णनमुपक्रमते - चिकुरेति। ते= प्रसिद्धाः, चिकुरप्रकराः=केशकलापाः, जयन्ति सर्वोत्कर्षेण वर्तन्ते। विदुषी =पण्डिता, सा =दमयन्ती, यान् = चिकुरप्रकरान्, मूर्धनि=शिरसि, बिभर्ति =धारयति। पशुना अपि= चतुष्पदेन अपि, मूर्खेण चमरीमृगेणाऽपीति भावः। अपुरस्कृतेन=अनावृतेन, पृष्ठभागस्थापितेन वा, चामरेण= चमरीपुच्छेन, सह तत्तुलनां = चिकुरप्रकरसमीकरणं, कः=जनः, इच्छतु = वाञ्छतु, न कोऽपीति भावः।

दमयन्त्याः केशवर्णनम्

**सारांशः-** पण्डिता सा भैमी यान् केशसमूहान् शिरसि धारयन्ति; ते सर्वोत्कर्षेण वर्तन्ते। चामरेण साम्ये सति केशानां सर्वोत्कृष्टत्वं कथामित्याह- चमरमृगेण पश्चात्कृतेन चमरेण सह तेषां केशानां साम्यं हनिस्थानधारणेन कारणेन न कोऽपि अभिलषन्ति इत्यनेन केशानां सर्वोत्कर्षता समीचीना एव।

चिकुरप्रकराः- चिकुरप्रकराः=चिकुराणां प्रकराः(ष० त०)। विदुषी- वेत्तीति। विदेः- विदुषीति 'विदेः शतुर्वसुः' 'उगितश्च' इति ङीप् 'वसोः संप्रसारणम्'। तुलनाम् 'ण्यास' इति युच्। संज्ञापूर्वक विधेः नित्यत्वाल्लघूपधगुणाभावः।

**अलङ्कारः-** अत्र तुलनानिषेधस्यापुरस्कृत पदार्थहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति लक्षणात्।

**स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः।**
**जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥21॥**

**अन्वयः** - मृगाः तदखर्वेक्षणशोभया जितयोः भयात् उदयत्प्रमीलयोः स्वदृशोः सुरकण्डूयनकैतवात् सान्त्वनां जनयन्ति।

**व्याख्या-**मृगाः=हरिणाः, तदखर्वेक्षणशोभया=दमयन्तीविशालनेत्रकान्त्या, जितयोः= पराभूतयोः, अतएव भयात्=भीतेः, उदयत्प्रमीलयोः=उत्पद्यमाननिमीलनयोः, स्वदृशोः= निजनेत्रयोः, खुरकण्डूयनकैतवात् = शफघर्षणच्छलात्, सान्त्वनाम्=आश्वासनं, जनयन्ति = कुर्वन्ति।

मृगाः सदृशोः सान्त्वनां जनयन्ति

**सारांशः-** यथा लोकेऽपरपराजिताः निमीलिताक्षाः स्वजनैःभयनिवृत्तये करतलास्फालनादिना परिसान्त्व्यन्ते तद्वद् मृगाः अपि दमयन्तीनेत्रपराजिते स्वनेत्रे खुरकण्डूयनच्छला दाश्वासयन्तीति भावः।

तदखर्वेक्षण- न खर्वे (नञ्०), अखर्वे च ते ईक्षणे (क०धा०), तस्या अखर्वेक्षणे (ष०त०) तयोः शोभा, तया (ष०त०) भयात्-पञ्चमी। उदयत्प्रमीलयोः- उदयन्ती प्रमीला ययोस्ते, तयोः (बहु०)। स्वदृशोः- स्वस्य दृशौ, तयोः (ष०त०)। खुरकण्डूयनकैतवात्- खुरैः कण्डूयनम् (तृ० त०) खुरकण्डूयनम्, खुरकण्डूयनस्य कैतवं, तस्मात् (ष० त०)।

**अलङ्कारः-** अत्र कैतवशब्देन कण्डूयनमपहनुत्य सान्त्वनारोपाद् कैतवाऽपह्नुतिः नाम अलङ्कारः।

**अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि।**
**श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते ॥22॥**

**अन्वयः** - हे धरापते ! दमस्वसुः लोकयुगं, दृशौ, श्रुतदृष्टाः रमणीगुणाः अपि श्रुतिगामितया सुतरां व्यतिभाते ।।

**व्याख्या-** हे धरापते= हे भूपते! दमस्वसुः=दमयन्त्याः, लोकयुगं= मातापितृकुलयुग्मं, दृशौ= नेत्रे, श्रुतदृष्टाः =आकर्णिताऽवलोकिताः, लोकतः श्रुताः स्वयं ज्ञाताश्चेति भावः। रमणीगुणा अपि = सौन्दर्योदार्यादयः स्त्रीगुणा अपि, श्रुतिगामितया = =लोकतः श्रवणविषयतया, सुतराम्

=अत्यन्तं, व्यतिभाते = विनिमयेन भान्ति(शोभन्ते)। दमयन्त्या मातृपितृकुलयुग्मं नेत्रयुगलं स्त्रीगुणा अति प्रसिद्धिपथागतत्वेन सुतरां शोभन्त इति भावः ।।

दमस्वसुः सुतरां व्यतिभाते

**सारांशः-** हे धरापते! दमो नाम भीमस्य स्वसुर्दमयन्त्याः, मातापितृकुलयुगं, वेदप्रसिद्धतया, परस्परोत्कर्षेण भाति। तथा नेत्रे अपि कर्णान्तविश्रान्ततया परस्परोत्कर्षेण भातः। तथा ते रमणीगुणाः अपि जनैः श्रूयमाणतया व्यतिहारेण भान्ति।

सुतरां व्यतिभाते- व्यतिहारेण भान्ति। "आ- त्मनेपदेष्वनतः" इति झस्यादादेशः। सर्वत्र कर्तरि कर्मव्यतिहार इत्यात्मनेपदम्। अदादित्वाच्छपो लुक्, सर्वत्र टेरेत्वम्। श्रुतदृष्टाः- श्रुताः श्रुतिप्रसिद्धाः, ते च ते दृष्टाः लोकप्रसिद्धाश्च विशेषणयोरपि विशेषणविशेष्य भावविवक्षायां विशेषणसमासः। अत्र लोकयुगादीनां त्रयाणामपि प्रकृतत्वात् केवलप्रकृतविषयतुल्ययोगिता भेदः॥ "प्रस्तुताप्रस्तुतानाञ्च केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगिता" इति लक्षणात्।

**नलिनं मलिनं विवृण्वत्ती पृषतीमस्पृशती तदीक्षणे।**
**अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ।।23।।**

**अन्वयः-** नलिनं मलिनं विवृण्वती, पृषतीम् अस्पृशती तदीक्षणे अञ्जनाऽञ्चिते (सती) खञ्जनम् अपि रुचिगर्वदुर्विधं विदधाते ॥

**व्याख्या** - नलिनं= कमलं, मलिनं= मलीमसम्, असुन्दरमिति भावः, विवृण्वती= कुर्वाणे, विवृणुत इति, स्वसौन्दर्याऽतिशयेनेति भावः। पृषतीं= मृगीम्, अस्पृशती= स्पर्शम् अपि अकुर्वती, नेत्रसौन्दर्यस्पर्धायां मृगमपि दूरात्परिहरती इति भावः। तदीक्षणे= दमयन्तीनयने, अञ्जनाञ्चिते= कज्जलपरिष्कृते सती, खञ्जनम् अपि= खञ्जरीटं पक्षिणम् अपि, रुचिगर्वदुर्विधं= सौन्दर्याऽभिमानदरिद्रं, विदधाते= कुर्वाते।

दमयन्त्याः नेत्रे सर्वथा अपि अनुपमेये

**सारांशः-** स्वसौन्दर्याऽतिशयेन दमयन्ती कमलं असुन्दरं कुर्वन् नेत्रसौन्दर्यस्पर्धायां मृगमपि दूरात्परिहरती। कज्जलपरिष्कृते दमयन्तीनयने खञ्जरीटं पक्षिणमपि सौन्दर्याऽभिमानदरिद्रं कुर्वाते। दमयन्त्याः नेत्रे सर्वथा अपि अनुपमेये इति भावः।

**टिप्पणी-** पद्मखञ्जनमृगाक्षिणो नेत्रयोरुपमानभूताः लोके प्रसिद्धाः परं दमयन्त्याः नेत्रसमक्षमिमे तिरस्कृत्य इत्यनेनानुपमेपत्वमुक्तं तन्नेत्रयेरिति।

**अलङ्कारः**- ईक्षणयोः नलिनादिमलिनीकरणाद्यसम्बन्धे अपि सम्बन्धोक्तेः अतिशयोक्तिः। तया च उपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः।

**अधरं खलु बिम्बनामकं फलमस्मादिति भव्यमन्वयम्।**
**लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छेदं वदत् ।।24।।**

**अन्वयः**- अधरबिम्बम् इति अदः पदम् अस्याः रदनच्छदं वदत् बिम्बनामकं फलम् अस्मात् अधरं खलु इति भव्यम् अन्वयं लभते ॥

**व्याख्या** – अधरबिम्बम् -अधरबिम्बम् इत्यानुपूर्वीकम्, इति = एवम्, अदः = एतत्, पदं = शब्दः, अस्याः = दमयन्त्याः, रदनच्छदम् = ओष्ठं, वदत्= अभिदधत् प्रतिपादयदिति भावः। बिम्बनामकं= बिम्बाऽभिधेयं, फलं= सस्यम्, अस्मात् = दमयन्तीरदनच्छदात् अधरम् = अपकृष्टं, खलु= निश्चयेन, इति= अस्मात्कारणात्, भव्यम् = अबाधितम्, अन्वयं= पदार्थसंसर्गं, लभते = प्राप्नोति ।"अधरबिम्बम्" इति पदं दमयन्त्याः अधरस्य वर्णने प्रयुज्यते।

दमयन्त्याः अधरवर्णनं

**सारांशः**- दमयन्त्याः अधरमोष्टम् अभिदधत् अधरबिम्बः इत्येतद् पदं बिम्बाऽभिधेयं फलम् अस्मात् दमयन्त्योष्ठात् हीनं खलु इत्यनेन पदार्थसंसर्गं प्राप्नोति।

रदनच्छदम्- रदमानां छदः, तम् (ष० त०)। बिम्बनामकं- बिम्बं नाम यस्य तत् बहु०)। अधरविम्बम्- अधरं विम्बं यस्मात्तदिति बहुव्रीहिसमासे च सति, भव्यम् अबाधितमन्वयं वृत्तिपदार्थसंसर्गलक्षणं लभते। समर्थसमासाश्रयेणे "समर्थः पदविधिः" इति समर्थपरिभाषा भज्येतः तर्हि नोपमा स्यादिति भावः। अत दमयन्तीदन्तच्छब्दस्य बिम्बाधरीकरणासम्बन्धेऽपि सम्बन्धोक्तेः अतिशयोक्तिः, पूर्ववदध्वनिश्च।

**हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।**
**कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम।।25।।**

**अन्वयः**- इन्दुमण्डलं दमयन्तीवदनाय वेधसा हृतसारम् इव कृतमध्यबिलं धृतगम्भीरखनीखनीलिम विलोक्यते ।।

**व्याक्या**- इन्दुमण्डलं= चन्द्रबिम्बं, दमयन्तीवदनाय= दमयन्तीवदनं निर्मातुं, वेधसा= ब्रह्मणा, हृतसारम् इव= गृहीतश्रेष्ठभागम् इव, कृतमध्यबिलं= विहिताऽन्तरच्छिद्रं, सत्, धृतगम्भीरखनीखनीलिम= धृतगभीरनिम्न गर्ताकाशनैल्यं, विलोक्यते= दृश्यते।

इन्दुमण्डलं दमयन्तीवदनत न्निर्माणायेत्यर्थः

**सारांशः-** ब्रह्मणा दमयन्त्या मुखं निर्मातुं चन्द्र बिम्बात्सुन्दरभागो गृहीतः, अतो गृहीतसुन्दरभागे चन्द्रबिम्बे छिद्रं सञ्जातं तत्राऽऽकाशस्य नीलिमा पतितः स एव चन्द्रस्य कलङ्क इति भावः। चन्द्रः सकलङ्कः, दमयन्त्याः मुखं निष्कलङ्कः। तस्माद्धेतोश्चन्द्रापेक्षया दमयन्तीवदनं मनोहरतरमिति भावः।

इन्दुमण्डलम्- इन्दोः मण्डलम्( ष०त०)। दमयन्तीवदनाय=दमयन्त्या वदनं, तस्मै(ष०त०), "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी। हृतसारं- हृतः सारो यस्मात् तत् (बहु०)। कृतमध्यबिलं मध्ये बिलम् (स० त०), कृतं मध्यबिलं यस्य तत् (बहु०)। धृतगम्भीरखनीखनीलिभ- गम्भीरा चाऽसौ खनी (क० धा०), नीलस्य भावो नीलिमा, नील+ इमनिच्, खस्य नीलिमा (ष० स०), गम्भीरखन्यां खनीलिमा (स० त०), धृतो गम्भीरखनीखनीलिमा येन तत् (बहु०)।

**अलङ्कारः-** काव्यलिङ्गः, उत्प्रेक्षा च।

प्रकारान्तरेण मैमीमुखस्य चन्द्राधिक्यमाह-

**घृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डरं विधिः।**
**भ्रमयत्युचितं विदर्भजाऽऽनननीराजनवर्द्धमानकम्॥26॥**

**अन्वयः -** विधि धृतलाञ्छनगोमयाञ्चनम् आलेपनपाण्डरं विधुं विदर्भ जाऽऽनननीराजनवर्द्धमानकं भ्रमयति, इति उचितम् ।।

**व्याख्या-** विधिः= ब्रह्मा, धृतलाञ्छनगोमयाऽञ्जनं= गृहीतमृगचिह्नगोमय संश्लेषणम्, आलेपनपाण्डरं= पिष्टोदकशुक्लवर्णं, तत्सदृशनिजकान्तिसुधाधवलितं, विधुं= चन्द्रमसं, विदर्भजाऽऽनननीराजन वर्द्धमानकं= दमयन्तीमुखारार्तिकशरावं, किरणदीपकलिकायुक्तं इति भावः। भ्रमयति= भ्रमणं कारयति, इति= इत्येतद्, उचितं= योग्यम्, लोकोत्तरत्वादिति भावः। एवं नीराजयन्तीति देशाऽऽचारः।

चन्द्रमासे दमयन्त्याः मुखं सुन्दरमस्ति

**सारांशः-** गोमयलिप्तेन चूर्णादिचिह्नेन शरावेण दृष्टिदोषनिरासार्थं नीराजना क्रियत इति लोकाचारः। ब्रह्मदेवः कलङ्कयुक्तं चन्द्रं भैम्याः आनननीराजनार्थं शरावरूपेण भ्रमयति इत्येतद् लोकोत्तरत्वाद् उचितं वर्तते।

धृतलाञ्छनगोमयाऽञ्चनं- गोः पुरीषं गोमयं, गोमयेन अञ्चनम् (तृ० त०)। धृतं लाञ्छनम् एव गोमयाऽञ्चनं येन, तम्( बहु०)। आलेपनपाण्डरम्-

आलेपनेन पाण्डरः, तम् (तृ० त०)। विदर्भजाऽऽननीराजनवर्द्धमानकं- विदर्भजाया आननम् (ष० त०), तस्य नीराजनं (ष० त०), तस्य वर्द्धमानकं, तत् (ष० त०)। भ्रमयति - भ्रम + णिच + लट् + तिप्।

अत्र विधुताल्लाञ्छनादेर्नीराजन शराव गोमयादित्वेन रूपणात् सावयवरूपकम्।

सुषमाविषये परीक्षणे निखिलं पद्मभाजि तन्मुखात्।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुञ्झति स्फुटम् ॥27॥

**अन्वयः-** सुषमाविषये परीक्षणे निखिलं पद्मं तन्मुखात् अभाजि, (अत एव) अधुना अपि भङ्गलक्षणं सलिलोन्मज्जनं न उज्झति स्फुटम् ॥

**व्याख्या-** सुषमाविषये= परमशोभाविषये, परीक्षणे= परीक्षायां, जल= दिव्यशोधने कृते सतीति भावः। निखिलं= समस्तं, पद्म= कमलं, तन्मुखात्= दमयन्त्याननात्, अभाजि= अभञ्जि, स्वयमेव भग्नमभूदित्यर्थः। अत एव अधुना अपि= साम्प्रतम् अपि, भङ्गलक्षणं= पराजयचिह्नं, सलिलोन्मज्जनं= जलादूर्ध्वभवनं, न उज्झति= न जहाति, स्फुटम्= इव, जलदिव्योन्मज्जनं पराजयर्चिह्नत्वस्मरणादिति भावः।

जलदिभ्योन्म ज्जनस्य पराजयर्चिह्न त्वस्मरणादिति

**सारांशः-** परमशोभाविषये परीक्षायां समस्तं कमलं दमयन्त्याननात् स्वयमेव भग्नमभूत्। अत एव साम्प्रतमपि पराजयचिह्नं जलादूर्ध्वभवनं न जहाति इत्येतत् स्पष्टमेव।

सुषमाविषये- सुषमा विषयो यस्मिन् तत्, तस्मिन् (बहु०)। तन्मुखात्- तस्या मुखं, तस्मात् (ष०त०)। भङ्गलक्षणं- भङ्गो लक्षणं यस्य तत् (बहु०)। सलिलोन्मज्जनं- सलिलात् उन्मज्जनं, तत् (ष० त०)। उज्झति- "उज्झ उत्सर्गे" धातुः लट्+तिप्।

**अलङ्कारः-** उत्प्रेक्षा। "स्फुटम्" इति पदं उत्प्रेक्षा वाचकम्।

धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ।
नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः॥28॥

**अन्वयः -** तद्भ्रुवौ विश्वजयाय उदिते रतिपञ्चबाणयोः धनुषी, तदुच्च- नासिके त्वयि नालीकविमुक्तिकामयोः नलिके न॥

**व्याख्या-** तद्भ्रुवौ= दमयन्ती भ्रुवौ, विश्वजयाय= जगद्विजयाय, उदिते= उत्पन्ने, रतिपञ्चबाणयोः= रतिकामदेवयोः, धनुषी= चापौ, ध्रुवम्। एवं च तदुच्चनासिके= दमयन्त्युन्नतनासाच्छिदे, त्वयि= भवति, नालीकविमुक्तिकामयोः= बाणप्रहाराऽर्थिनोः, नलिके न= शराऽऽधारनलौ न? पञ्चबाणाः -

"अरविन्दमशोकं च चूतं च नवमल्लिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥"

कमलम्, अशोकं, चूतं, नवमल्लिका, नीलोत्पलं इत्यादि पञ्च पुष्पाणि कामदेवस्य बाणाः।

भ्रूनासिकं दृष्ट्वा सर्वोऽपि कामाधीनो भवती

**सारांशः-** दमयन्तीभ्रुवौ जगद्विजयाय उत्पन्ने रतिकामदेवयोः चापौ वर्तते। अपि च तस्याः दमयन्त्याः उन्नतनासापुटे बाणप्रहाराऽर्थिनोः द्रोणीचापे न किम्? द्रोणिचापे एवेत्यर्थः। दमयन्त्याः भ्रूनासिकं दृष्ट्वा सर्वोऽपि कामवशो भवतीति तात्पर्यम्।

रतिपञ्चबाणयोः- पञ्च बाणा यस्य सः, कामदेवः(बहु०)। पञ्चबाणश्च रतिपञ्चबाणौ, तयोः (द्वन्द्व०)। नालीकविमुक्तिकामयोः- विमुक्ति कामयेते इति विमुक्तिकामौ, नालीकानां विमुक्तिकामौ, तयोः (ष०त०)। विमुक्तिं कामयेते इति तथोक्तयोस्तयोः, शिलिकामिभिक्षाचरेभ्यो ण इति णप्रत्ययः। विश्वजयाय- विश्वस्य जयः, तस्मै (ष० त०), "तुमर्थाच्च भाववचनात्" इति चतुर्थी। तद्भ्रुवौ = तस्या भ्रुवौ (ष० त०)। तद्भ्रुवौ-विश्वजयायोदिते उत्पन्ने रतिपञ्चबाणयोर्धनुषी, नूनमित्यादि व्यञ्जकप्रयोगाद्गम्योत्प्रेक्षा। अस्मिन् श्लोके रूपकं, उत्पेक्षा च।

**सदृशी तव शूर ! सा परं जलदुर्गस्थमृणालजिद्भुजा।**
**अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥29॥**

**अन्वयः** - हे शूर ! जलदुर्गस्थमृणालजिद्भुजा मित्रजुषाम् अपि सरोरुहां श्रियः करलीलया गृहयालुः सा तव परं सदृशी ।।

**व्याख्या** - हे शूर= हे वीर!, जलदुर्गस्थमृणालजिद्भुजा= तिष्ठन्तीति जलदुर्गस्थानि, सा= दमयन्ती, मित्रजुषाम् अपि= अर्कसेविनां, सुहृत्सहायसम्पन्नानाम् अपि। मित्रः= सूर्यः अथवा सुहृदः। सरोरुहां= कमलानां, श्रियः= शोभाः, सम्पदश्च।

दमयन्त्याः पाणिः कमलादपि मनोहरः

**सारांशः-** दमयन्त्या भुजौ मृणालादपि कोमलौ, दमयन्त्याः पाणिः कमलादपि मनोहर इति भावः। ईदृशी दमयन्ती तत्र अत्यन्तमनुरूपा इत्यत्राशयः। शूरस्य शूरैव भार्या भवितुमर्हतीति भावः।

जलदुर्गस्थमृणालजिद्भुजा- जलम् एव दुर्ग: (रूपक०); तस्मिन् तिष्ठन्तीति जलदुर्गस्थानि, जलदुर्ग + स्था+क: (उपपद०), तानि च तानि मृणालानि (क० धा०), तानि जयत इति जलदुर्गस्थमृणालजितौ, जलदुर्गस्थमृणाल +जि+क्विप्। तादृशी भुजौ यस्याः सा(बहु०)। मित्रजुषां- मित्रं जुषन्त इति मित्रजूंषि तेषाम्, मित्र + जुष् + क्विप्। सरोरुहां- सरसि रोहन्तीति सरोरुहि, तेषां, सरस्+ रुह्+ क्विप् (उपपद०) + आम्। करलीलया=करयोः अथवा कराणां लीला, तया (ष० त०)। गृहयालुः =ग्रहणशीला, गृहयालुः - गृहयते इति, "गृह ग्रहणे" इति चौरादिक धातोः "स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्" इति सूत्रेण आलुच् प्रत्ययः।

**अलङ्कारः-** अतिशयोक्तिः।

**वयसी शिशुतातदुत्तरे सुदृशि स्वाऽभिविधिं विधित्सुनी।**
**विधिनाऽपि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः॥30॥**

**अन्वयः** – सुदृशि स्वाऽभिविधिं विधित्सुनी शिशुतातदुत्तरे वयसी विधिना रोमरेखया प्रविभज्य कृतसीम्नी अपि न रज्यतः।

**व्याख्या-** सुदृशि= सुलोचनायां, सुन्दर्यां दमयन्त्यामिति भावः। स्वाऽभिविधि= निजव्याप्तिं, विधित्सुनी= विधातुम्, इच्छती, शिशुतातदुत्तरे= बाल्ययौवने, वयसी=अवस्थे, विधिना=ब्रह्मणा, सीमाभिज्ञेनेति भावः। रोमरेखया = लोमपङ्क्त्या, सीमाचिह्नेनेति भावः। प्रविभज्य =प्रविभागं कृत्वा, कृतसीम्नी अपि =विहितमर्यादे अपि, न रज्यत = न सन्तुष्यतः, रम्यवस्तु दुस्त्यजमिति भावः।

स्वाभिविधिं स्वव्याप्तिं, विधित्सुनी विधातुमिच्छती

**सारांशः-** सुनयनायां दमयन्त्यां स्वव्याप्तिम् अहमहमिकया स्वयमेव आक्रमितुमिच्छती बाल्ययौवने अवस्थे विधिना कालतो विभागं कृत्वेऽपि उभे संवलिते एव तिष्ठतः। रम्यत्वाद् बाल्यं त्यक्तुं न शक्नोति, तारुण्यं च आगन्तुम् इच्छतीति भावः।

सुदृशि= शोभने दृशौ यस्याः सा सुदृक्, तस्याम् (बहु०)। स्वाऽभिविधि- स्वस्य अभिविधिः, तम्(ष० त०)। विधातुमिच्छुनी- वि+धा+सन्+उ+ओ। शिशुतातदुत्तरे- शिशोर्भावः शिशुता, शिशु+तल्+टाप्। तस्था उत्तरम्

(ष० त०)। शिशुता च तदुत्तरं (यौवनम्) (द्वन्द्वः)। रोमरेखया - रोम्णां रेखा तया (ष० त०)। प्रविभज्य- प्र+वि+भज्+क्त्वा (ल्यप्)। कृतसीम्नी- कृता सीमा ययोस्ते (बहु०)। रज्यतः- "रञ्ज रागे" धातुः लट्+तस्। "अनिदितां हल उपधायाः क्ङिति" इति नकारलोपः।

**अलङ्कारः-** अत्र प्रस्तुतवयो विशेषणसाम्याद् अप्रस्तुताविवादप्रतीतेः समासोक्तिरलङ्कारः।

## Summarised Overview

हंसः स्ववाक्ये आदरं याचते – 'मम किञ्चित् आग्रहः अस्ति, भवता अवश्यं शृणुत' इत्येवं रीत्या। अथ हंसः भीमराजानं तस्य पुत्रीं च वर्णयति। अनन्तरं भैम्याः लोकोत्तरे गुणोत्कर्षे मिथ्यात्वनिरासार्थं पुराणप्रसिद्धमितिहासं सूचयति। अत हंसः दमयन्त्याः नामधेयं तद्व्युत्पत्तिं च प्रदर्शयति। तस्याः केशवर्णनम्, नेत्रवर्णनम् च। मृगाः अपि दमयन्तीनेत्रपराजिते स्वनेत्रे खुरकण्डूयनच्छला दाश्वासं जनयन्ति। नेत्रसौन्दर्यस्पर्धायां मृगमपि दूरात्परिहरती, दमयन्त्याः नेत्रे सर्वथाऽप्यनुपमेये इत्यर्थः। दमयन्त्याः अधरस्य वर्णनं प्रतिपादयति- अधरबिम्बम्- दमयन्तीरदनच्छदम् इत्यादिना। दमयन्त्याः वदनस्य वर्णनं- 'ब्रह्मणा दमयन्त्या मुखं निर्मातुं चन्द्रबिम्बात्सुन्दरभागो गृहीतः, अतो गृहीतसुन्दरभागे चन्द्रबिम्बे छिद्रं सञ्जातं तत्राऽऽकाशस्य नीलिमा पतितः स एव चन्द्रस्य कलङ्कः' इति। दमयन्त्याः भुजौ मृणालादपि कोमलौ, दमयन्त्याः पाणिः कमलादपि मनोहरः इति। दमयन्त्याः भ्रूनासिकं दृष्ट्वा सर्वोऽपि कामवशो भवति। सुदृशि दमयन्त्यां स्वाभिविधिं स्वव्याप्तिं, विधित्सुनी विधातुमिच्छती। सा दमयन्ती अनन्यसुन्दरी, उच्चकुलप्रसूता, अनुरागवती चासीत्। यथा-

**हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।**
**कृतमध्यविलं विलोक्यते धृतगम्भीरखनीलिम ।।**

## Assignments

**श्लोकं व्याख्यात**

1. दमनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात् ।
   वरमाप स दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयाम् ।।17।।

2. सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात्।

अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुञ्जति स्फुटम् ॥27॥

आशयं विशदयत

1. विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः।
2. जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात्
3. अपि खज्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥23॥

उत्तरं लिखत

1. विदर्भभू कः? कस्य पुत्री का?
2. तनया वरमवाप। कः? कस्मात्?
3. दमयन्तीति ततोऽभिधां ददौ। का? कुतः?
4. चिकुरप्रकुरा जयन्ति। कस्याः? कथम्?
5. स्वदृशोः सान्त्वनां जनयन्ति। के? कथम्?
6. दमस्वसुर्व्यतिभाते सुतराम्। स्पष्टयत।
7. इति भव्यम् अन्वयम् लभते। किम्?
8. विधिः कं नीराजनवर्द्धमानकं भ्रमयति?

व्याकरणविशेषं लिखत

1. साऽर्थकम्
2. गृहयालुः
3. रोमरेखया

अलङ्कारविशेषं प्रतिपादयत

1. स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।
   यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥16॥
2. श्रियमेव परं धराऽधिपाद्गुणसिन्धोरुदितामवेहि ताम्।
   व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः॥19॥
3. चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान्।

पशुनाऽप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥20॥

**निबन्धं रचयत**

1. दमयन्त्याः नामधेयं तद्व्युत्पतिः च ।

# Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed) Sahitya Academy, Trissur


# References


1. आचार्य श्रीशेषराजषर्म रेग्मीः, नैषधीयचरितम्, (1-3 सर्गाः) चौखम्बा सुरभारती प्रकाशन् वारणासि 2008
2. दाधीचपण्डितशिवदत्तशर्मा, श्रीहर्षरचितं नैषधीयचरितम्,
3. डा.सुरेन्द्रदेवशास्त्री -मल्लिनाथकृतजीवातुसहितम्, नैषधीयचरितमहाकाव्यम्, चौखम्बा अरियण्टालिया, वारणासि, 20321
4. आचार्यजगन्नाथपाठकः-ध्वन्यालोकः, चौखम्बाविद्याभवन्, वारणासी 1992
5. व्याख्याकारः आचार्यः कृष्णमोहनशास्त्री, साहित्यदर्पणः, चौखम्बा संस्कृतसंस्थान्, वारणसी।
6. सम्पादकः, डा. रत्नमोहनझा, चन्द्रालोकः, राष्ट्रीयसंस्कृतसंस्थान्, नवदेहली
7. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
8. Sivabalak Dwivedi, Prakash Mitra Sastri, Naishadhiyacarita - A Study, Shishak Prakasan, Kanpur 1981

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# द्वितीयसर्गे 31- 40 श्लोकाः

## Learning Outcomes

- नैषधीयचरितमहाकाव्यविषये परिचयं लभेयुः।
- महाकवेः व्याकरणविशेषज्ञानम्।
- नैषधीयचरितमहाकाव्ये नलकथयाः महत्वं प्रतिपादयितुं शक्ष्यति।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

दमयन्त्याः नामधेयं तद्व्युत्पतिं च प्रदर्शयति। तस्याः केशवर्णनम्, नेत्रवर्णनम्। - दमयन्त्याः अधरवर्णनं प्रतिपादयति- 'अधरबिम्बम्- दमयन्तीरदनच्छदम्।' इत्यादीनां दमयन्त्याः वदनस्य वर्णनं- ब्रह्मणा दमयन्त्या मुखं निर्मातुं चन्द्र बिम्बात्सुन्दरभागो गृहीतः, अतो गृहीतसुन्दरभागे चन्द्रबिम्बे छिद्रं सञ्जातं; तत्राऽऽकाशस्य नीलिमा पतितः स एव चन्द्रस्य कलङ्क इति। अस्मिन् एकके (श्लोकाः31-40) हंसवर्णनं प्रतिपादयति।

## Keywords

कान्तिझरैः, अगाधतां, चक्रभ्रमकारितागुणः, निर्मितबर्हगर्हणः, इभराट्, चतुरङ्गुलम्, धृततच्चतुरङ्गुलि, परिणाहिना, सहंसकीकुरुतः, सदसत्संशयगोचरोदरी।

# Discussion

अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम्।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥31॥

**अन्वयः** - कान्तिझरैः अगाधतां गमिते तद्वपुषि प्रसर्पतोः स्मरयौवनयोः द्वयोः अपि उभौ कुचौ प्लवकुम्भौ भवतः खलु।

**व्याख्या** - श्लोकत्रयेण पयोधरौ वर्णयति। कान्तिझरैः= लावण्य प्रवाहैः, अगाधताम्= अतलस्पर्शताम्, दुरवगाहतामिति भावः। गमिते= प्रापिते, तद्वपुषि= दमयन्तीशरीरे, प्रसर्पतोः= प्लवमानयोरिति भावः। स्मरयौवनयोः= कामतारुण्ययोः, द्वयोरपि= उभयोरपि, उभौ = द्वौ, कुचौ= पयोधरौ, प्लवकुम्भौ= तरणकलशौ, भवतः= विद्येते, खलु= निश्चयेन, निश्चयेन वर्तते इत्यर्थः।

दमयन्त्याः पयोधरौ वर्णयति

**सारांशः**- लावण्य प्रवाहैः दुरवगाहतां गमिते दमयन्तीशरीरे तरतोः कामतारुण्ययोः द्वयोरपि उभौ पयोधरौ निश्चयेन तरणकलशौ वर्तते। लोकेऽपि तरद्भिरनिमज्जनाय कुम्भादिकमाश्रीयते इति प्रसिद्धम्।

कान्तिझरैः- कान्तीनां झरा, तैः(ष० त०)। गमिते = गम् +णिच्+क्त+ङि। तद्वपुषि =तस्या वपुः, तस्मिन् (ष० त०)। प्रसर्पतोः = प्रसर्पत इति प्रसर्पति, तयोः, प्र+सुप्+लट् (शतृ)+ओस, प्रसर्पणं कुर्वतोः, प्लवमानयोरिति भावः। स्मरयौवनयोः- स्मरश्च यौवनं च स्मरयौवने, तयोः (द्वन्द्वः)। प्लवकुम्भौ- प्लवस्य कुम्भौ(ष०त०)।

**अलङ्कारः**- वस्तुध्वनिः। अत्र कुचयोः स्मरयौवनप्लवन कुम्भत्वोत्प्रेक्षया तयोरौत्कठ्यं कुचयोश्चातिवृद्धिर्व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः।

**कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः।**
**स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत् ॥32॥**

**अन्वयः**- निजहेतुदण्डजः चक्रभ्रमकारितागुणः कलसे किमु? यत् स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमम् आतनोति ॥

**व्याख्या**- निजहेतुदण्डजः= स्वकारणदण्डजन्यः, चक्रभ्रमकारितागुणः= कुलालभाण्डभ्रमणजनकत्वधर्मः, कलसे किमु= दण्डकार्यरूपे घटे किम्, सङ्क्रान्त इति शेषः। यत्= यस्मात् कारणात्, सः = कलसः, तदुच्चकुचौ = दममस्त्युन्नतपयोधरौ, भवन् =सन्, दमयन्तीकुचस्वरूपेण परिणतः सन्निति भावः। प्रभाझरे= लावण्यप्रवाहे, चक्रभ्रमम्= चक्रवाकभ्रान्तिं, कुलालदण्डप्रमाणं च। आतनोति= प्रकरोति।

सर्वोऽपि स्तनकान्तिदर्शनेन स्या कामान्धो भवति

**सारांशः**- कलशतुल्य तुरङ्गत्वेन तथा कान्तिमत्वेन च दमयन्त्यास्तनौ कुलालचक्रभ्रमणं तथा लोकसमूहस्य भ्रमं मदजनिदं मोहं च आतनोति। स्तनकान्तिदर्शनेन सर्वोऽपि कामान्धो भवतीति भावः।

निजहेतुदण्डजः- निजश्चासौ हेतुः (क० धा०) स चाऽसौ दण्डः (क० धा०), तस्माज्जातः, निजहेतुदण्ड +जन् + डः। तदुच्चकुचौ- उच्चौ च तौ कुचौ (क० धा०)। तस्या उच्चकुचौ (ष० त०)। भवन्- भवतीति, भू+लट् + शतु + सु। प्रभाझरचक्रभ्रमं- प्रभाणां झरः प्रभाझरः तस्मिन् प्रभाझरे। चक्रस्य भ्रमः चक्रभ्रमः। प्रभाझरे चक्रभ्रमः प्रभाझरचक्रभ्रमः। तम्। आतनोति- आङ् + तनु + लट् + तिप् ।

**अलङ्कारः**- उत्प्रेक्षा। कलसे चक्रभ्रमकारितालक्षणनिमित्तकारणाशङ्कया।

**भजते खलु पण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ॥**
**अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥33॥**

**अन्वयः** - दमस्वसुः चिकुरैः निर्मितबर्हगर्हणः शिखी षण्मुखं कुचशोभया जितकुम्भः इभराट् अपि जम्भरिपुं भजते खलु॥

**व्याख्या**- दमस्वसुः= दमभगिन्याः, दमयन्त्या इत्यर्थः। चिकुरैः= केशकलापैः। निर्मितबर्हगर्हणः= कृतपिच्छनिन्दः, शिखी= मयूरः, षण्मुखं= षडाननं, कार्तिकेयमित्यर्थः, भजते= आश्रयते, खलु= निश्चयेन। तथैव दमस्वसुः= दमयन्त्याः, कुचशोभया= पयोधरकान्त्या, जितकुम्भः= पराजितमस्तकपिण्डः, इभराट् अपि= ऐरावतः अपि, जम्भरिपुं=

जम्भभेदिनम्, इन्द्रमित्यर्थः, भजते= आश्रयते, खलु= निश्चयेन, उभयत्रापि भीत्या उत्कर्षप्राप्तीच्छया वेति बोद्धव्यम् ।।

दमयन्त्याः गात्रविनामकारिणी कुचशोभा जम्भतुल्या

**सारांशः-** दमयन्त्याः केशकलापैः कृतपिच्छनिन्दः मयूरः षडाननम् आश्रयते। तथैव तस्याः पयोधरकान्त्या पराजितमस्तकपिण्डः ऐरावतः अपि इन्द्रं निश्चयेन आश्रयते इत्यत्राशयः। उभयत्रापि भीत्या उत्कर्षप्राप्तीच्छया वा इति बोद्धव्यम्।

दमस्वसुः- दमस्य स्वसा, तस्याः (ष० त०), निर्मितबर्हगर्हणः- बर्हाणां गर्हणा (ष० त०), निर्मिता बर्हगर्हणा यस्य सः (बहु०)। शिखा- शिखा (चूडा) अस्यास्तीति, शिखा शब्दे “श्रीह्यादिभ्यश्च" इति सूत्रेण इनि। षड्मुखं- षट् मुखानि यस्य सः, तम् (बहु०) "यरोऽनुनासिकेऽनुनासिको वा " इति अनुनासिकः ण आदेशे संयोगे "षड्मुखम्"। भजते- "भज सेवायाम्" धातुः लट् + त। कुचशोभया- कुचयोः शोभा, तया (ष० त०)। जितकुम्भः- जितौ कुम्भौ यस्य सः (बहु०)। इभराट्- राजति इति राट्, "राजृ दीप्तौ" धातोः "सत्सूद्विष" इत्यादि सूत्रेण क्विप् प्रत्ययः। इभानां राट् ( ष० त०)। जम्भरिपुम्- जम्भस्य रिपुः, तम् (ष० त०)।

**अलङ्कारः-** अत्र शिख्यैरावतयोः षण्मुखजम्भारिभजनस्य जितबर्हत्वजित कुम्भत्वपदार्थहेतुकत्वात्तद्धेतुके काव्यलिङ्गे तदसम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिश्च।

**उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना ।**
**चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ।।34।।**

**अन्वयः-** दमस्वसुः उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना चतुरङ्गुल मध्यनिर्गतत्रिवलिभ्राजि कृतम्।

**व्याख्या-** दमस्वसुः= दमयन्त्या, उदरं= जठरं, नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन=निम्नमध्यप्रदेशपश्चाद्भागतास्फुटीभवद्वृद्धाङ्गुलिन्यासस्थानेन, मुष्टिना = सम्पीण्डिताङ्गुलिपाणिना, चतुरङ्गुलमध्यनिर्गतत्रिबलिभ्राजि = अङ्गुलिचतुष्टयाऽन्तरालनिः सृतवलित्रयशोभि, कृतं = विहितं, कौतुकिना विधिनेति शेषः। मुष्टिग्राह्यमध्येयं दमयन्तीति भावः।

मुष्टिग्राह्यमध्येयं दमयन्ती

**सारांशः-** कौतुकिना विधिना दमयन्त्याः उदरं निम्नमध्यप्रदेश पश्चाद्भागतास्फुटीभवद् वृद्धाङ्गुलिन्यासस्थानेन सम्पीण्डिताङ्गुलिपाणिना अङ्गुलिचतुष्टयाऽन्तरालनिः सृतवलित्रयशोभि कृतमित्यत्राशयः। मुष्टिग्राह्यमध्येया इयं दमयन्तीति भावः।

दमस्वसुः- दमस्य स्वसा, तस्याः (ष० त०)। नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन- नतः मध्यः यस्य तत् (बहु०), नतमध्यं पृष्ठं यस्य (उदरस्य) तत् (बहु०), तस्य भावः ततः, (नतमध्यपृष्ठ + ल् + टाप्)। स्फुरत् अङ्गुष्ठपदं यस्य सः (बहु०)। नतमध्यपृष्ठतया स्फुरदङ्गुष्ठपदः, तेन(तृ० त०)। चतुरङ्गुलमध्यनिर्गतत्रिवलिभ्राजि- चतसृणाम् अङ्गुलीनां समाहारः चतुरङ्गुलम्, चतुरङ्गुलस्य मध्याः(ष०त०), चतुरङ्गुलमध्येभ्यो निर्गतम् (ष०त०), तिसृणां बलीनां समाहारः त्रिवलि, चतुरङ्गुलमध्यनिर्गतं च तत् त्रिवलि (क० धा०) तेन भ्राजते तच्छीलं, चतुरङ्गुलमध्यनिर्गतत्रिवलि +भ्राज्+णिनि+सु (उपपद०)।

**अलङ्कारः-** मुष्टिग्रहणादङ्गुष्ठनोदनात् पृष्ठमध्ये निम्नता उदरे च चतुरङ्गुलिनोदनाद वलित्रयाविर्भावः चेत्युत्प्रेक्षते।

प्रकारान्तरेणोदरमेव वर्णयति-

> उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु?
> धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥35॥

**अन्वयः-** कः अपि कुतुकी दमस्वसुः उदरं मुष्टिना परिमाति किमु? यत् सहेमकाञ्चिभिः वलिभिः धृततच्चतुरङ्गुलि इव भाति॥

**व्याख्या-** प्रकारान्तरेण उदरमेव वर्णयति-उदरमिति। कः अपि= अज्ञातनामधेयो जनः, कुतुकी = कुतूहली सन्, दमस्वसुः=दमयन्त्याः। उदरं= जठरं, मुष्टिना= सम्पीडिताऽङ्गुलिपाणिना, परिमाति किमु?= परिच्छिनत्ति किम्?, यत्= यस्मात्कारणात्, सहेमकाञ्चिभिः= सुवर्णमेखलासहिताभिः, वलिभिः= तिसृभिः उदररेखाभिः, धृततच्चतुरङ्गुलि इव= धृतपरिमात्रङ्गुलीचतुष्टयम् इव, भाति= शोभते।।

उदरवर्णनम्

**सारांशः-** कोऽपि कुतूहली दमयन्त्याः जठरभागं अङ्गुलिपाणिना परिच्छिनत्ति किम्? कुतः इति चेत् सुवर्णमेखलासहिताभिः तिसृभिः उदररेखाभिः धृतपरिमात्रङ्गुलीचतुष्टयम् इव शोभते। अनेन तस्याः उदरस्य कनकसावर्ण्यं सूचितम्।

कुतुकी- कुतुकम् अस्याऽस्तीति, कुतुक + इनि। परिमाति- परि-उपसर्गपूर्वक ,'माङ् माने" धातुः लट्, किमु-उत्प्रेक्षावाचकः शब्दः। सहेमकाञ्चिभिः- हेम्नः काचिः (ष० त०)। तया सहिताः सहेमकाञ्चयः,

ताभिः (तुल्ययोग बहु०)। धृततच्चतुरङ्गुलि- चतुःसङ्ख्यका अगुल्यः चतुरङ्गुल्यः (मध्यमपदलोपी स०), तस्य(परिमातुः) चतुरङ्गुल्यः (ष०त०) धृताः तच्चतुरङ्गुल्यो येन तत् (बहु०)।

**अलङ्कारः**- उत्प्रेक्षा।

**पृथुवर्तुलतान्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया।**
**विधिरेकक चक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ।।36।।**

**अन्वयः** - पृथुवर्तुलतान्नितम्बकृत् विधिः मिहिरस्यन्दनशिल्पशिक्षया एककचक्रचारिणं मान्मथं रथं निर्मित्सति किमु॥

**व्याख्या-** पृथुवर्तुलतन्नितम्बकृत् = विशालवृत्तदमयन्तीकटिपश्चाद्भागनिर्मात, विधिः = ब्रह्मा, मिहिरस्यन्दनशिल्पशिक्षया = रविरथनिर्माण अभ्यासपाटवेन, एककचक्रचारिणम्= एका किरथाऽङ्गचरणशीलं, मान्मथं= मन्मथसम्बन्धिनं, रथं= स्यन्दनं, निर्मित्सति किमु?= निर्मातुम् इच्छति किम्? ब्रह्मा सूर्यस्येव मन्मथस्यापि एकचक्रं रथं निर्मातुमिच्छति किम्? इति भावः। अश्लोस्मिन् के उत्प्रेक्षालङ्कारः।

नितम्बदर्शनान् मदनप्रादुर्भावो भवति

**सारांशः**- विशालवृत्तदमयन्तीकटिपश्चाद्भागनिर्माता ब्रह्मदेवः रविरथनिर्माणाभ्यासपाटवेन एकाकिरथाङ्गचरणशीलं मन्मथसम्बन्धिनं रथं निर्मातुम् इच्छति किम्?

पृथुवर्तुलतन्नितम्बकृत्- तस्या नितम्बः (ष० त०), पृथुवर्तुलतन्नितम्ब + कृ + क्विप् + सु (उपपद०)। मिहिरस्यन्दनशिल्पशिक्षया- मिहिरस्य स्पन्दनः (ष० त०), तस्य शिल्पं (ष० त०), तस्य शिक्षा, तया (ष० त०)। एककचक्रचारिणम्- एकम् एव एककम् 'एक' शब्दः 'एकादा किनिच्चाऽसहाये' इति सूत्रे कन् प्रत्ययः, एककं च तत् चक्रं (क० धा०), तेन चरतीति तच्छीलः, तम्, एककचक्र + चर + णिनि + अम् (उपपद०)। मन्मथं- मन्मथस्य अयं मान्मथः, तम्, मन्मथ शब्दे 'तस्येदम्' इति सूत्रेण अण्, 'तद्धितेष्वचामादेः' इति सूत्रेण आदिवृद्धिः। निर्मित्सति किमु- निर्- उपसर्गपूर्वक माङ् धातुः सन् + लट् + तिप्। मातेः सन्नन्ताल्लट्। "सनि मीमा" इत्यादिना इसादेशः। "सस्यार्धधातुक" इति सकारस्य तकारः। "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः।

तरुमूरुयुगेण सुन्दरी किमु रम्भां परिणाहिना परम्।
तरुणीमपि जिष्णुरेव तां धनदाऽपत्यतपःफलस्तनीम् ।।37।।

**अन्वयः** - सुन्दरी परिणाहिना ऊरुयुगेण रम्भां तरुं परं जिष्णुः किमु? किमु धनदाऽपत्यतपःफलस्तनीं तां तरुणीम् अपि जिष्णुः एव।।

**व्याख्या-** सुन्दरी= रुचिराङ्गी, दमयन्तीत्यर्थः। परिणाहिना= विपुलेन, ऊरुयुगेण= सक्थियुग्मेन, रम्भां= रम्भां नाम; तरुं= वृक्षं, परं केवलं, जिष्णुः= जयशीला इति, किमु किं वक्तव्यम्, अपि तु धनदाऽपत्यतपःफलस्तनी= कुबेरपुत्रतपःफलभूतकुचां, तां= प्रसिद्धां रम्भां, तरुणीम् अपि = युवतीम् अपि, जिष्णुः एव = जयशीला एव।

दमयन्ती ऊरुसौन्दर्य वर्णनम्

**सारांशः**- दमयन्ती ऊरुसौन्दर्येण न केवलं रम्भां नाम तरुमेव जितवती अपि च कुबेरपुत्रतपःफलभूतकुचां रम्भां नामाऽप्सरोविशेषमपि जितवतीति भावः। अस्मिन् श्लोके अतिशयोक्ति अलङ्कारः।

परिणाहिना- परिणाहः अस्याऽस्तीति परिणाहि, तेन, परिशाह + इनि + टा। धनदाऽपत्यतपःफलस्तनी- धनं ददातीति धनदः, धनदस्य अपत्यं (ष० त) तस्य तपः (ष० त०), फले इव स्तनौ यस्याः सा फलस्तनी (बहु०)।

जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्त्रदम्पती ॥38॥

**अन्वयः**- ये जलजे रविसेवया इव एतत्पदतां पदम् अवापतुः, ते विधिपत्त्रदम्पती एत्य रुतः सहंसकीकुरुतः ध्रुवम् ॥

**व्याख्या-** पद्यद्वयेन दमयन्तीचरणौ वर्णयति -जलजे इति। ये जलजे=द्वे पद्मे, रविसेवया इव= सूर्योपासनया इव, एतत्पदतां= दमयन्तीचरणताम् एव, पदं= स्थानम्, प्रतिष्ठामिति भावः। अवापतुः=प्रापतुः। ते=द्वे पद्म, विधिपत्त्रदम्पती= ब्रह्मवाहनजम्पती, ब्रह्मवाहनभूतौ हंसीहंसाविति भावः। एत्य= आगत्य, रुतः=रवात्, कूजनादित्यर्थः। अथवा रुतः= कूजतः। सहंसकीकुरुतः= पादकटकयुक्ते हंसयुक्ते व कुरुतः, ध्रुवम् इव।

दमयन्तीचरणौ वर्णयति

**सारांशः**- द्वे कमले सूर्यसेवया इव दमयन्तीचरणरूपां प्रतिष्ठां प्रापतुः। दमयन्त्याश्चरणौ कमलसदृशाविति भावः। यत्र कमलं तत्र हंस आगच्छति इति उभयोः सहस्थित्या कमलसदृशौ दमयन्तीचरणौ "सहंसकीकुरुतः" इति शब्देन पादकटकयुक्तौ अथवा हंसयुक्तौ च कुरुत इव। अस्मिन् श्लोके अतिशयोक्तिः अलङ्कारः।

जलजे- जले जाते। रविसेवया- रवेः सेवा, तया (ष० त०)। पदतां- पदयोर्भावः पदता, एतस्याः पदता, ताम् (ष० त०)। सहंसकीकुरुतः- हंसौ इव हंसके, 'हंस' शब्दे "इवे प्रतिकृती" इति सूत्रेण कन् प्रत्ययः। हंसकाभ्यां पादकटकाभ्याम्) सहिते सहंसके (तुल्ययोगबहु०), "हंसकः पादकटकः" इत्यमरः। असहंसके सहंसके यथा सम्पद्येते तथा कुरुतः।

**श्रितपुण्यसरःसरित् कथं न समाधिक्षपिताऽखिलक्षपम्।**
**जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ॥39॥**

**अन्वयः** - श्रितपुण्यसरःसरित् समाधिक्षपिताऽखिलक्षपं जलजं दमयन्ती पदनाम्नि जन्मनि मञ्जुला गति कथं न एतु ॥

**व्याख्या-** श्रितपुण्यसरःसरित् = सेवितपवित्रकासारनदीकं, समाधिक्षपिताऽखिलक्षपं= ध्यानयापितसमस्तरजनीकं, जलजं= कमलं, दमयन्तीपदनाम्नि= दमयन्तीचरणनामधेये, जन्मनि= जनने, जन्मान्तर इति भावः। मञ्जुलां= रमणीयाम् उत्तमामिति भावः। गतिम्= अवस्थां, कथं = केन प्रकारेण, न एतु= न प्राप्नोतु, एत्वेवेति भावः।

दमयन्तीचरण वर्णनम्

**सारांशः-** अन्यः अपि सेवितपुण्यतीर्थः समाधिर्नाम योगाङ्गेन अतिवाहितसमस्तरात्रिः जन्मान्तरे उत्तमां दशां प्रप्नोति; तद्वत् जलस्य भैमीपदप्राप्तिरित्यर्थः।

श्रितपुण्यसरःसरित्- सरांसि च सरितश्च सरःसरितः (द्वन्द्वः), श्रिताः पुण्याः सरःसरितो येन तत् (बहु०)। समाधिक्षपिताऽखिलक्षपं- समाधिना (ध्यानेन मुकुलीभावेन वा) क्षपिताः (तृ० त०)। अखिलाश्च ताः क्षपाः (क० धा०), समाधिक्षपिता अखिलाः क्षपाः येन तत् (बहु०)। जलजं- जले जातम्। दमयन्तीपदनाम्नि- दमयन्त्याः पदं (ष०त०) तत् नाम यस्य तत्, तस्मिन् (बहु०)।

एतादृशी सा कथं त्वया ज्ञातेत्यत आह-

**सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता।**
**अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ॥40॥**

**अन्वयः-** सरसीः परिशीलितुं गमिकर्मीकृतनैकनीवृता मया सदसत्संशय गोचरोदरी सा दृशोः अतिथित्वम् अनायि ॥

**व्याख्या-** सरसीः= सरांसि, परिशीलितुं= परिचेतुं विहर्तुमिति भावः। गमिकर्मीकृतनैकनीवृता= गमनफलाश्रयीकृताऽनेकजनपदेन, मया= हंसेन,

सदसत्संशयगोचरोदरी= भावाऽभाव सन्देहास्पदोदरी, कृशोदरीति भावः, तादृशी सा = दमयन्ती, दृशोः= नेत्रयोः, अतिथित्वं= ग्राह्यत्वम्; अनायि= प्रापिता, अवलोकितेति भावः। अस्मिन् श्लोके अतिशयोक्तिः अलङ्कारः।

सन्देहास्पदम् उदरं यस्याः सा कृशोदरीति

**सारांशः-** सरांसिविहर्तुं गमनफलाश्रयीकृताऽनेकजनपदेन हंसेन कृशोदरी सा दमयन्ती नेत्रयोः ग्राह्यत्वम् प्रापिता इत्यत्राशयः।

सदसत्संशयगोचरोदरी- सच्च असच्च सदसत् (क० धा०), सदसति संशयः (स० त०), तस्य गोचरः (ष० त०)। सदसत्संशयगोचरः उदरं यस्याः सा (बहु०)।

# Summarised Overview

दमयन्त्याः सर्वे भागाः अवयवाः अद्वितीयाः सन्ति। श्लोकत्रयेण पयोधरौ वर्णयति। कान्तिझरैः अगाधतां गमिते तद्वपुषि प्रसर्पतोः स्मरयौवनयोः द्वयोः अपि उभौ कुचौ प्लवकुम्भौ भवतः। तदुच्चकुचौ लावण्यप्रवाहे चक्रस्य राष्ट्रस्य, लोकसमूहस्य वा मदजनितं मोहमातनोति। सर्वोऽपि स्तनकान्तिदर्शनेन कामान्धो भवतीति सारः। कौतुकिना विधिना दमयन्त्याः उदरं निम्नमध्यप्रदेश पश्चाद्भागतास्फुटीभवद् वृद्धाङ्गुलिन्यासस्थानेन सम्पीण्डिताङ्गुलिपाणिना अङ्गुलिचतुष्टयाऽन्तरालनिः सृतवलित्रयशोभि कृतमित्यत्राशयः। मुष्टिग्राह्यमध्येया इयं दमयन्तीति भावः। कोऽपि कुतूहली दमयन्त्याः जठरभागं अङ्गुलिपाणिना परिच्छिनत्ति किम्? कुतः इति चेत् सुवर्णमेखलासहिताभिः तिसृभिः उदररेखाभिः धृतपरिमात्रङ्गुलीचतुष्टयम् इव शोभते। अनेन तस्याः उदरस्य कनकसावर्ण्यं सूचितम्। विशालवृत्तदमयन्तीकटिपश्चाद्भागनिर्माता ब्रह्मदेवः रविरथनिर्माणाभ्यासपाटवेन एकाकिरथाङ्गचरणशीलं मन्मथसम्बन्धिनं रथं निर्मातुम् इच्छति किम्? दमयन्ती ऊरुसौन्दर्येण न रम्भां नाम तरुमेव रम्भां नामाऽप्सरविशेषमपि जितवति। द्वे कमले सूर्यसेवया इव दमयन्तीचरणरूपां प्रतिष्ठां प्रापतुः। दमयन्त्याश्चरणौ कमलसदृशाविति भावः। यत्र कमलं तत्र हंस आगच्छति इति उभयोः सहस्थित्या कमलसदृशौ दमयन्तीचरणौ इति वर्णयति कविः। सरांसिविहर्तुं गमनफलाश्रयीकृताऽनेकजनपदेन हंसेन कृशोदरी सा दमयन्ती नेत्रयोः ग्राह्यत्वम् प्रापिता इत्यत्राशयः।

# Assignments

### श्लोकं व्याख्यात

1. उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु?
   धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ।।35।।

2. पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया।
   विधिरेकक चक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ।।36।।

### आशयं विशदयत-

1. सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता।
   अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ।।40।।
2. सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता।

### उत्तरं लिखत

1. स्मरयौवनयोः प्लवकुम्भौ भवतः। कौ?
2. जितकुम्भः कः जम्भरिपुं भजते?
3. शिखी कुतः षण्मुखं भजते?
4. दमस्वसुः उदरं कीदृशं वर्तते?
5. मान्मथं रथं निर्मित्सति। कः? कुतः?
6. सुन्दरी सा जिष्णुरेव । का? स्पष्टयत।
7. रुतः सहंसकीकुरुतः। के?
8. सा दृशोः अतिथित्वमनायि। का?

### व्याकरणविशेषं लिखत

1. चक्रभ्रमकारितागुणः
2. शिखी,
3. चतुरङ्गुलम्,
4. कुतुकी
5. एककचक्रचारिणम्

### निबन्धं रचयत

1. हंसोक्तदिशा दमयन्तीसौन्दर्यम्।

## Suggested Readings

1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram, (ed), Sahitya Academy, Trissur

# References

1. आचार्य श्रीशेषराजषर्म रेग्मीः, नैषधीयचरितम्, (1-3 सर्गाः), चौखम्बा सुरभारती प्रकाशन् वारणासि 2008
2. श्रीहर्षरचितं नैषधीयचरितम्, दाधीचपण्डितशिवदत्तशर्मणा
3. डा.सुरेन्द्रदेवशास्त्री, नैषधीयचरितमहाकाव्यम् –मल्लिनाथकृतजीवातुसहितम्, चौखम्बा अरियण्टालिया, वारणासि. 20321
4. आचार्यजगन्नाथपाठकः, ध्वन्यालोकः, चौखम्बाविद्याभवन्, वारणासी 1992
5. आचार्यः कृष्णमोहनशास्त्री -व्याख्याकारः, साहित्यदर्पणः, चौखम्बा संस्कृतसंस्थान्, वारणसी।
6. डा. रत्नमोहनझा – सम्पादकः, चन्द्रालोकः, राष्ट्रीयसंस्कृतसंस्थान्, नवदेहली
7. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
8. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak Prakasan, Kanpur 1981

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# द्वितीयसर्गे 41- 50 श्लोकाः

## Learning Outcomes

- नैषधीयचरितमहाकाव्यविषये परिचयं लभेयुः।
- महाकवेः व्याकरणविशेषज्ञानम्।
- नैषधीयचरितमहाकाव्ये नलकथायाः महत्वावधारणम्।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरिचयः, महाकवेः वर्णनापाटवपरिचयः।

## Background

दमयन्ती वर्णनम्। बहुषु राज्येषु यात्रायाः अवसरे तां दृष्टा। तव सौन्दर्यं दृष्ट्वा अहं तां स्मरामि। दमयन्त्याः अद्वितीयाः सन्ति। श्लोकत्रयेण पयोधरौ वर्णयति। सर्वोऽपि स्तनकान्तिदर्शनेन तस्यां सर्वे अवयवाः कामान्धो भवति। प्रकारान्तरेण उदरमेव वर्णयति- सहेमकाञ्चिभिः वलिभिः धृततच्चतुरङ्गुलि इव भाति। दमयन्तीचरणौ वर्णयति। अहो वीर! दमयन्ती प्राप्तवती त्वं अधिकं शोभनं प्राप्स्यसि। अस्मिन् एकके (श्लोकाः41-50) हंसस्य नलं प्रति भैमीवर्णनं प्रतिपादयति।

## Keywords

व्यपनेतुम्, सिद्धान्तधियं, दमयन्तीकिलकिञ्चितं, मणिहारावलिरामणीयकं, अमरकाम्यमानया, घनसंवृतया, निजोपयोगितां, धिक्, द्विजाऽधिपात्, तदुद्वारम्, भुजाग्रजन्मना, प्रियवादामृतकूपकण्ठजाः।

# Discussion

**अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम्।**
**कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ।।41।।**

**अन्वयः-** अहम् इमां दिवः यौवतैः अपि सह न अधीतवतीम् अवधृत्य विधातुः आशये अस्याः पतिः कतमः तु वसति इति अचिन्तयम् ।

**व्याख्या-** अहं हंसः, इमाम्= एतां, दमयन्तीमित्यर्थः। दिवः= स्वर्ग सम्बन्धिभिः, यौवतैः अपि= युवतीसमूहैः अपि, सह=समं, न अधीतवतीं = न अध्ययनकर्त्रीं, स्वर्गस्थयुवतीसमूहादपि अधिकसुन्दरीमिति भावः। अवधृत्य= निश्चित्य, विधातुः = ब्रह्मणः, आशये हृदि, अस्याः- दमयन्त्याः, पतिः=:भर्ता, कतमः= कः, तु= नु, वसति= तिष्ठति, इति= एवम्, अचिन्तयं= चिन्तितवान्।

भैमी स्वर्गस्थयुवतीसमूहादपि अधिकसुन्दरी

**सारांशः-** हे राजन! स्वर्लोक स्त्रीसमूहैः सह नाध्ययनकर्त्रीमिमां भैमीं निश्चित्य। विधात्रा सुरसुन्दरीभ्योऽपि सुन्दर्या भैम्या योग्यः को भर्ता विनिर्मित इत्यहं (हंसः) चिन्तितवानित्यर्थः।

यौवतानि- युवतीनां समूहा यौवतानि। यावतैरिति युवतिशब्दात्सामूहिके भिक्षादित्वादणि भस्यादे-' इति प्राप्तः पुंवद्भावो भिक्षादौ युवतिशब्दपाठसामथ्यान्न भवति। नसहाधीतवतीमिति 'सुप्सुपा' इति नेन समासः। कतमः- कतम इति 'कतरकतमौ जातिपरिप्रश्ने' इति वचनसामर्थ्यात्स्वार्थेऽपि ङतमच्।

**अलङ्कारः-** अहं हंसः देवाङ्गनाऽभ्योऽपि सुन्दर्याः अस्याः पतिर्ब्रह्मणा को निश्चित इति विमृष्टवानिति भावः। स्वर्गकन्यासमूहेन सह न अधीतवान् इत्यत्र उपमानापेक्षया उपमेयस्य विशेषः वर्णितः इत्यनेन व्यतिरेकालङ्कारः।

**अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम्।**
**युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ।।42।।**

**अन्वयः** - अथ अनुरूपम् इमं निरूपयन् सर्वेषु अपि युवसु पूर्वपक्षतां व्यपनेतुम् अक्षम: (सन् ) त्वयि सिद्धान्तधियं न्यवेशयम्।

**व्याख्या-** अथ भामी स्वर्गस्थयुवतीसमूहादपि अधिकसुन्दरी इति चिन्ताऽनन्तरम्, अनुरूपम्= ईदृश्याः तस्याः रूप योग्यं, इमं= पतिं, निरूपयन्= आलोचयन्, सर्वेषु अपि= सकलेषु अपि, युवसु= तरुणेषु, पूर्वपक्षतां= दूष्यकोटितां, व्यपनेतुं= निवारयितुम्, अक्षमः= असमर्थः सन्, अहं त्वयि= भवति हंसः त्वमेव अस्याः पतिरिति सिद्धान्तधियं= सिद्धान्तबुद्धिं, न्यवेशयं= निवेशितवान्। अत्र सम अलङ्कारः। 'समं स्यादानुरूप्येण श्लाघा या योग्यवस्तुनोः'।

भैम्याः अनुरूपं पतिं निरूपयति

**सारांशः-** निषिधराजानां नलं भैम्याः रूपयोग्यं पतिं निरूपयन् सर्वेष्वपि तरुणेषु अयोग्यरूपत्वं निराकर्तुमसमर्थः सन्नहं(हंसः) त्वयि भैमीरूपानुरूपत्वबुद्धिं निस्संशयं कृतवन्। त्वत्तोऽन्यस्तद्योग्यः कोऽपि तरुणो न विद्यत इत्यत्राशयः।

अनुरूपम्- रूपस्य योग्यम्। पूर्वपक्षतां- पूर्वश्चाऽसौ पक्षः पूर्वपक्षः। तस्य भावः पूर्वपक्षता, ताम् पूर्वपक्षताम्। अक्षमः- न क्षमः अक्षमः(नञ्)। सिद्धान्तधियं- सिद्धान्तस्य धीः तीम्(ष.त)।

**अनया तव रूपसीमया कृतसंस्कारविवोधनस्य मे**
**चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥43॥**

**अन्वयः** -चिरम् अवलोकिता अपि सा शुचिस्मिता अद्य अनया तव रूप-सीमया कृतसंस्कारविबोधनस्य मे स्मृतिम् आरूढवती।

व्याख्या- चिरं= बहुपूर्वकाम्, अवलोकिता अपि= दृष्टा अपि, सा= पूर्वोक्ता, शुचिस्मिता= शुक्लहास्या, अद्य= अस्मिन् दिने, अनया= सनिकृष्टस्थया, तव= भवतः, रूपसीमया= सौन्दर्यकाष्ठया, कृतसंस्कारविबोधनस्य= उद्बुद्धसंस्कारस्य, मे= मम, हंसस्य, स्मृति= स्मरणपथम्। आरूढवती= आरूढा, सा सुन्दरी चिरदृष्टा मम स्मरणमार्गे निमग्नः अभवत्।

सा स्मृतिपथमारूढवती प्राप्ता

**सारांशः-** चिरकालमवलोकितापि रम्यहास्या सा भैमी अद्य हंसस्य स्मृतिपथं प्राप्ता। कीदृशस्य हंसस्य इति चेत् नलं दृष्ट्वा तस्य सैन्दर्यकाष्ठया उद्बुद्धसंस्कारस्य हंसस्य स्मृतिं सा आरूढवती।

शुचिस्मिता- शुचि स्मितं यस्याः बहुसुन्दरी दमयन्ती। रूपसीमया- रूपस्य सीमा रूपसामा, तया। रूपसीमयेति 'डावुभाभ्याम् -' इति डापि तृतीया। आरूढवती- एकसम्बन्धिज्ञानं परसम्बन्धिस्मारकं भवतीति भावः।

**अलङ्कारः-** रूपस्य सीमा रूपसीमा। तया रूपसीमयेति अत्र स्मरणं नाम अलङ्कारः। 'सदृशाऽनुभवाद्वस्तुस्मृतिः स्मरणमुच्यते'।

**त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल।**
**तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥44॥**

अन्वयः- हे वीर! दमयन्तीकिलकिञ्चितं त्वयि परं विराजते किल। मणिहारावलिरामणीयकं तरुणीस्तन एव दीप्यते।

**व्याख्या-** हे वीर! = हे पर्क्रमशालीन्!, दमयन्तीकिलकिञ्चितं =दमयन्त्याः शृङ्गारचेष्टाविशेषः, त्वयि= भवति, परम्= एव, विराजते= शोभते, किल= खलु। उक्तमर्थ दृष्टान्तेन समर्थयते-तरुणीस्तन इत्यनेन। मणिहारावलिरामणीयकं मुक्ताहारपक्तिसौन्दर्य, तरुणीस्तन एव= युवतिपयोधर एव, दीप्यते= शोभते।

दमयन्ती शृङ्गारचेष्टाविशेषयुक्ता

**सारांशः-** हे शूर ! दमयन्त्याः शृङ्गारचेष्टाविशेषः त्वयि केवलं विशेषेण शोभते। वीरस्यैव शृङ्गारित्वं युज्यते, वीरानुरागिण्यश्च स्त्रियः इति दर्शयति मणिहारावलिरामणीयकं इत्यनेन मुक्ताहारसमूहस्य सौन्दर्यं तरुण्याः एव कुचे शोभते, न तु वृद्धयोषितः इत्यत्राशयः।

**अलङ्कारः-** दृष्टान्तः। दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्। अत्र हारकिलकिञ्चयोः उपमानोपमेय वाक्यद्वये बिम्बप्रतिबिम्बतया स्वननृपयोः समानधर्मत्वोक्तेः दृष्टान्तालङ्कारः।

पुनरुत्कण्ठार्थमाह-

**तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।**
**इयमृद्धधना वृथाऽवनी स्ववनी संप्रवदत्पिकापि ॥45॥**

**अन्वयः** - (हे वीर!) तव इदं रूपं तया विना अवकेशिनः पुष्पम् इव विफलम्। ऋद्धधना इयम् अवनी वृथा, सम्प्रवदत्पिका स्ववनी अपि का?

**व्याख्या-** (हे वीर!) तव = भवतः, इदं = दृश्यमानं, रूपं=सौन्दर्यम्, तया विना= दमयन्त्या विना, अवकेशिनः= वन्ध्यवृक्षस्य, पुष्पम् इव = कुसुमम् इव, विफलं = निष्फलं, निरर्थकमिति भावः। एवं च ऋद्धधना= संपूर्णवित्ता, इयं दृश्यमाना, अवनी भूमिः, वृथा= व्यर्थप्राया। तथैव सम्प्रवदत्पिका= कूजत्कोकिला, स्ववनी अपि= निजोद्यानम् अपि, का=

तुच्छा, निरर्थकेत्यर्थः। दमयन्त्या विना सर्वमेतत् निरर्थकमित्यर्थः। दमयन्तीयोगे तु भवद्रूपं, भूमिः, उद्यानं च सर्वं सफलमिति भावः।

तव इदं रूपं तया विना अवकेशिनः पुष्पम् इव विफलम्।

**सारांशः-** हे राजन्, तव इदं दृश्यमानमनुपमं रूपं तया भैम्या विना निरर्थकमेव कस्य किमिव-इति चेत् वन्ध्यवृक्षस्य फलरहितं पुष्पमिव न शोभते इत्यर्थः। मुण्डितमुण्डस्य शिरसि धार्यमाणं पुष्पं यथा विफलम् तथा। तया दमयन्त्या विना न केवलं रूपं विफलम्, किन्तु पूर्णधना इयं पृथ्व्यपि व्यर्थैव। तथा कूजन्तकोकिलयुक्ता विलासवाटिकापि का? न कापि। भैमीप्राप्त्यभावे सर्वमेतन्निरर्थकमित्यर्थः।

तया विना- विना शब्दयोगे तृतीया। ऋद्धधना- ऋद्धं धना यस्या सा (बहु)। सम्प्रवदत्पिका वनी- वनी इति गौरादित्वान्डीष्। अव्यक्तवाक्त्वात्संप्रवद्दित्यत्र वदेः शता।

**अलङ्कारः-** अत्र नलरूपावनीवनीनां दमयन्त्या विना रम्यतानिषेधात् विनोक्तिरलङ्कारः। 'विना सम्बन्धि यत्किञ्चदत्रान्यत्र परा भवेत्। रम्यताऽरम्यता वा स्यात् सा विनोक्तिरनुस्मृते'ति लक्षणात्। तस्याश्च 'पुष्पमिव' इत्युपमया संसृष्टिलङ्कारः।

अहमेवैतद्रूपयोग्यस्तर्ह्यसुलभा कथमित्यत आह-

**अनयाऽमरकाम्यमानया सह योगः सुलभस्तु न त्वया ।**
**घनसंवृतयाऽम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥46॥**

**अन्वयः-** अमरकाम्यमानया अनया सह योगः अम्बुदागमे घनसंवृतया निशाकरत्विषा सह योगः कुमुदेन इव त्वया न सुलभः।

**व्याख्या-** अथ अन्यापेक्षां दर्शयितुं दमयन्त्या दौर्लभ्यं द्योतयति – अनयेति। अमरकाम्यमानया= देवाऽभिलष्यमाणया, अनया सह= दमयन्त्या साकं योगः= सम्बन्धः, अम्बुदागमे= मेघागमे, वर्षाकाल इति भावः। घनसं-वृतया= मेघाच्छन्नया, निशाकरत्विषा सह= चन्द्रकान्त्या समं, योगः- सम्बन्धः, कुमुदेन इव = कैरवेण इव, त्वया= भवता, न सुलभः= न सुप्रापः, दुर्लभ इति भावः। अतोऽहं भैमीसकाशं गत्वा वाक् कौशलेनाऽनुरागं उत्पाद्य तया सह भवतः योगं जनयिष्यामि इति तात्पर्यम्।

**सारांशः-** देवैरपि अभिलष्यमाणया अनया भैम्या सह संबन्धस्तु त्वया न सुप्रापः। तत्र युक्तिमाह-कः केनेव? इति। वर्षाकाले मेघच्छन्नया चन्द्रस्य

स्वाऽपेक्षां दर्शयितुं दमयन्त्याः दौर्लभ्यं द्योतयति

दीप्त्या सह संबन्धः कुमुदेनेव। न प्राप्स्यते, परन्तु दुःखेन मदुपायेन सा प्राप्या। तत्र गत्वात्वय्येव तस्याः अनुरागमुत्पाद्य त्वामेव यथा भजेत्तथा करिष्यामीति भावः। यथा वर्षासु मेघानामतिप्रतिबन्धकतया कुमुदेन चन्द्रज्योत्स्ना दुष्प्रापापि वायुना दैवान्मेघनिराकरणे प्राप्यते तथा सुलभः इत्यर्थः।

अमरकाम्यमानया अनया सह- अमरैः काम्यमाना। तया(तृ.त), सह योगे तृतीया। घनसंवृतया- घनैः संवृता, तया(तृ.त)। निशाकरत्विषा – निशां करोतीति निशाकरः, निशा-उपपदपूर्वक 'कृ' धातोः 'दिवाविभागनिशा' इत्यादि सूत्रेण 'ट' प्रत्ययः (उपपद)। तस्य निशाकरस्य त्विट्। तया (ष.त.)।

**अलङ्कारः-** अत्र तत्संयोगदौर्भल्यस्य अमरकामनापदार्थहेतुकत्वात् काव्यलिङ्गभेदः। तत्सापेक्षा चेयमुपमा इति सङ्करः।

व्यञ्जितमर्थं व्यक्तीकुर्वन्निगमयति-

**तदहं विदधे तथातथा दमयन्त्याः सविधे तव स्तवम् ।**
**हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ॥47॥**

**अन्वयः** - तत् अहं दमयन्त्याः सविधे तथा तथा तव स्तवं विदधे, यथा तया हृदये निहितः भवान् इन्द्रेण अपि न अपनीयते।

**व्याख्या-** अथ दमयन्ती प्राप्त्युपायं प्रकाशयति। तत्= तस्मात् कारणात्, दमयन्तीयोगस्य दौर्लभ्यादिति भावः। अहं= हंसः, दमयन्त्याः= भैम्याः, सविधे= समीपे, तथा तथा= तेन तेन प्रकारेण, तव= भवतः, स्तवं= स्तोत्रं, प्रशंसामिति भावः। विदधे= विधास्ये, यथा= येन प्रकारेण, तया= दमयन्त्या, हृदये= मनसि, निहितः= स्थापितः, पतित्वेनेति शेषः। भवान्, इन्द्रेण अपि= मघोना अपि, न अपनीयते= न दूरीक्रियते, मनुष्येण तु का वार्तेति भावः। इन्द्रादिभिः प्रलोभिताऽपि भैमी यथा भवत्येव गाढाऽनुरागा स्यात्तथा प्रयतिष्य इति तात्पर्यम्।

दमयन्ती प्राप्त्युपायं प्रकाशयति

**सारांशः-** तस्मात् योग्यस्य सान्तरायत्वात्कारणादहं दमयन्त्याः समीपे तव स्तुतिं तेन। तेन प्रकारेण करिष्यामि तया भैम्याः मनसि अवधृतः भवान् येन प्रकारेणे इन्द्रेणापि न दूरीक्रियते, किंपुनर्मनुष्येण। इन्द्रादेरप्यधिकतया त्वं नलः वर्णनीयः इत्यत्राशयः।

विदधे- वि-उपसर्ग 'धा' धातोः 'वर्तमानसामीप्ये वर्तमानवद्वा' इति सूत्रेण वर्तमानक सामीप्य भविष्यत्काले लट्। विदधे, अपनीयते इति च वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः। विदधे आशंसायां भूतवद्वा।

**अलङ्कारः**- विदधे, अपनीयते इति च वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः। विदधे आशंसायां भूतवद्वा। अर्थापत्तिरलङ्कारः।

**तव संमतिमेव केवलामधिगन्तुं धिगिदं निवेदितम्**
**ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ।।48।।**

**अन्वयः** - अत्र केवलां तव सम्मतिम् अधिगन्तुम् इदं निवेदितं धिक्। हि साधवः निजोपयोगितां फलेन ब्रुवते, न तु कण्ठेन।

**व्याख्या-** अत्र= अस्मिन् कार्ये, केवलाम् - एकां, तव = भवतः, सम्मतिं= अङ्गीकारम्, अधिगन्तुं= ज्ञातुम्, इदं= पुरः प्रतिपाद्यमानं, निवेदितं = निवेदनं, धिक्= निन्द्यमेव इत्यर्थः, हि= यतः, साधवः= सज्जनाः, निजोपयोगितां= स्वोपकारित्वं, फलेन= कार्येण, ब्रुवते= बोधयन्ति, न तु कण्ठेन= वाग्व्यापारेण।

साधवो न ह्येतादृशा भवन्ति

**सारांशः**- दमयन्तीयोजनविषये राज्ञः नलस्य अनुमतिं प्राप्तुमिदं निवेदनं (हंसवचनं) निन्द्यमेव। यतः महान्तःजनाः स्वोपकारित्वं कार्येण बोधयन्ति, न तु वाग्वृत्या ब्रुवते इत्यत्राशयः।

निवेदितं धिक्- धिक् योगे धिगुपर्यादिषु त्रिषु इति द्वितीया। उक्तमर्थमर्थान्तरेण समर्थयते - ब्रुवत इति। निजोपयोगितां- निजस्य उपयोगिता ताम्(ष.त)। ब्रुवते- ब्रुवते-ब्रूञ् व्यक्तायां वाचि धातोः लट् +झ। निजोपयोगितामिति शेषः।

**अलङ्कारः**- ब्रुवते हि फलेन साधवो न तु कण्डेन- इत्यत्र सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः नाम अलङ्कारः।

**तदिदं विशदं वचोऽमृतं परिपीयाभ्युदितं द्विजाधिपात् ।**
**अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ।।49।।**

**अन्वयः** - सः द्विजाधिपात् अभ्युदितं विशदं तत् इदं वचोऽमृतं परिपीय अतितृप्तया तदुद्गारम् इव सितं स्मितं विनिर्ममे।

**व्याख्या-** सः= नलः, द्विजाधिपात्= पक्षिस्वामिनः, हंसादिति भावः। पक्षान्तरे- ब्राह्मणप्रभोः चन्द्रादिति भावः। अभ्युदितम्= आविर्भूतं,

विशदं= प्रसन्नम् उज्ज्वलं च, तत्= पूर्वोक्तम्, इदम्= अनुभूयमानं, वचोऽमृतं= वाक्यपीयूषं, परिपीय= सादरमाकर्ण्यं, पीत्वा च। अतितृप्ततया= अतिहृष्टत्वेन, तदुद्गारम् इव= तदुद्गमनम् इव, सितं= शुक्लं, स्मितं= मन्दहास्यं, विनिर्ममे= विनिर्मितवान्।

भैमीप्राप्तिसंभावना जातहर्षाद्वास्मितम्

**सारंशः-** स नलः पक्षिश्रेष्ठात् चन्द्रा निर्गतं पूर्वोक्तं प्रव्यक्तं धवलं च वचोलक्षणममृतं सादरमाकर्ण्य पीत्वा वा अतिहृष्टत्वेन श्वेतं मन्दहासं तस्य पीतस्यामृतस्य उद्गमनमिव चकार। पीतस्य शुक्लवचोमृतस्य उद्गारसदृशं स्मितमपि शुक्लं भवतीति भावः।

द्विजाधिपात्- द्विजानाम् अधिपः तस्मात्(ष.त.), द्विजाऽधिपः– पक्षी(हंसः)अथवा चन्द्रमा। अभ्युदितम्- अभि+उद्+इण्+क्त+सु। वचोऽमृतं- वच एव अमृतं। अतितृप्ततया- अत्यन्तं तृप्तः अतितृप्ततः, तस्य भवः अतितृप्ता, तया- अत्तृप्+ तल् +टाप्+ टा। तदुद्गारम् –तस्य उद्गारः तदुद्गारः, तम् तदुद्गारम्(ष.त.)। उद् उपसर्गपूर्वक “गृ निगरणे” धातोः “उन्न्योर्ग्रः” इति सूत्रेण घञ् प्रत्ययः। विनिर्ममे- माङ् कर्तरि लिट्।

**परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः।**
**मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः॥50॥**

**अन्वयः** – नैषधः भुजाग्रजन्मना कोकनदेन पतगं परिमृज्य तस्य मुदे प्रियवादामृतकूपकण्ठजाः गिरः मृदु अगिरत्।

**व्याख्या-** नैषधः= निषधराजा नलः, भुजाग्रजन्मना= बाह्वग्रोत्पन्नेन, कोकनदेन= रक्तोत्पलेन, रक्तोत्पलसदृशेन पाणिना इति भावः। पतगं= पक्षिणं, हंस-मित्यर्थः। परिमृज्य= संस्पृष्येत्यर्थः। तस्य= हंसस्य, मुदे= हर्षाय, प्रियवादाऽमृतकूपकण्ठजाः = इष्टवाक्यपीयूषोदपानवागिन्द्रियजन्या, गिरः= वाणीः, मृदु= कोमलं यथा तथा, अगिरत् = उक्तवान्।

मञ्जुलं सरसं च वचः उवाच

**सारांशः-** निषिधराजा नलः तस्य हंसस्य हर्षाय रक्तोत्पलेन करेण तं संस्पृश्य प्रियवाक्यामृतैः असिञ्चत्।

नैषधः- निषधेषु भवः, निष+अण। ‘जनपदशब्दात् क्षत्रिययादञ्’। भुजाग्रजन्मना- भुजस्य अग्रम्(ष.त.), भुजाग्रे जन्म यस्य तेन(व्यधिकरणबहु)। प्रियवादाऽमृतकूपकण्ठजाः- प्रियस्य वादाः (ष.त.), त एव अमृतानि(रूपक.)। तेषां कूपः(ष.त.), स च असौ कण्ठः (क.धा.),

तस्माज्जाताः, ताः प्रियवादाऽमृतकूपकण्ठ+जन्+डः (उपपद)। अगिरत्-अगिरत्-"गृ निगारणे" धातोः लङ्+तिप्।

**अलङ्कारः-** 'अत्र कोकनदेन' इति विषयस्य पाणेः निगरणेन विषयिणः कोकनदस्येव उपनिबन्धात् अतिशयोक्तिर्नामालङ्कारः।

# Summarised Overview

नैषधीयचरितमहाकाव्यस्य लेखकेन महाकविना श्रीहर्षेण नलदमयन्त्याः स्नेहकथायाः चित्ताकर्षकं वर्णनं द्वाविंशतिसर्गेषु समाहितम्। हंसं अवदत् - अहं दमयन्त्यस्य स्वर्गकन्यासमूहेन सह न अधीतवान् अर्थात् ब्राह्मणा तेभ्यः अपि सुन्दरतरः इति निश्चयं कृत्वा कस्य पतिं कर्तुं निश्चितवान्? एवं चिन्तितम्। सुन्दरी चिरदृष्टा मम स्मरणमार्गे निमग्नः अभवत्। श्रृङ्गारचेष्टाविशेषयुक्ता सा मुक्ताहारसमूहस्य सौन्दर्यं तस्याः तरुणीस्तने शोभते। हंसः मधुरवचनैः तं नलमेवमवदत् "हे वीर! तव इदं रूपं तया विना अवकेशिनः पुष्पम् इव विफलम्। ऋद्धधना इयम् अवनी वृथा, सम्प्रवदत्पिका स्ववनी अपि का। अतोऽहं भैमीसकाशं गत्वा वाक्कौशलेनाऽनुरागमुत्पाद्य तया सह भगतः योगं जनयिष्यामि" इति। इत्येवंरूपेण दमयन्तीप्राप्त्युपायं नलसमीपं हंसः प्रकाशयति। इन्द्रादिभिः प्रलोभिताऽपि भैमी यथा भवत्येव गाढाऽनुरागा स्यात्तथा प्रयतिष्ये। तव सम्मतिम् अधिगन्तुम् इदं निवेदितं धिक्। यतः महान्तः जनाः निजोपकारितां फलनिष्पत्या ब्रुवते, न तु कण्ठस्थेन वचनेन। तव केवलां संमतिमेवाधिगन्तुं निवेदितं मम इदं वचनं निन्द्यम्। तथापि ममोपकारो न कर्तव्य इति केनापि नोच्यत। सः हंसात् अभ्युदितं विशदं वचोऽमृतं परिपीय अतितृप्तया तदुद्गारम् इव सितं स्मितं विनिर्ममे। नैषधः भुजाग्रजन्मना कोकनदेन पतगं परिमृज्य तस्य मुदे प्रियवादामृतकूपकण्ठजाः गिरः मृदु अगिरत्। द्वितीयसर्गावसाने नलस्य प्रार्थनया हंसो कुण्डिनपुरे दमयन्तीसमीपं गच्छति।

# Assignments

## श्लोकं व्याख्यात

1. अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम्।
   युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥42॥

2. अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।
   घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥46॥

**अलङ्कारविशेषं प्रतिपादयत**

1. त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल।
   तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ।।44।।

2. तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।
   इयमृद्धधना वृथाऽवनी स्ववनी संप्रवदत्पिकापि ॥45।।

3. तव संमतिमेव केवलामधिगन्तुं धिगिदं निवेदितम्
   ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ।।48।।

**उत्तरं लिखत**

1. दिवः यौवतैः अपि सह न अधीतवती। का?
2. सर्वेषु अपि युवसु पूर्वपक्षतां व्यपनेतुं हंसः किमकुर्वत्?
3. कृतसंस्कारविबोधनस्य मे स्मृतिम् आरूढवती। का? कस्य?
4. मणिहारावलिरामणीयकं कुत्र दीप्यते?
5. दमयन्त्या विना नलरूपं कीदृशं भवेत्?
6. अमरकाम्यमानया अनया सह योगः न सुलभः। कस्य? कया सह?
7. नेद्रेण यथाऽपनीयते। कः?
8. साधवः निजोपयोगितां कथं प्रकटयन्ति?
9. अतितृप्ततया विनिर्ममे। कः? कुतः?
10. गिरः मृदु अगिरत्। कः? कीदृशः गिरः?

**व्याकरणविशेषं लिखत**

1. निशाकरत्विषा।
2. विदधे।
3. तदुद्गारम्।
4. भुजाग्रजन्मना।

**निबन्धं रचयत**

1. नैषधीयचरितस्य द्वितीयसर्गस्य कथासारांशं लिखत।
2. नैषधीयचरितस्य द्वितीयसर्गरीत्या दमयन्तीवर्णनम्।
3. द्वितीयसर्गमाधरीकृत्य श्रीहर्षस्य वर्णनापाटवम्।
4. हंसनलयोः संवादं स्वगिरा वर्णयत।

## Suggested Readings


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur


## References


1. आचार्य श्रीशेषराजशर्म रेग्मीः, नैषधीयचरितम् (1-3 सर्गाः), चौखम्बा सुरभारती प्रकाशन् वारणासि 2008
2. दाधीचपण्डितशिवदत्तशर्मः, श्रीहर्षरचितं नैषधीयचरितम्।
3. डा.सुरेन्द्रदेवशास्त्री, नैषधीयचरितमहाकाव्यम्–मल्लिनाथकृतजीवातुसहितम्, चौखम्बा अरियण्टालिया, वारणासि. 20321
4. ध्वन्यालोकः-, चौखम्बाविद्याभवन्, वारणासी 1992
5. आचार्यजगन्नाथपाठकः, साहित्यदर्पणः-व्याख्याकारः आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृतसंस्थान्, वारणासी।
6. डा. रत्नमोहनझा-संपादकः, चन्द्रालोकः, राष्ट्रीयसंस्कृतसंस्थान्, नवदेहली।
7. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
8. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak Prakasan, Kanpur 1981


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# शिशुपालवधम्

# BLOCK - 4

UNIT 1

# द्वितीयसर्गे 69-88 श्लोकाः

## Learning Outcomes

- महाकाव्यविषये परिचयं लभेयुः।
- काव्यानां व्याकरणविशेषज्ञानम्।
- महाकाव्येतिवृत्तपरिचयः।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

उपमा कालिदासस्य
भारवेरर्थगौरवम्
दण्डिनः पदलालित्यम्
माघे सन्ति त्रयो गुणाः।।

माघकविना प्रणीतत्वात् शिशुपालवधम् नाम महाकाव्यं 'माघम्' इत्यप्यभिधीयते। 'माघे सन्ति त्रयो गुणाः' इति कथनेन माघस्य कालिदासभारविदण्डिनामेकायतनीभूतं स्वरुपमाख्यायते। तस्य हि शिशुपालवधं नाम महाकाव्यं जगति प्रसिद्धमस्ति। 'नवसर्गगते माघे नवशब्दो न विद्यते'; 'मेघे माघं गतं वयः' इति प्रथा अस्ति।

कथ्यते हि माघे सर्वोऽपि कवयोः चातुर्यं एकीभूय स्थिताः। तस्मिन् हि कालिदासस्य रसचमत्कारः, अश्वघोषस्य स्वाभीष्टदर्शनसिद्धिर्भारवेरर्थगौरवं, भट्टेव्याकरणप्रयोगपरता च सर्वे एव परस्परं समन्विता

सन्ति।

माघस्य सम्प्रत्येकैव कृतिर्लभ्यते शिशुपालवधं नाम महाकाव्यम्। तत्र हि महाभारताश्रिता शिशुपालवधात्मिका कथा वर्णितोऽस्ति। अस्मिन् महाकाव्ये विंशति सर्गाः 1645 श्लोकाः सन्ति। मूलग्रन्थमाधारीकृत्य महाकविना माघेन शिशुपालवध महाकाव्यस्य निर्माणं कृतम्। तद् कथामिति चेत् महाभारतस्य सभापर्वस्य 33 तमात् 45 पर्यन्तेषु त्रयोदशसु अध्यायेषु शिशुपालवधस्य कथा उपलभ्यते। इयं कथा श्रीमद्भागवतेऽपि दशमस्कन्धस्य 74 तमेऽध्याये सूक्ष्म-रूपेण वर्तते। महाकाव्येऽस्मिन् कतिपयश्लोकाः प्रायः महाभारतस्य श्लोकैः समम् एव दृश्यन्ते । तद्यथा-

(i) **आचार्यमृत्विजञ्चैव संयुजञ्च युधिष्ठिर ।**
**स्नातकं च प्रियं प्राहुः षडर्ष्यान्नृपं तथा ॥** (महा. 2 - 36 – 23, शिशु. 14/55)

(ii) **पशुवद् घातनं वा मे दहनं वा कटाग्निना ।**
**क्रियतां मूर्ध्नि वो न्यस्तं मयेदं सकलं पदम् ॥** (शिशु. 15/56)

अत्र महाभारतापेक्षया महाकाव्योपयोगिनः अनेके विषयाः वर्णिताः; तृतीयसर्गात् त्रयोदशसर्गं यावत् भगवतः श्रीकृष्णस्य ऐश्वर्य प्रस्थान-वनविहार- जलक्रीडा-रैवतकपर्वत-सन्ध्या-प्रातः -प्रकृत्यादिविषयाणां वर्णनानन्तरं महाराज्ञः युधिष्ठिरस्य राजसूययज्ञे श्रीकृष्णस्य आगमनं वर्णितम्। एतेन ज्ञायते यत् अस्य महाकाव्यस्य आधारः महाभारतीया कथा एव, किन्तु शिशुपालस्य वधमित्यादिषु स्थलेषु कुत्रचित् महाकवेः मौलिकचिन्तनेन कथाभेदोऽपि दृश्यते। द्वितीयसर्गे उद्धवः हरिम् अभिमुखीकरोति

## Keywords

गदाग्रजं, मुसलपाणिना, अनुज्झितार्थसम्बन्धः, दुरुदाहरः, चित्रां, परिचयस्थैर्ये, प्रज्ञोत्साहौ, स्थेयसीं, तीक्ष्णाः, कृतधियः, उपायस्थोऽपि, जिगीषुः, घनसंवृतिकञ्चकः, चारेक्षणः, कालज्ञस्य, दैष्टिकतां, स्थायिनः, तन्त्रावापविदा, सोगैः।

## Discussion

## शिशुपालवधम्

शिशुपालः चेदिराजः आसीत्। तस्य पराक्रमात् देवाः अपि नासहन्त। एतस्मिन्नन्तरे युधिष्ठिरस्य राजसूययागे बहवः राजानः उपस्थिताः आसन्। तेषां मध्ये श्रीकृष्णः शिशुपालः चास्ताम्। अतिथिषु प्रथमतया श्रीकृष्णम् एव युधिष्ठिरः पूजयामास। तस्मात् क्षुभितः शिशुपालः बहिर्जगाम। अनन्तरं श्रीकृष्णेन सह योद्धुं शिशुपालः सन्नद्धोऽभूत्। एवं प्रवृत्ते घोरयुद्धे श्रीकृष्णः शिशुपालमवधीत्। अयमेव कथांशः माघकाव्ये उपवर्णितः। प्रथमसर्गेस्य नारदस्य वर्णनमतिगंभीरं प्रौढं च भवति।

**प्रथमसर्गे** भगवतः श्रीकृष्णस्याग्रे इन्द्रसन्देशं गृहीत्वा देवर्षिनारदः समागच्छति। कृष्णः नारदमुनेः सत्कारान्ते आगमनस्य कारणं पृच्छति। तदा देवर्षिः प्रत्युत्तरति यत् चेदिराजशिशुपालादिन्द्रादयः भीताश्च सन्ति। तस्याचारेण देवराजः बिभेति तन्निवारणाय इन्द्रेणाहं संप्रेषितः कृपया भवान् तस्य शिशुपालस्य वधं कृत्वा सुखिनः कुर्वन्तु देवान्। श्रीकृष्णः तथैव करिष्यति इति सः समाश्वासनं नारदाय प्रददाति सम्प्रेषयति च।

**द्वितीयसर्गे** भगवान् श्रीकृष्णः बलरामोद्धवाभ्यां सह एकान्ते सभाभवने समुपविश्य मन्त्रणां करोति। श्रीकृष्णः द्वयोः कार्ययोः समुपस्थित्या परस्परकार्यद्वयस्य विरोधं प्रदर्शयति पृच्छति यत् युधिष्ठिरस्य यज्ञनिमन्त्रणमपि वर्तते तथा इन्द्रस्य शिशुपालवधाय नारदात् सन्देशोऽपि आगतः वर्तते ते कार्ययोः। द्वयमपि कार्यमत्यावश्यकं विद्यते। द्वयोः कार्ययोः सम्पादनं कथं सम्भवेत् ? अतः स्थित्यामस्याम् अस्माभिः किं कर्तव्यमुचितं स्यात् ?

एतावदुक्त्वा भगवान् श्रीकृष्णः शिशुपालस्य वधः प्रथमोऽनिवार्येति स्वमतमुपस्थापयति। मतमनुसरति बलरामः तथा च समर्थयति बलभद्रः यत् आम्, आदौ शिशुपालस्य संहारः परमावश्यकः तदेव करणीयमिति। यदा उद्धवः स्वाभिप्रायं प्रददाति तदा कथयति शान्त्या चर्चया मध्ये मध्ये रौहिणेयस्य विचारखण्डनं कृत्वा युधिष्ठिरस्य यज्ञानुष्ठाने समुपस्थातष्यमिति। तदनु उद्धवेन तदपि स्मरणं कार्यते यत् हे भगवन्! भवता शिशुपालस्य मात्रे शतापराधानां क्षमायै प्रतिज्ञा कृता वर्तते तद् सहजं स्मारयामि। तेन समं गुप्तचरैः शिशुपालस्य शक्तिपराक्रमादिविषये आदौ ज्ञेयं भवति पक्षभेदनं तस्य कथं सम्भवेत् तदपि ज्ञेयं भवति अथवा तादृशी नीतिः काऽपि कर्तव्या भविष्यति येन तस्य पक्षभेदः भवेत्। अन्ते च उद्धवस्य वचनानुसारं समभिप्रायानुसारं त्रिभिः निर्णयः क्रियते युधिष्ठरस्य यज्ञं गन्तुमिति। महाकविमाघेन विंशतिसर्गात्मके स्वीये शिशुपालवधे महाकाव्ये सर्वेषामेव रसानां साधिकार सहृदयपरितोषं कुर्वता प्राधान्येन वीररस तदङ्गतया च सर्वेऽन्ये रसाः यथास्थानं

विन्यस्ताः। अस्य कृतौ प्रायः कोऽपि श्लोकः अलङ्काररहितो न दृश्यते। अस्मिन् एकके शिशुपालवधे द्वितीयसर्गे 69-88 श्लोकाः सन्ति।

**भारतीमाहितभरामथाऽनुद्धतमुद्धवः।**
**तथ्यामुतथ्यानुजवज्जगादाऽग्रे गदाग्रजम् ॥69॥**

**अन्वयः** - अथ उद्धवः आहितभरां तथ्यां भारतीम् अनुद्धतं गदाग्रजम् अग्रे उतथ्यानुजवत् जगाद ॥

**व्याख्या-** अथ= कृष्णस्य अनुज्ञानन्तरम्। उद्धवः- आहितभरां= प्राप्तार्थ-गौरवाम्। तथ्यां= सत्याम्। भारतीं= वाणीम्। अनुद्धतं= गर्वरहितं। गदाग्रजं= कृष्णम्। अग्रे= पुरतः। उतथ्यानुजवत्= उतथ्यनाम्नः महर्षेरनुज इव। जगाद= उवाच, अवोचत्। गुरुजनशीलमनुसरन्ति प्रायेण शिष्याः। अस्मिन् श्लोके उपमालंकारः।
**समासः-** आहितः भरो यस्यां सा आहितभरा, ताम् माहितमराम् (ब० व्री)। गदस्य अग्रजः गदाग्रजः, तम् गदाग्रजम् (त० पु०)। उतथ्यस्य अनुजः उतथ्यानुजः, तेन तुल्यम् उतथ्यानुजवत्। न उद्धतम् अनुद्धतम् यथा स्यात्तथा। उतथ्यानुजवत्- उतथ्यानुज + 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः।

**व्याकरणविशेषः-** वक्तुमुक्ते- वक्तुंम्- वच्+तुमुन्। उक्ते- वच्+क्तः। यजादित्वात्सम्प्रसारणम्। वाचिकम्- वच्+स्वार्थे ठक्।

उद्धवः अतीव विनयपूर्वकम् उक्तवान्

**आशयः-** उद्धवोऽपि भाग्येन वचनावसरं लब्ध्वा हरेः सम्मुखीभूय सारगर्भामिमां वाचम् बृहस्पतिवत् अतीव विनयपूर्वकम् उक्तवान्।

**किं जगादेत्याह-**

**सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना।**
**निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥70॥**

**अन्वयः** - सम्प्रति मुसलपाणिना उक्ते (सति) वक्तुम् असाम्प्रतम्, लेखेन अर्थे निर्धारिते (सति) वाचिकं खलु उक्त्वा खलु ॥

**व्याख्या** - सम्प्रति = अधुना। मुसलपाणिना = बलभद्रेण। उक्ते =कथिते। (सति) वक्तुम् = निगदितुं। असाम्प्रतं = अनुचितं। लेखेन = पत्रेण। अर्थे = वाच्ये। निर्धारिते = निर्णीते सति। वाचिकं = संदेशवचनं खलु, उक्त्वा खलु = न वाच्यं खलु इत्यर्थः।

**समासः**-मुसलं पाणौ यस्य सः मुसलपाणिः, तेन मुसलपाणिना ( ब० व्री०) लिख्यतेऽस्मिन्निति लेखः, तेन लेखेन। न साम्प्रतम् असाम्प्रतम्।

**अलङ्कारः**- अत्र लिखितार्थे यथा वाचिकं निरर्थकं तथा बलरामोक्ते मम वचनमनवकाशमेवेति वाक्यार्थस्य प्रतिबिम्बनाद् दृष्टान्तालङ्कारः। किञ्चात्र स्तुतिव्याजेन निन्दावगम्यते इति व्याजस्तुतिश्च।

लेखनेन प्रकरणस्य निर्णये वाचिकवचनं व्यर्थं भवति

**आशयः** - बलभद्रेण यदा यानमङ्गीकृतं तदा मदुक्तेन किम्भविष्यति। यानप्रस्तावो⌡पि सर्वैः स्वीकृतः। लिपिबद्धश्च सञ्जातः। अर्थात् यदा बलभद्रस्य वचनं पश्चात् एकं वस्तु निर्णीतं तदा पुनः मम तस्य विषये किमपि वक्तुं व्यर्थं यतः लेखनेन प्रकरणस्य निर्णये वाचिकवचनं व्यर्थं भवति।

तर्हि किं तुष्णींभूतेन भाव्यं नेत्याह-

**तथापि यन्मय्यपि ते गुरुरित्येष गौरवम् ।**
**तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः ॥71॥**

**अन्वयः** - (हे कृष्ण!) तथापि ते मयि अपि गुरुः इति यद् गौरवम् अस्ति तत् जल्पतः मम प्रयोजककर्तृत्वम् उपैति ॥

**व्याख्या** - तथापि= बलेन निर्णीतेऽपि। ते= तव। मयि = मद्विषयेऽपि। गुरुः= आचार्यः। इति= इत्थं। यत् गौरवं= आदरातिशयः। अस्ति= वर्तते। तत्= तदेव गौरवम्। जल्पतः= कथयतः। मम= मे, उद्धवस्य। प्रयोजककर्तृत्वं= प्रेरकत्वम्। उपैति= प्राप्नोति । अत एव वक्ष्यामीत्यर्थः। न हि विद्भिः पृष्टस्य विशेषज्ञस्य मूर्खवत्तूष्णीभावो युक्त इति भावः। अपि शब्देन आत्मनः हीनत्वं प्रयुञ्जनौद्धत्यं प्रकाशयति। इति शब्दः स्वरूपनिर्देशे। 'गुरुस्तु गीष्पतौ श्रेठे गुरौ पितरि दुर्भरे' इति विश्वः।

**समासः** - प्रयोजयतीति प्रयोजकः, प्रयोजकश्चाऽसौ कर्ता च प्रयोजक कर्ता, तस्य भावः प्रयोजककर्तृत्वम्, तत्। गुरोर्भावः गौरवम्। जल्पतीति जल्पन् तस्य जल्पतः।

न हि पण्डितः सादरं पृष्टस्य विशेषज्ञस्याज्ञवत्तू ष्णींभावो युक्त इति

**आशयः** - तथापि मयि "अयं मे गुरुः" इति तवादरातिशयमवलोक्य किञ्चिद्वक्तुं समुत्सुकोऽस्मि। तथापि (अर्थात् बलरामेण युद्धनिर्णयस्य अनन्तरमपि ) भवतः अस्मासु यः विश्वासः अस्ति सः गुरुवत् अस्ति। तेन प्रेरितोऽहं वक्तुम् इच्छन्ति। न हि विद्भिः सादरं पृष्टस्य विशेषज्ञस्यमूर्खवत्तूष्णीभावो युक्त इति भावः॥

ननु रामेणैव सर्वं प्रपञ्चेनोक्तम्, सम्प्रति किं ते वाच्यमस्तीत्याशङ्क्य वृथा प्रपञ्चोऽयमिति हृदि निधाय स्तुवन्नाह-

वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥72॥

**अन्वयः** - कतिपयैः एव वर्णैः(कतिपयैरेव) स्वरैः इव ग्रथितस्य वाङ्मयस्य गेयस्य इव विचित्रता अनन्ता (भवति) अहो ।।

**व्याख्या** - कतिपयैः= परिमितैः। एव, वर्णैः= पञ्चाशन्मातृकाक्षरैः (कतिपयैरेव - परिमितैरेव, सप्तभिरेव) स्वरैः= निषादादिभिः, इव= यथा। ग्रथितस्य= गुम्फितस्य, वाङ्मयस्य= शब्दजालस्य, गेयस्य= गानस्य, इव= यथा ,विचित्रता= वैचित्र्यं, अनन्ता= अपरिमिता, अहो= आश्चर्यम्। अत्र हलिनोक्तं तथाप्यहमन्यदेव विचित्रतरं वच्मीति तात्पर्यम्। उपमालङ्कारः। 'निषादर्षभगान्धारषड्जमध्यमधैवताः।

**समासः** - वागेव वाङमयम्, तस्य वाङ् मयस्य। गीयते इति गेयम्। तस्य गेयस्य। यस्या सा अनन्ता। विचित्रता- विशेषेण चित्रं विचित्रं तस्य भावः विचित्रता। न विद्यन्ते अन्तः।

**व्याकरणविशेषं**- वाङ्मयस्य- वाच्+स्वार्थे विकारे वा मयट्, चस्य कः कस्य ङः। गेयस्य- गा+यत्, 'ईद्यति' इति ईकारे ततो गणः।

कतिपयैः परिमितैरेववर्णैःपञ्चाशतैव मातृकाक्षरैः, कतिपयैः सप्तभिरेव स्वरैर्निपादादिभिर्ग्रथितस्य गुम्भितस्य वाङ्मयस्य शब्दजालस्य। 'एकाचोऽपि नित्यं मयटमिच्छन्ति' इति स्वार्थे मयट्। प्रत्ययवयवम् इव उपादानादनेकैवेयमुपमा ॥

परिमितैः वर्णैः ग्रथितस्य शब्दजालस्य वैचित्र्यं अपरिमिता

**आशयः**- बलदेवेन उक्तेऽपि मदुक्तौ पुनरुक्तिप्रसङ्गो न भविष्यति, यतः एकमेव तु वस्तु पञ्चाशन्मातृकाक्षराणां निषादादिसप्तस्वराणां च रचनावैचित्रात् बहुधा वर्णयितुं शक्यते।

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ॥73॥

**अन्वयः**- स्वेच्छया प्रकीर्णं बहु अपि कामम् अभिधीयते। अनुज्झितार्थसम्बन्धः प्रबन्धः दुरुदाहरः॥

**व्याख्या**- स्वेच्छया= यदृच्छया, स्वप्रतिभानुसारेण वा। प्रकीर्णं= असंगतम्। बहु अपि= अधिकमपि। कामं= यथेष्टं। अभिधीयते= कथ्यते। अनुज्झितार्थसम्बन्धः= अपरित्यक्तपदार्थसम्बन्धः। प्रबन्धः= सन्दर्भः। दुरुदाहरः= दुर्वचः (एव)। एतेन बलभद्रेण सङ्गतमेवोक्तमिति स्तुतिः,

असङ्गतमेवोक्तमिति निन्दा च गम्यते। अतो मया नीतिशास्त्रानुरूपमेवोच्यते इति भावः।

**समासः**- अर्थस्य सम्बन्धः अर्थसम्बन्धः, न उज्झितः अनुज्झितः, अनुज्झितः अर्थसम्बन्धो यस्मिन्नसौ अनुज्झितार्थसम्बन्धः (त० पु० गर्भ ब० व्री०)। स्वस्य इच्छा स्वेच्छा तया स्वेच्छया (त० पु०)। प्रबध्यते ग्रथ्यते इति प्रबन्धः। दुःखेन उदाह्रियते इति दुरुदाहरः।

बलभद्रेण नीतिशास्त्रानुरूपम् एवम् उच्यते

**आशयः** - असम्बद्धस्य प्रबन्धस्य वक्तारः सुलभाः खलु। पूर्वोत्तरसम्बन्ध युतः प्रबन्धस्तु कदाचिदेव केनचिदुच्यते। अस्मिन् जगति जनाः स्वप्रतिभानुसारेण असंगतम् अधिकमपि यथेष्टं कथ्यते। किन्तु अपरित्यक्तपदार्थसम्बन्धः सन्दर्भः दुर्वचः एव इत्यत्राशयः।

**म्रदीयसीमपि घनामनल्पगुणकल्पिताम् ।**
**प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥74॥**

**अन्वयः** - (हे कृष्ण!) कुशलाः म्रदीयसीम् अपि घनाम् अनल्पगुण कल्पितां चित्रां वाचं पटीम् इव प्रसारयन्ति ।।

**व्याख्या**- कुशलाः= चतुराः वक्तारः। पटीपक्षे - कलाकुशलाः। मद्रीयसीं= सुकुमाराक्षराम्। पटीपक्षे- श्लक्षणतमाम्, अतिकोमलाम्। घनां= अर्थकठिनाम् अन्यत्र कदलीदलसन्निभाम्। अनल्पगुणकल्पितां= समधिकतया श्लेषादिना रचितां अन्यत्र बहुतन्तुनिर्मितां। चित्रां= शब्दादिविचित्रां, अन्यत्र चित्र-विचित्र रूपां च। वाचं= वाणीं। पटीं= शाटीं। इव= सदृश। प्रसारयन्ति= विस्तारयन्ति (पटीपक्षे) वितानयन्तीति भावः। बलरामवचनमप्येवंविधमिति स्तुतिः, नैवं विधमिति निन्दा च गम्यते। अत्र श्लेषगर्भित पूर्णोपमालङ्कारः।

**समासः** - अतिशयेन मृद्वी म्रदीयसी तां म्रदीयसीम्। न अल्पाः अनल्पाः, अनल्पाश्च ते गुणाश्च अनल्पगुणाः, तैः कल्पिता अनल्पगुणकल्पिता, ताम् अनल्पगुणकल्पिताम्।

**व्याकरणविशेषः**- म्रदीयसीम्- मृदु + ईयसुन्, ऋकारस्य रेफादेशः।

बलरामवचनमपि एवं विधमिति स्तुतिः

**आशयः** - सुचतुरा एव कोमलां बहुगुणगरीयसीं सारगर्भां गिरं विस्तारयितुं समर्थाः।

(कुशला वक्तारो प्रदीयसीमतिसुकुमाराक्षरां श्लक्षणतरां च तथापि घनामर्थं गुर्वीम्, अन्यत्र सान्द्राम्। कदलीदलकल्पामित्यर्थः। अनल्पैः बहुभिः गुणैः श्लेषादिभिः तन्तुभिश्च कल्पितां रचितां निर्मितां च चित्रां शब्दादिविचित्रां

विचित्ररूपां च वाचं पटीं शाटीमिव प्रसारयन्ति। रामवागप्येवं विधेति स्तुतिः, रामवाक्तु नैवं विधेति निन्दा च गम्यते।)

अथ उद्धवः स्वसिद्धान्तं वर्णयिष्यन्स्तुत्या गर्वं परिहरन् हरिम् अभिमुखीकरोति-

विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः।
हेतुः प रिचयस्थैर्ये वस्तुर्गुणनिकैव सा ॥75॥

**अन्वयः** - (हे कृष्ण!) विशेषविदुषः तव पुरः शास्त्रम् उद्ग्राह्यते ( इति) यत् सा वक्तुः परिचयस्थैर्ये हेतुः गुणनिका एव ।।

**व्याख्या** - विशेषविदुषः= विशेषज्ञस्य। तव= भवतः। पुरः= अग्रे। शास्त्रम् = नीतिशास्त्रं। उद्ग्राह्यते= उपन्यस्यते। इति यत्। सा तदुद्ग्राहणम्। वक्तुः= उद्ग्राहयितुः। परिचयस्थैर्ये - अभ्यासदार्ढ्ये। हेतुः= कारणम्। गुणनिका एव = अभ्यास एव। न तु वैदुष्यप्रकटनमिति भावः। 'उद्ग्राहितमुपन्यस्तम्' इति वैजयन्ती। 'संस्तवः स्यात्परिचयः' इत्यमरः । 'अभ्यासे गुणनी योग्या' इति त्रिकाण्डशेषः ।

**समासः** - विशेषं वेत्तीति विशेषविद्वान्, तस्य विशेषविदुषः। स्थिरस्य भावः स्थैर्यम्, परिचयस्य स्थैर्यं परिचयस्थैर्यम्, तस्मिन् परिचयस्थैर्ये (त० पु०)

उद्धवः हरिम् अभिमुखीकरोति

**आशयः** –हे कृष्ण! नीतिविशेषज्ञस्य भवतः पुरः नीतिविषये यत्किञ्चित् उपन्यस्यते इति यत् तद् मम अभ्यासस्य सुदृढीकरणाय एव। न तु मम पाण्डित्यस्य प्रकाशनाय।

सम्प्रति स्वमतमुपन्यस्यति-

प्रज्ञोत्साहवतः स्वामी यतेताधातुमात्मनि ।
तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः।।76॥

**अन्वयः** - अतः ( हे कृष्ण! ) स्वामी प्रज्ञोत्साहौ आत्मनि आधातुं यतेत । हि तौ उदेष्यन्त्याः जिगीषोः आत्मसम्पदः मूलम् ।।

**व्याख्या** - अतः= अस्मात् कारणात्। स्वामी= प्रभुः। प्रज्ञोत्साहौ= मन्त्रोत्साहशक्ती। आत्मनि= स्वस्मिन्। आधातुं= सम्पादयितुं। यतेत उद्युञ्जीत, स्वयमुभयशक्तिमान् भवेदित्यर्थः। हि= यस्मात् कारणात्। तौ= प्रज्ञोत्साहौ। उदेष्यन्त्याः= वर्त्स्यन्त्याः। जिगीषोः= विजेतुमिच्छोः।

आत्मसम्पदः= प्रभुशक्तेः। मूलं= निदानम्। यथोत्साहस्तथा मन्त्रोऽपि ग्राह्यो, न केवल उत्साह इति बलभद्रमतखण्डनम् ।

**समासः** - प्रकर्षेण जानाति अनयेति प्रज्ञा, प्रज्ञा च उत्साहश्चेति प्रज्ञोत्साहौ (इन्द्रः)। आत्मः सम्पत् आत्मसम्पत्, तस्याः आरंभसम्पदः (त० पु०)। जेतुमिच्छति जिगीषुः, तस्य जिगीषोः।

राज्ञा स्वयमेव मन्त्रशक्तिं उत्साहशक्तिं च जनयेत्

**आशयः** - राज्ञा सर्वदा बुद्धिमता उत्साहवता च भाव्यम्, तत एव सम्पदमाप्तुं शक्नोति। अत एव राज्ञा स्वयमेव मन्त्रशक्तिं उत्साहशक्तिं च जनयेत्। स्वयमुभयशक्तिमान् भवेदित्यर्थः। यस्मात् तौ प्रज्ञात्साहौ प्रभुशक्तेः निदानं वर्तेते।

उत्साहवत्प्रज्ञापि ग्राह्येत्युक्तं तस्याः प्रयोजनमाह-

> **सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये ।**
> **तत्रानिशं निषण्णास्ते जानते जातु न श्रमम्** ॥77॥

**अन्वयः** - (हे कृष्ण !) ये धीराः सोपधानां स्थेयसीं धियं खट्वयन्ति ते तत्र अनिशं निषण्णाः ( सन्तः ) जातु श्रमं न जानते॥

**व्याख्या** - ये धीराः= गम्भीराः बुद्धिमन्त इत्यर्थः। सोपधानां= सविशेषां, युक्तियुक्तामित्यर्थः। खट्वापक्षे- गेन्दुकसहितां। स्थेयसीं= सुस्थिरां, चाञ्चल्यरहितामित्यर्थः। खट्वापक्षे= द्रढीयसीञ्च। धियं= प्रज्ञां। खट्वयन्ति = पर्यङ्कयन्ति, खट्वां पर्यङ्कं कुर्वन्ति आश्रयन्तीत्यर्थः। ते= धीराः। तत्र = धीखट्वायां। अनिशं - निरन्तरं, अश्रान्तमित्यर्थः। निषण्णाः= विश्रान्ताः सन्तः। जातु= कदाचित्। श्रमं= खेदं। खट्वापक्षे - रत्यादिश्रमम्। न जानते = न विदन्ति।

**समासः**- उपधानेन सहिता सोपधाना, ताम् सोपधानाम्। खट्वामिवाचरन्ति खट्वयन्ति । न विद्यते निशा यस्मिन् तत्तथा अनिशम्।

**व्याकरणविशेषं**- स्थेयसीम्- स्थिर+ईयसुन्+'प्रियस्थिर'- इत्यादिना स्थादेशः, ततो ङाप्।

**अलङ्कारः**- श्लोकेऽस्मिन् बुद्धिपूर्वक ऐवोत्साहो सेव्य न केवल इति, सर्वथा धीराश्रयणीयेति भावः। परिणामालङ्कारः। तल्लक्षणं यथा कुवलयानन्दे - 'परिणामः क्रियार्थश्चेद्विषयी विषयात्मना' इति।

जनाः प्रज्ञास्वरूपां शय्यां आश्रित्य उत्साहपूर्वकं कर्म कुर्वन्ति

**आशयः -** ये जनाः सर्वदा प्रज्ञास्वरूपां शय्याम् आश्रित्य उत्साहपूर्वकं कर्म कुर्वन्ति ते बहुकाले समतीतेऽपि ततः खिन्ना न भवन्ति। अतः बुद्धिपूर्वकम् एव उत्साहः सेव्यः केवलम् उत्साहो न सेव्यः। अर्थात् ये विद्वांसः तर्कयुक्तां स्थिरबुद्धिं शरणं गृह्णन्ति, तां शय्यां कुर्वन्ति, ते तस्मिन् सर्वदा शान्तिपूर्वकं विश्रामं कुर्वन्ति, तेषां कदापि दुःखं न भवति। धीपूर्वक एवोत्साहः सेव्यो न केवल इति सर्वथा धीराश्रयणीयः इत्यत्राशयः।

अथ प्रज्ञाप्रज्ञयोः द्वाभ्यां वैषम्यमाह-

स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति च ।
बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत् ॥78॥

**अन्वयः -** ( हे कृष्ण !) तीक्ष्णाः शरवत् स्तोकं स्पृशन्ति अन्तः च विशन्ति । बहुस्पृशा अपि स्थूलेन अश्मवत् बहिः स्थीयते ॥

**व्याख्या -** तीक्ष्णाः= निशितप्रज्ञाः। शरवत्= शरेण तुल्यं। स्तोकं= अल्पमेव। स्पृशन्ति= लक्ष्यबहिर्भूतदेशस्य स्पर्शं कुर्वन्ति। अन्तः= कार्यस्य अन्तः। पक्षान्तरे-शरीरस्याभ्यन्तरम्। च विशन्ति= प्रविशन्ति च। बहुस्पृशाऽपि= विपुलं प्रदेशं स्पृशताऽपि। स्थूलेन= मन्देन, स्थूलबुद्धिना। पक्षान्तरे- बृहता च। अश्मवत्= प्रस्तरवत्, पाषाणेन तुल्यं। बहिः= कार्यस्य बहिर्देश एव। पक्षान्तरे- शरीरस्य बहिः प्रदेशे एव। स्थीयते= स्थितिः क्रियते, निवासः क्रियते। मूर्खेण प्रयत्नेनाऽपि कार्यसिद्धिः कर्तुं न शक्यते इति भावः। उपमालङ्कारः।

**समासः -** बहु स्पृशतीति बहुस्पृक् तेन बहुस्पृशा। शरेण तुल्यं शरवत्। अश्मना तुल्यम् अश्मवत्।

**व्याकरणविशेषः-** शरवत्- शर+वतिः, 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण वतिः। अश्मवत्- अश्मन्+वतिः।

मूर्खेण प्रयत्नेनाऽपि कार्यसिद्धिः कर्तुं न शक्यते

**आशयः-** बुद्धिमन्तः स्वल्पप्रयासेनैव बहु कर्म साधयन्ति, मूर्खाः बहु प्रयतन्ते परं किञ्चदपि साधयितुं शक्ता न भवन्ति। तीक्ष्णमनसः किञ्चित् अवसरं प्राप्य बाणवत् अन्तः प्रविशति, अल्पायासेन बहु कार्यं साधयन्तीत्यर्थः। मूर्खाः कार्यं मध्यैव परित्यजन्ति, किन्तु बुद्धिमन्तः अन्तःपर्यन्तं कार्यसंलग्नाः भवन्ति ।

आरभन्तेऽल्पमेवाऽज्ञाः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥79॥

**अन्वयः** - अज्ञाः अल्पम् एव आरभन्ते, (परं) कामं व्यग्राः च भवन्ति । कृतधियः, महारम्भाः (अथ ) निराकुलाः च तिष्ठन्ति ॥

**व्याख्या** – अज्ञाः= मूढाः, अल्पं= स्तोकं, तुच्छं। एव (कार्यं) आरभन्ते= प्रक्रमन्ते। कामं= अत्यन्तं। व्यग्राः= व्याकुलाः, च भवन्ति= जायन्ते। न च कार्यस्य पारं गच्छन्तीत्यर्थः। कृतधियः= शिक्षितबुद्धयः। तु महारम्भाः= महोद्योगाः। निराकुलाः= अव्याकुलाः स्वस्था इत्यर्थः। तिष्ठन्ति= कार्यस्य पारं गच्छन्तीत्यर्थः।

**समासः** - जानन्तीति ज्ञाः, न ज्ञाः अज्ञाः। विगतम् अग्रं येषां ते व्यग्राः। आरभ्यन्ते इति आरम्भाः, महान्तः आरम्भाः येषां ते महारम्भाः (ब० व्री०) कृता धीः येषां ते कृतधियः। आकुलेभ्यः निर्गताः निराकुलाः। आरभन्ते-आ+रभ्+लट्-झ।

मूढाः अल्पं कार्यमारभन्ते अत्यन्तं व्याकुलाः, बुद्धिमान् निराकुलाः

**आशयः** - महान्तः महारम्भे अपि निराकुला भवन्ति। जडाः स्वल्पेऽपि आरम्भे व्याकुला जायन्ते ॥ सरलं कार्यं कुर्वन्तः मूर्खजनाः अतीव व्याकुलाः भवन्ति। बुद्धिमान् जनाः बृहत्तमं कार्यं कुर्वन्तः अपि अव्यग्राः एव तिष्ठन्ति।

**नैतिकमहत्वम्** - मूर्खाः जनाः लघु अपि कार्यं आरभ्य तस्मिन् एव व्याकुलो जायते, सम्पादयितुं न पारयन्ति परन्तु ये बुद्धिमन्तः ते तु महत्कार्यं आरभन्ते तथा समाप्तिपर्यन्तं निश्चिन्तो भूत्वा कार्यं समाप्नुवन्ति इति उद्धवोक्तिः प्रमाणयति।

अथ प्रज्ञावानपि न प्रमाद्येदित्याह-

> **उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।**
> **हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥80॥**

**अन्वयः** - उपायम् आस्थितस्य अपि प्रमाद्यतः (पुंसः) अर्थाः नश्यन्ति। (यथा) शयालुः मृगयुः उपशयस्थः अपि मृगान् न हन्ति ॥

**व्याख्या** - उपायं= कार्यसाधनपद्धतिं। आस्थितस्य= प्राप्तस्य। अपि= उपायेनैव कार्यं साधयतोऽपि। प्रमाद्यतः= अनवहितस्य। अर्थाः= कार्याणि। तस्यन्ति= नाशमायान्ति। तथाहि- शयालुः= निद्रालुः। उपायस्थोऽपि= मृगमार्गे प्रच्छन्नस्थाने वर्त्तमानोऽपि। मृगान्= हरिणान्। न हन्ति= त मारयति।

**समासः** - उपशेरतेऽस्मिन्निति उपशयः, उपशये तिष्ठतीति उपशयस्थः। शेते तच्छीलः शयालुः। मृगान् यातीति मृगयुः।

**अलङ्कारः**- अत्र हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् इति विशेषेण उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः इति सामान्यस्य समर्थनात् अर्थान्तरन्यासोऽलङ्कारः।

प्रज्ञावान् न प्रमाद्यतः

**आशयः** – चतुरः अपि उत्साहं परित्यज्य यदि प्रमाद्यति तदा तस्यापि कार्यं न सिध्यति। मृगमार्गे वर्तमानः अपि व्याधः निद्रालुः सन् हरिणान् न मारयति।

एवं प्रज्ञाया आवश्यकत्वमुक्तम्, तथोत्साहस्याप्याह-

उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥81॥

**अन्वयः** - जिगीषुः एकः द्वादशसु अपि राजसु आदित्येषु दिनकृत् इव ईहाम् अत्यजन् उदेतुं कल्पते॥

**व्याख्या** - जिगीषुः= जयमभिलषमाणः। एकः= एक एव। द्वादशसु अपि= द्वादशसङ्ख्यकेषु अपि। राजसु= नृपेषु मध्ये। द्वादशसु, आदित्येषु= सूर्येषु। दिनकृत्= दिवसकरणे व्याप्रियमाणः भास्करः। इव= तुल्य। ईहाम्= उत्साहम्। अत्यजन्= अपरिहरन्, अनुपेक्षमाणः। उदेतुं= उदयाय। कल्पते= प्रभवति। उत्साहशक्तिः प्रभुशक्तेरपि मूलमिति भावः। 'नानालिङ्गत्वादृतूनां नानासूर्यत्वम्' इति श्रुतेः प्रतिमासादित्यभेदाद् द्वादशत्वम्, तच्चैकस्यैव द्वादशात्मकत्वम्। 'द्वादशात्मा दिवाकरः' इत्यभिधानात्।

**समासः** - त्यजतीति त्यजन्, न त्यजन् अत्यजन्। द्वौ च दश च द्वादश, तेषु द्वादशसु। जेतुमिच्छुः जिगीषुः। दिनं करोतीति दिनकृत्। अदितेः अपत्यानि पुमांसः आदित्याः, तेषु आदित्येषु।

उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमिति

**आशयः** – उत्साहशीला एव राजा सकलं राजमण्डलं आक्रमितुं समर्थः। सोत्साहस्यैव राज्ञः अभ्युदयो भवति। उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमित्यर्थः। एको विजयकामो द्वादशराजमध्येऽभ्युदयम् आप्नोति यथा उत्साहं न त्यक्त्वा द्वादशप्रकारसूर्येभ्यः दिवसं करोति सूर्यः उदयं प्राप्नोति।

**राजनैतिकमहत्वम्** - कस्यचित् राज्ञः सम्पूर्णशक्तेराधारः शक्तित्रयमेव - यथा मन्त्रशक्तिः प्रभुशक्तिः उत्साहशक्तिश्च। येषां प्रयोगेन व्यक्तिः श्रेष्ठत्वं याति। यतः एतत् त्रयं हि राज्यं सुस्थिरं सुदृढं सुव्यवस्थितं च निर्माति। त्रिशक्तीनां विवेचनं कौटिल्याचार्येण विवेच्यते- मन्त्रशक्तिः ज्ञानबलं कोशदण्डौ प्रभुशक्तिः, विक्रमबलं उत्साहशक्तिः च। उत्साहशक्तिरेव

प्रभुशक्तेः मूलं। पुराणेषु द्वादश-मासानां द्वादश आदित्याः विवेचिताः यथा- इन्द्रः धाता भगः पूषा मित्रः वरुणः अर्यमा अर्चि विवस्वान् त्वष्टा सविता विष्णुश्च। एतेषु द्वादशषु यथा दिनकरः एकैव अन्ये एकादश केवलम् आदित्यमात्रम् तथा द्वादश- राजसु विजयाभिलाषी एकैव उदयते प्रतिष्ठितो भवति अन्यैकादश केवलमवशिष्यन्ते।

उपायमास्थितस्येत्यत्र राजा न प्रमाद्येदित्युक्तम्, अप्रमादप्रकारमाह-

बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥82॥

**अन्वयः** - बुद्धिशस्त्रः प्रकृत्यङ्गः घनसंवृतिकल्चुकः चारेक्षणः दूतमुखः पार्थिवः कः अपि पुरुषः (राजोच्यते नान्य इत्युक्तं भवति)।।

**व्याख्या** - बुद्धिशस्त्रः= प्रज्ञायुधः। प्रकृत्यङ्गः= स्वाम्यादि - प्रकृत्यङ्गः। घनसंवृतिकश्चकः= दुर्भेदमन्त्रगोपनकवचः। चारेक्षणः= गूढपुरुषनयनः। दूतमुखः = दूतवदनः (एवम्भूतः) पार्थिवः= नृपः। कः अपि पुरुषः= अलौकिक एवायं लोकेविलक्षणः कश्चन पुमान् इत्यर्थः।

**समासः** - शस्यते क्षिप्यते इति शस्त्रम्, बुद्धिरेव शस्त्रं यस्य सः बुद्धिशस्त्रः (ब० व्री०)। प्रकृतय एवांगानि यस्य सः प्रकृत्यङ्गः। घना चाऽसौ संवृतिश्च घवसंवृति: (क० धा०), घनसंवृतिरेव कञ्चुकं यस्य सः घनसंवृतिकञ्चुकः (ब० व्री०)। चारा एव ईक्षणे यस्य सः चारेक्षण: (ब० व्री०)। दूता एव मुखं यस्य सः द्रुतमुखः।

**व्याकरणविशेषः**- पार्थिवः- पृथिवी+ 'तस्येश्वरः' इत्यण् प्रत्ययः।

राजा सप्तभिः प्रकृतिभिः शरीरवान् भवति

**आशयः** - राजा किल 'स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च' इति सप्तभिः प्रकृतिभिः शरीरवान् भवति, पुनः स एव स्वमन्त्रगुप्तिरूपकवचेन निजं शरीरं रक्षति। उत्साहशीलः पुनः गुप्तचरं शत्रोः बलाबलं सम्यक्ज्ञात्वा बुद्धिपूर्वकं प्रहरति ।।

गुप्तचराः शत्रूणां रहस्यज्ञापने सामर्थाः भवेयुः। गुप्तचराः वस्तुतः राज्ञः नेत्रवत् कार्यं कुर्वन्ति। अतः राजकार्यानुसारं बुद्धिर्हि यस्य राज्ञः शस्त्रं, स्वामि-अमात्यादयः राज्याङ्गानि एव यस्य अङ्गानि, दुर्भेद्यमन्त्राणां सुरक्षैव यस्य कञ्चुकः, गुप्तचराः हि यस्य नेत्राणि च सैव राजा अलौकिकत्वेन प्रतिभाति जगत्यस्मिनिति उद्धवस्य वर्णनमद्वेत्वेऽपि गुरुतरं महत्वपूर्णं प्रतीयते।

'चतुर्थोपायसाद्ये' इत्यादिना यत्क्षात्रमेव कर्तव्यमुक्तं तत्रोत्तरमाह-

तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः ।
नैकमोजः प्रसादो वा रसभागविदः कवेः ॥83॥

**अन्वयः** - कालज्ञस्य महीपतेः तेजः क्षमा वा एकान्तं न। (तथाहि) रसभावविदः कवेः एकम् ओजः(एकः) प्रसादो वा न ।।

**व्याख्या** - कालज्ञस्य= कालविशेषविदुषः। महीपतेः= भूपतेः। तेजः= प्रतापः। क्षमा= क्षान्तिः। एकान्तं= अत्यन्तं। न= नास्ति। "किन्तु स यथावसरं उभयमपि आश्रयतीत्यर्थः" तथाहि - रसभावविदः= रसान्-शृङ्गारादीन्, भावान्= निर्वेदादींश्च जानतः। कवेः= कवयितुः। एकं= केवल। ओजः= प्रौढप्रबन्धत्वं। प्रसादः= सुकुमाररचना वा। न भवति, किन्तु सोऽपि रसानुगुण्येन यथास्थानं उभयमप्यायोजयति।

**समासः** - कालं जानातीति कालज्ञः, तस्य कालज्ञस्य (त० पु०)। रसाश्च भावाश्च रसभावाः तान् वेत्तीति रसभाववित्। तस्य रसभावविदेः (द्वन्द्वगर्भः त० पु०)। मह्याः पतिः महीपतिः तस्य महीपतेः। एकः अन्तः यस्मिन् कर्मणि तत् यथा स्यात् तथा एकान्तम्।

**व्याकरणविशेषः**- कालज्ञस्य –काल + काल+ज्ञा+ 'अतोऽनुपसर्गे कः' इति कप्रत्ययः। रसभावविदः- रस+भाव+विद्+क्विप्।

**आशयः** – उपायप्रयोगाभिज्ञो राजा समयं परिज्ञायैव तेजः क्षमा वा प्रयुङ्क्ते।

भूपतेः प्रतापः क्षान्तिः च अत्यन्तं नास्ति

तस्य महीपतेस्तेजः क्षात्रमेवेति वा क्षमैव एकान्तं नियमो नास्ति। किन्तु यथाकालं उभयमपि आश्रयणीयमित्यर्थः। तथा हि - रसान् शृङ्गारादीन् भावान् निर्वेदादींश्च वेत्ति यस्तस्य रसभावविदः। भावग्रहणं सम्पातायातम्। कवेः कवितुरेकं केवलमोजः प्रौढप्रबन्धत्वं वा एकः प्रसादः, सुकुमारप्रबन्धस्वं वा न। किन्तु तत्र हि रसानुगुण्येन यथायोग्यं उभयमपि उपादेयम्। दृष्टान्तालङ्कारः॥

कृतापचारोऽपि परैरनाविष्कृतविक्रियः।
असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा ॥84॥

**अन्वयः** - परैः कृतापचारः अपि अनाविष्कृतविक्रियः असाध्यः (सन्) गदः यथा काले प्राप्ते (सति) कोपं कुरुते ॥

**व्याख्या** - परैः= शत्रुभिः, कृतापचारः= विहितापकारः, कृतापथ्यश्च, अनाविष्कृतविक्रियः= अन्तर्गूढविकारः, असाध्यः= अप्रतिसमाधेयः। गदः

= रोगः, यथा= इव, काले= बलक्षयावसरे। प्राप्ते 'सति'। कोपं कुरुते= प्रकुप्यति।

शत्रुभिः कृतापथ्यश्च अन्तर्गूढविकारः असाध्यः

**आशयः** - यथा रोगः पथ्यापथ्यविवेकरहितं पुरुषं बले क्षीणे सति अधिकतरं पीडयति; तथैव असावपि असमये परिभूतः सन् निजं मनोविकारं निगूहति पुनः समये प्राप्ते अप्रतिकारं यथा तथा प्रहरति, उक्तश्च केनचित्, नीतितत्त्वविदा 'वहेदमित्रं स्कन्धेन यावत् कालविपर्ययः। स्तमेव चागते काले भिन्द्याद्घटमिवाश्मना' ॥

मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते।
प्रदीपः स्नेहमादत्ते दशयाऽभ्यन्तरस्थया ॥85॥

**अन्वयः** - मृदुव्यवहितं तेजः अर्थान् भोक्तुं प्रकल्पते, तथाहि प्रदीपः अभ्यन्तरस्थया दशया स्नेहम् आदत्ते ॥

**व्याख्या** - मृदुव्यवहितं= कोमलवस्तुताम् अन्तर्हितं। तेजः= प्रतापः। पक्षान्तरे - ज्योतिश्च। अर्थान्= विषयान् राज्यादिभोगान्। पक्षान्तरे- तैलादीश्च। भोक्तुं= उपभोक्तुं। पक्षान्तरे - दग्धुं च। प्रक्ल्पते= शक्नोति ( तथा हि ) प्रदीपः= दीपः। अभ्यन्तरस्थया= मध्यस्थितया। दशया= वर्त्या। स्नेहं - तैलादिकं अर्थम्। आदत्ते= गृह्णाति।

**समासः** - मृदुना व्यवहितं मृदुव्यवहितम् (त० पु०)। अभिगतम् अन्तरम् अभ्यन्तरम्, अभ्यन्तरे तिष्ठतीति अभ्यन्तरस्था, तया अभ्यन्तरस्थया (त० पु०)

राजा मृदुस्वभावेन राज्यधनं भोक्तुं शक्नोति

**आशयः** - क्षमया क्षात्रं फलति अतः सर्वथा विजिगीषुणा प्रथमं क्षन्तव्यम्। तया च तेजः शोभते विजयश्चावति। क्षान्तिपूर्वमेव क्षात्रं फलतीति सर्वथा प्रथमं क्षन्तव्यमिति भावः। राजा मृदु स्वभावेन राज्यधनं भोक्तुं शक्नोति। यथा दीपः मध्य स्थितया वार्त्या तैलादिकम् अर्थम् गृह्णाति।

**तर्हि पौरुषं मा भून्नित्यं, क्षममाणस्य दैवमेव श्रेयो विधास्यतीत्याशङ्कयाह-**

नालम्बते दैष्टिकतां न निषीदति पौरुषे।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥86॥

**अन्वयः** - विद्वान् दैष्टिकतां न आलम्बते पौरुषे च न निषीदति। (किन्तु) सत्कविः शब्दार्थौ इव द्वयम् अपेक्षते ।।

**व्याख्या** - विद्वान्= पण्डितः, दैष्टिकतां= देवप्रमाणकतां, न आलम्बते= नाश्रयति, पौरुषे= केवलं पुरुषकारेऽपि, न= नैव, निषीदति= तिष्ठति, (किन्तु) सत्कविः= श्रेष्ठकाव्यकर्ता, शब्दार्थौ इव= काव्यशरीरभूताविव। द्वयं= दैवं पौरुषञ्च। अपेक्षते= आश्रयते।

**समासः** - दिष्टे मतिर्यस्यासौ दैष्टिकः, तस्य भावः तत्ता दैष्टिकतया, ताम् दैष्टिकताम्। संश्चाऽसौ कविश्च सत्कविः (क० धा०) शब्दश्च अर्थश्च शब्दार्थौ तौ तथाभूतौ।

**अलङ्कारः**- सत्कविः शब्दार्थौ इव राजा द्वयम्(दैवम्) पौरुषञ्च अपेक्षते इत्यत्र उपमालङ्कारः।

नीतितत्ववान् राजा दैवं पौरुषञ्च आश्रयति ।

**आशयः** - विद्वांसः केवलं दैवम् अथवा पौरुषं एव नाश्रयन्ति किन्तु सत्कविः यथा कार्यनिर्माणविधौ शब्दं अर्थञ्च अपेक्षते तथैव नीतितत्ववित् राजा अपि दैवं पौरुषञ्च आश्रयति । अतः समये पौरुषमप्यावश्यकं परन्तु तदेव असमये प्रयुक्तं सत् हानिकरं भविष्यति ॥

**अथ क्षान्तेः फलमाह-**

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ।**
**रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥87॥**

**अन्वयः** - रसस्य स्थायिनः एकस्यार्थे भूयांसः सञ्चारिणः भावाः यथा प्रवर्तते तथा (स्थायिनः एकस्य) नेतुः ( अर्थे भूयांसः ) महीभृतः (प्रवर्तन्ते)।

**व्याख्या** - रसस्य = रसीभवतः। स्थायिनः= स्थायिभावस्य रत्यादेः। एकस्यार्थे = रसतां गच्छतः एकस्येव रत्यादेः स्वादुभावरूपे प्रयोजने। भूयांसः = बहवः। सञ्चारिणः= व्यभिचारिणः। भावाः= निर्वेदादयः। यथा प्रवर्तन्ते = यथा प्रवृत्ता भवन्ति। तथा= तेनैव प्रकारेण। स्थायिनः= स्थिरस्य, समयं अपेक्षमाणस्येत्यर्थः। नेतुः= नायकस्य, विजिगीषोः। अर्थे = प्रयोजने। भूयांसः= बहवः। महीभृतः= राजानः प्रवर्तन्ते। स्वयमेवास्य कार्यं साधयन्ति। उपमालंकारः।

**समासः** - तिष्ठतीति स्थायी, तस्य स्थायिनः। रस्यते इति रसः, तस्य रसस्य। महीं बिभ्रतीति महीभृत्। तस्य महीभृतः (त० पु०)।

राजानः स्वयमेव तस्य कार्यं साधयन्ति

**आशयः** - यथा एकस्य कस्यचिद्रसस्य प्रयोजने अपरे सञ्चारिणः भावाः तस्य कार्यं साधयन्ति तथैव क्षमाशीलस्य कस्यचिन्नेतुः कार्ये समुपस्थिता अपरे राजानः स्वयमेव तस्य तत् कार्यं साधयन्ति ॥

**क्षान्तिपक्ष एव गुणान्तरमाह-**

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥४४॥

**अन्वयः** - तन्त्रावापविदा योगैः मण्डलानि अधितिष्ठता नरेन्द्रेण शत्रवः फणीन्द्रा इव सुनिग्रहाः।

**व्याख्या** – तन्त्रावापविदा= स्वपरराष्ट्रचिन्तनविदुषा, शास्त्रौषधप्रयोगविदा च। योगैः= सामाद्युपायैः देवताध्यानैश्च। मण्डलानि = स्वपरराष्ट्राणि। अधितिष्ठता= आक्रमता, नरेन्द्रेण= नृपेण, विषवैद्येन च। शत्रवः= अरयः, फणीन्द्रा इव= भोगीन्द्रा इव, सुनिग्रहाः= सुखेन निग्राह्याः। अत्र प्रकृताप्रकृतविषयः श्लेष इति मल्लिनाथाः। वस्तुतस्तु श्लेषगर्भितोपमैवेयम्। 'तन्त्रः स्वराष्ट्र चिन्तायामावापः परचिन्तने। शास्त्रौषधमुख्येषु तन्त्रम्' इति वैजयन्ती।

**समासः** - तन्त्रश्च आवापश्च तन्त्रावापौ, तौ वेत्तीति तन्त्रावापवित्, तेन तन्त्रावापविदा । फणाः सन्ति येषां ते फणिनः, फणिनामिन्द्राः फणीन्द्राः । नराणामिन्द्रः नरेन्द्रः, तेन नरेन्द्रेण ।

क्षान्तिपक्ष एव गुणान्तरम्

**आशयः** - यथा विषवैद्यः मन्त्रौषधादिद्वारा महान्तं दुर्भरमपि सर्पं वशमानयति तथैव विचक्षणः भूपः शत्रोः आत्मनश्च बलाबलं सम्यग् विचार्य सामाद्युपायैः प्रजां स्वायत्तीकरोति ॥

## Summarised Overview

बलभद्रेण यदा यानमङ्गीकृतं तदा मदुक्तेन किम्भविष्यति। यानप्रस्तावोऽपि सर्वैः स्वीकृतः। लिपिबद्धश्च सञ्जातः। यदा बलभद्रस्य वचनं पश्चात् एकं वस्तु निर्णीतं तदा पुनः मम तस्य विषये किमपि वक्तुं व्यर्थं यतः लेखनेन प्रकरणस्य निर्णये वाचिकवचनं व्यर्थं भवति। एकमेव तु वस्तु पञ्चाशन्मातृकाक्षराणां निषादादिसप्तस्वराणां च रचनावैचित्रात् बहुधा वर्णयितुं शक्यते। सुचतुरा एव कोमलां बहुगुणगरीयसीं सारगर्भां गिरं विस्तारयितुं समर्थाः। राजनीतिविषये शक्ति द्वयं मन्त्रशक्तिः उत्साहशक्तिः च। जनाः प्रज्ञास्वरूपां शय्यामाश्रित्य उत्साहपूर्वकं कर्मकुर्वन्ति। विद्वांसः तर्कयुक्तां स्थिरबुद्धिं शरणं गृह्णन्ति, तां शय्यां मा कुर्वन्ति, ते तस्मिन् सर्वदा शान्तिपूर्वकं विश्रामं कुर्वन्ति, तेषां कदापि दुःखं न भवति। मूर्खबुद्धिमन्तयोः परस्परवैलक्षण्यम्। उत्साहशीलः पुनः गुप्तचरं शत्रोः बलाबलं सम्यक्ज्ञात्वा बुद्धिपूर्वकं प्रहरति। राजा मृदु स्वभावेन राज्यधनं भोक्तुं शक्नोति। यथा दीपः मध्ये स्थापयित्वा स्वस्य कान्तिं भुङ्क्ते। सत्कविः कार्यनिर्माणविधौ शब्दं अर्थञ्च अपेक्षते।

# Assignments

## श्लोकं व्याख्यात

1. उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
   जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥81॥

2. तेजः क्षमा वा नैकान्तां कालज्ञस्य महीपतेः ।
   नैकमोजः प्रसादो वा रसभागाविदः कवेः ॥83॥

3. स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ।
   रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ।।87।।

## अलङ्कारं विशदयत

1. सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना ।
   निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥70 ॥

2. सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये ।
   तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥77॥

3. नालम्बते दैष्टिकतां न निषीदति पौरुषे ।
   शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥86॥

## व्याकरणविशेषं लिखत

1. वक्तुमुक्ते
2. वाचिकम्
3. वाङ्मयस्य
4. गेयस्य
5. म्रदीयसीम्
6. शाश्वत्
7. अश्मवत्
8. पार्थिवः

9. कालज्ञस्य

10. रसभाववविदः

**उत्तरं लिखत**

1. वाचिकवचनं कथं व्यर्थम्?

2. वाङ्मयस्य विचित्रता कथं वर्ततो?

3. प्रज्ञाप्रज्ञयोः द्वाभ्यां वैषम्यं लिखत?

4. राजनीतिविषये शक्तिद्वयं किम् ?

5. जनाः किम् आश्रित्य कर्म कुर्वन्ति?

6. कीदृशाः प्रबन्धः दुरुदाहरः?

7. उत्साहशीलः कं प्रहरति?

8. राजा केन राज्यधनं भोक्तुं शक्नोति? उदाहरणसहितं विशदयत।

9. सत्कविः कार्यनिर्माणविधौ कौ अपेक्षते?

**आशयं विशदयत**

1. अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ।

2. हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान्।

3. “तेजः क्षमा वा नैकान्तं' कालशस्य महीपतेः” - सन्दर्भं विशदयत ।

4. मूर्खबुद्धिमन्तयोः परस्परवैलक्षण्यं लिखत।

5. शक्तित्रयाणि कानि?

**प्रबन्धं रचयत**

1. श्रीकृष्णं प्रति उद्धववचनं संगृहणीत।
2. राजनैतिकमहत्वम् उपन्यस्यत।

## Suggested Readings


1. Pandit Durgaprasad and Pandit Sivadatta, The Sisupalavadha of Magha with The Commentary(Sarvankasha) of Mallinatha (Edited ), Fourth Edition, Nirnaya sagara press, Bombay, 1905
2. आचार्यः श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वारणासी, 1985


## References


1. डो. शारदा चतुर्वेदी, शिशुपालवधमहाकाव्यम्, द्वितीयसर्गः, आशुबोधिनी संस्कृत-हिन्दीव्याख्यातोपेतम्, चौखम्बा कृष्णदास अकादमी, वारणासी, 2000
2. शिशुपालवधमहाकाव्यम्, डा. गणेशदत्तशास्त्रिशुक्लः,संसकृत-हिन्दी व्याख्योपेतम्, शारदा संस्कृत संस्थन जगतगंज, वारणसी
3. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
4. Sisupalavadha of Magha, Ed.by Pandit Durga Prasad & Pandit Sivadatta, Tukaram Javaji, Nirnayasagar Press, Bombay 1905
5. Makhabatta's Shishupalavadha with the commentary (sandeha-vishaushadhi) of Vallabhadeva, Edited by Ram Chandra Kak and Harabhatta Shastri, Srinagar, Kashmir, 1935


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# द्वितीयसर्गे 89-98 श्लोकाः

## Learning Outcomes

- महाकाव्यविषये परिचयं लभेयुः।
- काव्यानां व्याकरणविशेषज्ञानम्।
- महाकाव्येतिवृत्तपरिचयः।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः

## Background

लेखेन अर्थे निर्धारिते सति वाचिकवचनं व्यर्थम् भवति। एकमेव वस्तु वहुधा वर्णयितुं शक्यते। बलरामवचनम्। राजनीतिविषये शक्ति द्वयम्। जनाः प्रज्ञास्वरूपां शय्यामाश्रित्य उत्साहपूर्वकं कर्म कुर्वन्ति। विद्वांसः तर्कयुक्तां स्थिरबुद्धिं शरणं गृह्णन्ति, तां शय्यां कुर्वन्ति, ते तस्मिन् सर्वदा शान्तिपूर्वकं विश्रामं कुर्वन्ति, तेषां कदापि दुःखं न भवति। उत्साहशीलः पुनः गुप्तचरं शत्रोः बलाबलं सम्यक्ज्ञात्वा बुद्धिपूर्वकं प्रहरति। राजा मृदु स्वभावेन राज्यधनं भोक्तुं शक्नोति। यथा दीपः मध्ये स्थापयित्वा स्वस्य कान्तिं भुङ्क्ते। सत्कविः कार्यनिर्माणविधौ शब्दं अर्थञ्च अपेक्षते।

## Keywords

उत्तुङ्गः, अनल्पत्वात् , गुणतां, गगनपक्षे, एकार्थतन्तुप्रोतायां, यातव्यपार्ष्णि ग्राहादिमालायाम्, षाड्गुण्यं, रसायनपक्षे, ईशितारं, मावमंस्त, राजयक्ष्मा, सम्पादितफलः, कार्मुकेण।

# Discussion

'प्रज्ञोत्साहावतः स्वामी' इत्यत्रैव तावेव प्रभुशक्तेः मूलमित्युक्तं तदेव व्यनक्ति-

करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम् ।
प्रज्ञाबल बृहन्मूलः फलत्युत्साहपादपः ।।89।।

**अन्वयः** - उत्तुङ्गः प्रज्ञाबलबृहन्मूलः उत्साहपादपः करप्रचेयां प्रथीयसीं प्रभुशक्तिं फलति ॥

**व्याख्या** - उत्तुङ्गः = महोन्नतः, प्रज्ञाबलबृहन्मूलः= मन्त्रशक्तिप्रधान बीजः, उत्साहपादपः= उत्साहवृक्षः, पराक्रमवृक्षः। करप्रचेयां= बलिना वर्धनीयां, हस्तग्राह्याश्च। प्रथीयसीं= पृथुतरां। प्रभुशक्तिं= प्रभावविशेषम्। फलति= प्रसूत इति भावः। मन्त्रसहितेनोद्यमेन प्रभुशक्तिर्जन्यते इति वाक्यार्थः। रूपकालङ्कारः।

**समासः** - प्रज्ञायाः बलं प्रज्ञैव बलमिति वा प्रज्ञाबलम्। प्रज्ञाबलमेव बृहत् मूलं यस्याऽसौ प्रज्ञाबलबृहन्मूलः (ब व्री०), अन्यत्र - प्रज्ञाबलमिव बृहत् मूलं यस्य सः। उत्साहः पादपः इव उत्साहपादपः। अन्यत्र - अन्यत्र उत्साह इव पादपः उत्साहपादपः। करेण प्रचेया करप्रचेया तां करप्रचेयाम्। प्रभोः शक्तिः, ताम् प्रभुशक्तिम्। अतिशयेन पृथ्वी प्रथीयसी; तां प्रथीयसीम्।

मन्त्रसहितेनोद्यमेन प्रभुशक्तिर्जन्यते

**आशयः** - उत्साहरूपस्य वृक्षस्य मन्त्रशक्तिः प्रधानमूलं, प्रभुशक्तिश्च तस्य फलम्। मन्त्रपूर्वक एव उत्साहः फलति, तद्विरीतस्तु छिन्नमूलो वृक्ष इव शुष्यति। मन्त्रपूर्वक एवोत्साहः फलति, तद्विविपरीतस्तु छिन्नमूलो वृक्ष इव शुष्यतीति भावः।

विमृष्यकारिणस्तु विश्वमपि विधेयं स्यादिति त्रयेणाह -

**अनल्पत्वात्प्रधानत्वाद् वंशस्येवेतरे स्वराः ।**
**विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥90॥**

**अन्वयः** - अनल्पत्वात् प्रधानत्वात् वंशस्य इतरे स्वराः इव विजिगीषोः नृपतयः परिवारतां प्रयान्ति ॥

**व्याख्या** - अनल्पत्वात्= प्रज्ञोत्साहयोः अधिकत्वात्। स्वरपक्षे= उच्चैस्तरत्वात्, प्रधानत्वात्= मण्डलाभिज्ञत्वात्, स्वरपक्षे= नायकस्वरत्वात्, वंशस्य = वंशवाद्यस्वरस्य, इतरे स्वराः= वीणागानादिशब्दाः, इव= यथा, विजिगीषोः= विजेतुमिच्छोः, नृपतयः= राजानः, परिवारतां= पोष्यतां, प्रयान्ति = उपयान्ति, तत्कार्यमेव साधयन्तीत्यर्थः।

**समासः** - न अल्पः अनल्पः, तस्य भावः अनल्पत्वम्, तस्मात् अनल्पत्वात्। प्रधानस्य भावः प्रधानत्वम्, तस्मात् प्रधानत्वात्। विजेतुमिच्छुः विजिगीषुः, तस्य विजिगीषोः। नृणां पतयः नृपतयः। परितः व्रियन्ते एभिरिति परिवाराः, तेषां भावः परिवारता। तां परिवारताम्।

**अलङ्कारः**- वंशस्य इतरे स्वराः इव विजिगीषोः नृपतयः परिवारतां प्रयान्ति इत्यत्र स्वराधिभिः सः राज्ञः परिवारतां प्रतिपादनात् उपमालङ्कारः।

विजिगीषोः राजानः परिवारतां तत्कार्यमेव साधयन्ति

**आशयः** - यथा वाद्यविशेषस्य स्वराः वेणुस्वरानुसरणं सम्यगाचरन्तः गानं साङ्गं विदधति, तथैव अन्ये नृपतयः विमृश्यकारिणः विजिगीषोः आनुकूल्यं सम्पादयन्तोऽस्यैव कार्यं साधयिष्यन्ति ॥

**अप्यनारम्भमाणस्य विभोरुत्पादिताः परैः।**
**व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः ॥91॥**

**अन्वयः** - अनारम्भमाणस्य अपि विभोः परैः उत्पादिताः अर्थाः विहायसः शब्दाः इव गुणतां व्रजन्ति ॥

**व्याख्या** - अनारम्भमाणस्य अपि= किञ्चिदपि न कुर्वाणस्यापि, विभोः= प्रभोः, गगनपक्षे-व्यापकस्य। परैः= अन्यैः नृपतिभिः। गगनपक्षे - शङ्खभेर्वादिभिश्च। उत्पादिताः= सम्पादिताः जनिताश्च। अर्थाः= प्रयोजनानि। विहायसः= आकाशस्य, शब्दाः इव= ध्वनय इव। गुणतां= विशेषणताम्। व्रजन्ति= प्राप्नुवन्ति।

**समासः** - आरभते इत्यारभमाणः, न आरंभमाणः अनारंभमाणः, तस्य अनांरभमाणस्य (नञ् त० पु०)। गुणस्य भावः गुणता, ताम् गुणताम्।

**व्याकरणविशेषः**- अनारम्भमाणस्य- नञ्+आ+रभ+कर्तरि शानच्। उत्पादिताः- उत्+पद्+णिच्+कर्मणि क्तः।

**अलङ्कारः**- विभोः परैः गुणतो व्रजन्ति इत्यत्र विभोः अर्थैः सह विहायसः शब्दानां सादृश्यवर्णनात् उपमालङ्कारः।

परैः उत्पादिताः अर्थाः आकाशस्य शब्दाः इव गुणतो प्राप्नुवन्ति

**आशयः** - यथा 'शब्दः' सर्वदेशव्यापिणः आकाशस्य गुणः इति व्यवह्रियते परमाकाशः तदर्थं किमपि न विदधाति तथैव शक्तः राजा अपि स्वमहिम्नैव चरैः कार्यं सम्पादयन् सर्वार्थानपि स्वकीयतां नयति, स्वयञ्च उदासीन एव तिष्ठति, न किमपि करोति ।।

यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः।
एकार्थतन्तुप्रोतायां नायको नायकायते ।।92।।

**अन्वयः** - एकार्थतन्तुप्रोतायाम् यातव्यपार्ष्णि ग्राहादिमालायाम् अधिकवद्युतिः नायकः नायकायते ।।

**व्याख्या** - एकार्थतन्तुप्रोतायां= एकप्रयोजनरूपसूत्रे नद्धायां, यातव्यपार्ष्णिग्राहादिमालायां= शत्रुपृष्ठानुधाव्यादिद्वादशराजमण्डल रूपमालायां, अधिकद्युतिः= महातेजाः, नायकः= शक्तिसम्पन्नः विजिगीषुः, नायकायते = मध्यमणिरिव आचरतीत्यर्थः।

**समासः** - एकश्चासौ अर्थश्च एकार्थः, एकार्थ एव तन्तुः एकार्थतन्तुः। अन्यत्र - एकार्थं इव तन्तुः एकार्थतन्तुः, एकार्थतन्तौ प्रोता एकार्थतन्तुप्रोता, तस्याम् एकार्थतन्तुप्रोतायाम् (त०पु०)। यातव्यश्च पार्ष्णिग्राहश्च यातव्यपार्ष्णिग्राहौ (द्वन्द्वः), तौ आदौ येषां ते यातव्यपार्णिग्राहादयः (ब०व्री०), ते एव माला यातव्यपार्ष्णिग्राहादिमाला, तस्याम् यातव्यपार्ष्णि ग्राहादिमालायाम्। अधिकाद्युतिःर्यस्यासौ अधिकद्युतिः।

**व्याकरणविशेषः**- नायकायते- नायक +क्यङ्+लट्+त 'उपमानादाचारे' इति क्यङि, अकृतसार्वधातुकयोः' इति दीर्धः।

राजा स्वयमेव सर्वोत्कर्षेण वर्तते

**आशयः** - यथा मुक्ताहारमध्यस्थितो मणिरितरमणिभ्यः श्रेष्ठोऽधिकप्रकाशश्च सन् विशेषेण शोभते; तथैव एकाभीष्टाभिलाषके यातव्यादि नृपसमूहे सर्वभ्योऽधिकतेजा विजिगीषु राजा एव नायकः सन् शोभते।

अथ विमृश्यकरणप्रकारमाह-

षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायनम्।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥93॥

**अन्वयः** - शक्त्यपेक्षः (सन् ) षाड्गुण्यं रसायनम् उपयुञ्जीत, एवम् अस्य अङ्गानि स्थास्नूनि बलवन्ति च भवन्ति ॥

**व्याख्या** - शक्त्यपेक्षः= प्रभावोत्साहमन्त्ररूपां शक्तिं अपेक्षमाणः (सन्)। षाड्गुण्यं= सन्धिविग्रहादिगुणषट्कम्। रसायनपक्षे= षड्गुणबलिजारितम्। रसायनम्= पृथिवीप्रापकम्, शास्त्रोक्तमार्गम्। पक्षान्तरे – चन्द्रोदयादि जराव्याधिनाशकमौषधम्। उपयुज्जीत= सेवेत। एवं = यथा बलं षाड्गुण्यरूपरसायन प्रयोगे सति। अस्य= प्रयोक्तुः नृपस्य, पक्षान्तरे - बलाभिलाषिणः। अङ्गानि= स्वाम्यादीनि सप्ताङ्गानि। पक्षान्तरे - शरीरावयवाः। स्थास्नूनि= स्थिराणि, कालान्तरसहानीत्यर्थः। बलवन्ति= सामर्थ्यवन्ति, परपीडाक्षमाणीत्यर्थः। च भवन्ति = जायन्ते ।

**समासः** - शक्तिमपेक्षते इति शक्त्यपेक्षः (त० पु०)। षट् च ते गुणाः षड्गुणाः, षड्गुणा एव षाड्गुण्यम्। पक्षान्तरे-षड्गुणाः यस्मिन् तत् षड्गुणम्, तदेव षाड्गुण्यम् तत्। अय्यते - प्राप्यते, अनेनेति अयनम्, रसायाः= भुवः, अयनं= प्रापकम् इति रसायनम्। पक्षान्तरे - रसानां रसाक्तादिसप्तदेहधातूनाम्, अयनम्= प्रापकम्, रसायनम्। प्रशस्तं बलमस्त्येषां तानि बलवन्ति । स्थातुं शीलं येषां तानि स्थास्नूनि ।

राज्यस्य सप्त अङ्गानि स्थिराणि बलवन्ति च भवन्ति

**आशयः** - स्वस्य शत्रोश्च बलाबलं परिज्ञाय सन्ध्यादीन् गुणान् प्रयुञ्जीत एवं कृते सति राज्ञः स्वाम्यादि राज्याङ्गानि स्थिराणि सामर्थ्यवन्ति च भवन्ति। अयं बलभद्रः शत्रोः बलाबलं किमपि न जानाति अतएव विग्रहमाद्रियते ॥

राज्ञा प्रभाव-उत्साह-मन्त्रशक्तिभिः सार्धं स्वबलानुसारं षड्गुणानां सेवनम् अर्थात् पालनं विधातव्यम्, एतेषां पालनेन राज्यस्य सप्त अङ्गानि यथा स्वामी जनपदः अमात्यः कोशः दुर्गः सेना मित्रं च स्थिराणि बलवन्ति च भवन्ति ।

स्थाने शमवतां शक्त्या व्यायामे बुद्धिरङ्गिनाम् ।
अयथाबलमारम्भो निदानं क्षयसम्पदः ॥94॥

**अन्वयः** - स्थाने शमवताम् अङ्गिनां शक्त्या व्यायामे बुद्धिः अयथाबलम् आरम्भः क्षयसम्पदः निदानम् (भवति)॥

**व्याख्या** - स्थाने= शक्यविषये। शमवतां= क्षमाशीलानां। अङ्गिनां= स्वाम्यमात्यादिसप्ताङ्गानां राज्ञां, शरीरिणाञ्च। शक्त्या= प्रभावोत्साहमङ्गरूपशक्त्यनुसारेण, बलेन च। व्यायामे= व्यापारे, षाड्गुण्यप्रयोगे, गमनादौ च (सति)। वृद्धिः= उपचयः, राज्यस्य शरीरस्य चेत्यर्थः। अयथाबलं= स्वबलातिक्रमेण। आरम्भः= षाड्गुण्यप्रयोगः, गमनादिश्च। क्षयसम्पदः= विनाशरूपसम्पत्तेः। निदानं= आदिकारणम्। भवतीति शेषः।

**समासः** -रामोऽस्ति येषां ते शमवन्तः, तेषां शमवताम् (ब० व्री०)। अङ्गानि सन्ति येषां ते अङ्गिनः, तेषाम् अङ्गिनाम् (ब० व्री०)। बलमनतिक्रम्य यथाबलम्, न यथाबलम् अयथाबलम्। क्षयस्य सम्पत् क्षयसम्पत्, तस्याः क्षयसम्पदः। (त० पु०)।

राज्यस्य शरीरस्य चेति भावः

**आशयः** - सामर्थ्यरहिते राज्ञि क्षमा, ससामर्थ्ये तेजः इति हि अभ्युदयस्य मूलम् । एतदन्यथा नियतं विनाशः।

अवसरं दृष्ट्वा क्षमाशीलः राजा यदि स्वस्य प्रभाव-उत्साह-शक्त्या-अनुसारं षाड्गुण्यानां प्रयोगं करोति तर्हि तस्य राज्यं वर्धते तथा च यदि सः स्वस्य बलं न अवगत्य षाड्गुण्यानां प्रयोगं करोति तर्हि तस्य राज्यं क्षीणं भवति । यथा यथा व्यायामं कुर्वन् बलानुसारं व्यायामं करोति तथा तस्य बलं वर्धते तस्य शरीरं च बलवत् भवति, विपरीतस्थितौ तस्य बलस्य क्षयः भवति ।

फलितमाह-

> तदीशितारं चेदीनां भवांस्तमवमंस्त मा ।
> निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥95॥

**अन्वयः** - (तस्मात् ) तत् तं चेदीनाम् ईशितारं भवान् ( हे कृष्ण!) मा अवमंस्त, (यश्चैवं यथा) यः उदात्तः स्वरान् इव अरीन् एकपदे निहन्ति ।।

**व्याख्या** - तत्= तस्मात् कारणात्। तं पूर्वोक्तं । चेदीनां= चेदिदेशानां ईशितारं = प्रभु शिशुपालं। भवान्= त्वं। मावमंस्त= नावमन्यस्व। यः= चैद्यः। उदात्तः= उदात्तसंज्ञकः स्वरः। स्वरान्= अनुदात्तान्। इव= यथा। अरीन्= शत्रून्। एकपदे= एकस्मिन् एव पदविन्यासे सुप्तिङन्तलक्षणे च। निहन्ती= मारयति, नीचैः करोति च। उपमालङ्कारः ।

**समासः** - एकञ्च तत् पदञ्च एकपदम्, तस्मिन् एकपदे ।

शिशुपालः महान् योद्धा अस्ति

**आशयः** –अत एवातिबलमित्रघातिनं चेदिराजं प्रतिविग्रहे साग्रहो मा भूः। अत एव चेदिदेशस्य प्रभुं शिशुपालं साधारण मन्यमानं मा अवहेलयतु, सः महान् योद्धा अस्ति। सः एकस्मिन् आक्रमणे बहवः शत्रून् नाशयितुं शक्नोति।

**न चायमेकाको किं नः करिष्यतीति मन्तव्यमित्याह-**

**मा वेदि यदसावेको जेतव्यश्चेदिराडिति ।**
**राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥96॥**

**अन्वयः** - (हे कृष्ण !) असौ चेदिराट् एकः (अतो) जेतव्यः इति मा वेदि, यत् सः राजयक्ष्मा रोगाणाम् इव महीभृतां समूहः।।

**व्याख्या** - असौ= एषः। चेदिराट्= चेदीश्वरः शिशुपालः। एकः- एकाकी (अतः) जेतव्यः= सुजयः। इति= इत्थं। मा वेदि= मा ज्ञायि। यत्= यस्मात् कारणात् सः= शिशुपालः। राजयक्ष्मा= क्षयरोगः। रोगाणां= व्याधीनाम्। इव= यथा। महीभृतां= राज्ञां। समूहः= समष्टिरूपः वर्तते । उपमालंकारः।

**समासः** - चेदिषु राजते इति चेदिराट्, चेदीनां राडिति वा चेदिराट्। राज्ञः- चन्द्रस्य, यक्ष्मा राजयक्ष्मा, अथवा राजा च असौ यक्ष्मा चेति राजयक्ष्मा ( कर्मधारयः)।

शिशुपालः न एकाकी, क्षयरोगः रोगाणामिव

**आशयः** - शिशुपालः इदानीं एकाकी, अत एव अनायासेन वध्य इति न जानीहि। यथा राजयक्ष्मा सर्वेषां रोगाणाम् आधारभूतः तथैव अयमपि मित्रनाशेऽपि न एकाकी। बहवो हि राजानः तस्य सपक्षाः।।

**अथास्य सर्वराजसमष्टितामेव द्वाभ्यां व्याचष्टे-**

**सम्पादितफलस्तेन सपक्षः परभेदनः ।**
**कार्मुकेणेव गुणिना बाणः सन्धानमेष्यति ॥97॥**

**अन्वयः** - सम्पादितफलः सपक्षः परभेदनः बाण: गुणिना तेन कार्मुकेण इव सन्धानम् एष्यति ।।

**व्याख्या** – सम्पादितफलः= आसादितलाभः प्राप्तबाणाग्रश्च। संपक्षः= ससुहृत्, कङ्कादिपत्रयुतश्च। परभेदनः= परेषां भेदकः। बाणः= बाणासुरः, शरश्च। गुणिना= शौर्यादिगुणवता, अधिज्येन च। तेन= शिशुपालेन। कार्मुकेण= धनुषा। इव= सदृश। सन्धानं= सन्धिं। एष्यति= प्राप्स्यति ।। उपमालङ्कारः।

**समासः** - सम्पादितं फलं यस्य सः सम्पादितफलः (ब० व्री०) । पक्षेण सह वर्तमानः सपक्षः। भिदन्तीति भेदनः, परेषां भेदनः परभेदनः (त० पु०) गुणोऽस्यास्तीति गुणी, तेन गुणिना। कर्मणे प्रभवतीति कार्मुकम् तेन कार्मुकेण।

बाणासुरः शिशुपालेन सह सङ्गस्यते

**आशयः** -प्रथमं तावदस्माकं शत्रुः बाणासुरः स इदानीम् अवश्यं तेन सह सङ्गस्यते ।।

**ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः।**
**तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥98॥**

**अन्वयः** – ये च अन्ये कालयवनशाल्वरुक्मिद्रुमादयः तमः स्वभावाः ते अपि प्रदोषम् एनम् अनुयायिनः (पश्चादागमिष्यन्ति )

**व्याख्या** - ये चान्ये= इतरे। कालयवनशाल्वरुक्मिद्रमादयः= कालयवनादिनामकाः प्रसिद्धाः राजानः। तमः स्वभावाः= तमोगुणात्मकाः (वर्तन्ते)। ते अपि= सर्वेऽपि ते। प्रदोषं - प्रकृष्टदोषं, तामसमेवेत्यर्थः। एनं = शिशुपालं। अनुयायिनः= अनुगामिनः भविष्यन्ति। सदृशाः सदृशैर्युज्यन्त एवेति भावः। अत्र वस्तुना, यथा तमो रजनीमुखमनुगच्छति तथा कालयवनादयोऽपि राजानम् एनं शिशुपालं अनुस्यन्तीति उपमालङ्कारो व्यज्यते।

**समासः** - कालयवनश्च शाल्वश्च रुक्मी च द्रुमश्चेति कालयवन रुक्मि द्रुमाः, ते आदिर्येषान्ते कालयवनशाल्वरुक्मिद्रुमादयः (द्वन्दगर्भ ब० व्री०)। प्रकृष्टो दोषः यस्य यत्र वा स प्रदोषः, तं प्रदोषम्। अनुयास्यन्तीति अनुयायिनः ।

**व्याकरणविशेषः-** अनुयायिनः- अनु+या+ 'भविष्यति गम्यादयः' इति भविष्यदर्थे णिनिः। एनम्- 'अकेनोर्भविष्यदाधर्मण्ययोः' इति षष्ठी निषेधात् द्वितीया।

कालयवनादयोऽपि राजानः दुष्टाः वर्तन्ते

**आशयः** - कालयवनादयो राजानः अपि दुष्टाः वर्तन्ते; अतः ते अपि सदोषमेनं समधर्मतया नियतमनुयास्यन्ति ।।

## Summarised Overview

मन्त्रसहितेन उद्यमेन प्रभुशक्तिः जन्यते। विजिगीषोः राजानः परिवारतां तत्कार्यमेव साधयन्ति। शक्तः राजा अपि स्वमहिम्नैव चरैः कार्यं सम्पादयन् सर्वार्थानपि स्वकीयतां नयति स्वयञ्च उदासीन एव तिष्ठति, न किमपि करोति। उत्साहरूपस्य वृक्षस्य मन्त्रशक्तिः प्रधानमूलं, प्रभुशक्तिश्च तस्य फलम्। नृपसमूहे सर्वभ्योऽधिकतेजा जिगीषु राजा एव नायकः सन् शोभते। राज्ञा प्रभाव-उत्साह-मन्त्रशक्तिभिः सार्धं स्वबलानुसारं षड्गुणानां सेवनम् अर्थात् पालनं विधातव्यम्। एतेषां पालनेन राज्यस्य सप्त अङ्गानि यथा स्वामी, जनपदः, अमात्यः, कोशः, दुर्गः, सेना, मित्रं च स्थिराणि बलवन्ति च भवन्ति। सामर्थ्यरहिते राज्ञि क्षमा, ससामर्थ्ये तेजः इति हि अभ्युदयस्य मूलम्। एतदन्यथा नियतं विनाशः। अनन्तरं शिशुपालस्य विषये कथयति - चेदिदेशस्य प्रभुं शिशुपालं साधारण मन्यमानं मा अवहेलयतु, सः महान् योद्धा अस्ति। सः एकस्मिन् आक्रमणे बहवः शत्रून् नाशयितुं शक्नोति। शिशुपालः इदानीम् एकाकी, अत एव अनायासेन वध्य इति न जानीहि। यथा राजयक्ष्मा सर्वेषां रोगाणाम् आधारभूतः तथैव अयमपि मित्रनाशेऽपि न एकाकी। बहवो हि राजानः तस्य सपक्षाः। अस्माकं शत्रुः बाणासुरः इदानीमवश्यं तेन सह सङ्गस्यते। यथा तमो रजनीमुखमनुगच्छति तथा कालयवनादयोऽपि राजानमेनं शिशुपालमनुस्यन्तीति। कालयवनादयो राजानः अपि दुष्टा वर्तन्ते।

# Assignments

### श्लोकं व्याख्यात

1. षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायनम् ।
   भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥93॥

### अलङ्कारं विशदयत

1. अनल्पत्वात्प्रधानत्वाद् वंशस्येवेतरे स्वराः ।
   विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥90॥
2. अप्यनारम्भमाणस्य विभोरुत्पादिताः परैः।
   वज्रन्ति गुणतामर्थाः शब्दा इव विहायसः ॥91॥
3. ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः।
   तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः॥98॥

### व्याकरणविशेषं लिखत

1. उत्पादिताः

2. अनारम्भमाणस्य

3. नायकायते

4. अनुयायिनः

5. एनम्

उत्तरं लिखत

1. उत्साहरूपस्य वृक्षस्य मूलं किम्? फलं किम्?

2. राज्यस्य अङ्गानि कति? तानि कानि?

3. षाड्गुण्यं कस्मिन् अवसरे प्रयुज्यते?

4. शिशुपालः कीदृशः राजा?

कीदृशाः राजानः दुष्टाः वर्तन्ते ?

# Suggested Readings

1. The Sisupalavadha of Magha with The Commentary(Sarvankasha) of Mallinatha, Edited by Pandit Durgaprasad and Pandit Sivadatta, Fourth Edition, Nirnaya sagara press, Bombay, 1905
2. आचार्यः श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वारणासी, 1985

# References

1. डो. शारदा चतुर्वेदी, शिशुपालवधमहाकाव्यम्, द्वितीयसर्गः, आशुबोधिनी संस्कृत-हिन्दीव्याख्यातोपेतम्, चौखम्बा कृष्णदास अकादमी, वारणासी, 2000
2. डा. गणेशदत्तशास्त्रिशुक्लः, शिशुपालवधमहाकाव्यम्, संसकृत-हिन्दी व्याख्योपेतम्, शारदा संस्कृत संस्थन जगतगंज, वारणसी
3. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
4. Sisupalavadha of Magha, Ed.by Pandit Durga Prasad & Pandit Sivadatta, Tukaram Javaji, Nirnayasagar Press, Bombay 1905
5. Makhabatta's Shishupalavadha with the commentary (sandeha-vishaushadhi) of Vallabhadeva, Edited by Ram Chandra Kak and Harabhatta Shastri, Srinagar, Kashmir, 1935

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# द्वितीयसर्गे 99-108 श्लोकाः

## Learning Outcomes

- महाकाव्यविषये परिचयं लभेयुः।
- काव्यानां व्याकरणविशेषज्ञानम्।
- महाकाव्येतिवृत्तपरिचयः।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः।

## Background

उत्साहरूपस्य वृक्षस्य मन्त्रशक्तिः प्रधानमूलं, प्रभुशक्तिश्च तस्य फलम्। राज्यस्य सप्त अङ्गानि सन्ति, तानि स्वामी जनपदः अमात्यः कोशः दुर्गः सेना मित्रं स्थिराणि च बलवन्ति च। अवसरं दृष्ट्वा क्षमाशीलः राजा यदि स्वस्य प्रभाव-उत्साह-शक्त्यनुसारं षाड्गुण्यानानां प्रयोगं करोति तर्हि तस्य राज्यं वर्धते तथा च यदि सः स्वस्य बलं न अवगत्य षाड्गुण्यानां प्रयोगं करोति तर्हि तस्य राज्यं क्षीणं भवति । अनन्तरं शिशुपालविषयमधिकृत्य कथयति। चेदिदेशस्य प्रभुः शिशुपालं साधारण मन्यमानं मा अवहेलयतु, सः महान् योद्धा अस्ति। कालयवनादयो राजानः अपि दुष्टाः वर्तन्ते।

## Keywords

उपजापः, आकोपवतः, क्षोदीयानपि, नगापगा, अभियुक्तं, मखविघ्नाय, अजातारेः, अतिभरक्षमस्कन्धं, अध्वरधुराम्, सिद्धये, छन्दानुवृत्तिदुःसाध्याः, नाकिनां, शत्रुवधः, पुरोडाशभुजां, मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना, पितृस्वस्रे, प्रतिज्ञातम्।

# Discussion

ननु बाणादयोऽस्माभिः कृतसन्धाना इदानीं न विराध्यन्तीत्यत आह-

उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।
आशुदीपयिताल्पोऽपि साग्नीनेधानिवानलः ॥99॥

**अन्वयः** - (हे कृष्ण!) तेन कृतः अल्पः अपि उपजापः त्वयि आकोपवतः तान् अनिलः साग्नीन् एधान् इव आशु दीपयिता ।।

**व्याख्या** - तेन = शिशुपालेन। कृतः= विहितः। अल्पः= साधारणः। अपि, उपजापः= भेदः। त्वयि= भवति। आकोपवतः= सक्रोधान्। तान्= पूर्वोक्तान् शत्रुभूतान् बाणादीन् भूपतीन्। अनिलः= वायुः। साग्नीन्= अग्निसहितान्। एधान्= इन्धनानि। इव, आशु= शीघ्रं। दीपयिता= प्रज्वलयिष्यति। उपमालङ्कारः।

**समासः** - आ समन्तात् कोपः, आकोपः अस्ति एषां ते आकोपवन्तः, तान आकोपवतः। अग्निना सह वर्तमानाः साग्नयः तान् साग्नीन्। इन्ध्यन्ते अग्नयो यैस्ते एधाः, तान् एधान्।

क्रुद्धास्ते बाणादयः स्वल्पेनैव उपजापेन अस्मत्सन्धानं भेत्स्यन्ति

**आशयः** - यथा वायुः अग्निसहितानि काष्ठानि झटिति भस्मसात्करोति तथैव त्वयि प्रथमत एव क्रुद्धास्ते बाणादयः स्वल्पेनैव उपजापेन अस्मत्सन्धानं भेत्स्यन्ति ।

ततः किमत आह-

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥100॥

**अन्वयः** - (हे कृष्ण!) बृहत्सहायः क्षोदीयान् अपि कार्यान्तं गच्छति, (यतः) नगापगा महानद्या सम्भूय अम्भोधिम् अभ्येति ।।

**व्याख्या** - बृहत्सहायः= महासहायवान्। क्षोदीयानपि= लघुतरोऽपि, क्षुद्रतरोऽपि। कार्यान्तं= कार्यपारम्। गच्छति= प्राप्नोति। नगापगा= गिरिनदी। महानद्या= गङ्गादिकया। सम्भूय= मिलित्वा। अम्भोधिं= सागरम्। अभ्येति= प्राप्नोति। अन्ये मिलित्वा यदि क्षुद्रस्यापि तादृशी शक्तिर्भवति तर्हि बलवतः चैद्यस्य शक्तिविषये किमु वक्तव्यः।

**समासः** - सह एति अयते वेति सहायः, बृहत् सहायो यस्य सः बृहत्सहायः (ब० व्री०)। कार्यस्यान्तः कार्यान्तः तं कार्यान्तम् त० पु०)। अतिशयेन क्षुद्रः क्षोदीयान् । अपां समूहः आपम्, आपेन सह गच्छतीति आपगा नगस्य आपगा नगापगा (त० पु०)। अम्भासि धीयन्ते अस्मिन् इति अम्भोधिः, तम् अम्बोधिम् । महती चाऽसौ नदी महानदी तया महानद्या।

**व्याकरणविशेषः**- सम्भूय- सम्+भू+क्त्वा+ल्यप्।

**अलङ्कारः**- बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति इत्यत्र विशेषेण सामान्यसमर्थनात् अर्थान्तरन्यासालङ्कारः।

क्षुद्रः अपि ससहायः सन् निजं कार्यं साधयति

**आशयः** - यदा क्षुद्रः अपि ससहायः सन् निजं कार्यं साधयति तदा महावीरः शिशुपालः बृहत्सहायो भूत्वा सिद्धिं न एष्यतीति कथमुच्यते ॥

**किञ्च न केवलं शात्रोः असाध्यत्वं मित्रविरोधश्चाधिकोऽनर्थकर इत्याह-**

**तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।**
**अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ॥101॥**

**अन्वयः** - ( हे कृष्ण !) ये च तस्य मित्राणि ये च ते तव अमित्राः नृपाः ते उभये त्वया अभियुक्तम् एनम् ( चैद्यं ) गन्तारः (गमिष्यन्ति ) अतः परे त्वाम् (गन्तारः अनुयास्यन्ति) ।।

**व्याख्या** - ये च= यावन्तः। तस्य= शिशुपालस्य। मित्राणि नृपाः= सुहृदो राजानः। ये च= यावन्तश्च। ते= तव। अमित्राः नृपाः= शत्रुभूता राजानः त्वया= भवता। अभियुक्तं= अभियातं। एन= चैद्यम्, शिशुपालम्। गन्तारः = अनुगमिष्यन्ति। अतः= एभ्यः। परे= भिन्नाः, उक्तप्रकारद्वयराजभ्योऽतिरिक्ताः (राजानः)। त्वां= भवन्तं। गन्तारः= अनुयातारः।

**समासः** - न मित्राणि अमित्राः। नृन् पान्तीति नृपाः।

**व्याकरणविशेषः**- नृपाः- नृ+पा+ 'अतोऽनुपसर्गेकः' इति कप्रत्ययः।

तव शत्रवः ते उभयेऽपि शिशुपालमेव अनुगमिष्यन्ति

**आशयः** - संग्रामे प्रवर्तमाने सति ये खलु चैद्यस्य सुहृदः एवं तव शत्रवः; ते उभयेऽपि शिशुपालमेव अनुगमिष्यन्ति। अवशिष्टास्तु पुनः परिमिता एव स्वामनुगन्तारः ॥

ततः किमत आह-

मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् ।
हन्त ! जातमजातारेः प्रथमेन त्वयारिणा ॥102॥

**अन्वयः** - इत्थं मखविघ्नाय सकलं राजकम् उत्थाप्य, हन्त! (हे कृष्ण!) अजातारेः त्वया प्रथमेन अरिणा जातम् ॥

**व्याख्या** - इत्थं= अनेन प्रकारेण। मखविघ्नाय= यज्ञविघाताय। सकलं= निखिलं। राजकं= राजसमूहम्। उत्थाप्य= क्षोभयित्वा। हन्त= इति खेदसूचकम्। अजातारेः= अजातशत्रोः युधिष्ठिरस्य। त्वया= भवता। प्रथमेन= आद्येन, प्रथमोपस्थितेन। अरिणा= शत्रुणा। जातम्= अजनि।

**समासः** -मखस्य विघ्नः मखविघ्नः, तस्मै मखविघ्नाय। राज्ञां समूहो राजकम्, तत्। न जातः अरिः यस्य सः अजातारिः, तस्य अजातारेः॥

त्वमेव अजातशत्रोः प्रथमः शत्रुः जातः

**आशयः** - संग्रामाय समुत्सुकाः राजानः यौधिष्ठिरे यागे कथमपि न गमिष्यन्ति। इत्थं यागविघ्नं समुत्पाद्य त्वमेव अजातशत्रोः प्रथमः शत्रुः जातः।

अस्तु सोऽपि शत्रुः को दोषस्तत्राह-

संभाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां धर्मराजो विवक्षते ॥103॥

**अन्वयः** - (हे कृष्ण !) बान्धवः स धर्मराजः अतिभरक्षमस्कन्धं त्वां सहायं सम्भाव्य अध्वरधुरां विवक्षते ॥

**व्याख्या** – बान्धवः= बन्धुः। सः - लोकविदितः। धर्मराजः= युधिष्ठिरः। अतिभरक्षमस्कन्धं= अतिभारवहनसमर्थस्कन्धं। त्वां= भवन्तं। सहायं=

सहायकं। सम्भाव्य= अभिसन्धाय। अध्वरधुराम्= यागभारं। विवक्षते= वोढुमिच्छति।

**समासः** - अतिशयितो भरः अतिभरः तस्य क्षमः स्कन्धो यस्य सः, तम् अतिभरक्षमस्कन्धम्। अध्वानं = स्वर्मार्गं, राति = ददाति, इति अध्वरः, अध्वरस्य धुः अध्वरधुरा, ताम् अध्वरधुराम् (त० पु०)। वोढुमिच्छति विवक्षते।

विरोधे सति विश्वासघातः बन्धुद्रोहश्च भविष्यति

**आशयः** - धर्मराजो युधिष्ठिरः त्वामेव सहायमुपकल्प्य अतिभारवतीं यागधुराम् उद्वोढुमिच्छति, अन्यथा विरोधे सति विश्वासघातः बन्धुद्रोहश्च भविष्यति ।

**महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।**
**सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥104॥**

**अन्वयः** - महात्मानः (पुरुषाः) भजमानान् रिपून् अपि अनुगृह्णन्ति, (यथा) सिन्धवः सपत्नीः नगनिम्नगाः अब्धिं प्रापयन्ति ।।

**व्याख्या** - महात्मानः= निग्रहानुग्रहसमर्थाः। भजमानान्= शरणमधिगतान्। रिपून्= शत्रूनपि। अनुगृह्णन्ति= दयन्ते। किमुत बन्धूनिति भावः। अत्र अर्थान्तरं न्यस्यति। सिन्धवः= महानद्यः। सपत्नीः= एकभर्तृकाः। नगनिम्नगाः= गिरिनिर्झरिणीः। अब्धिं= समुद्रं। प्रापयन्ति= उपस्थापयन्ति। स्वसौभाग्यं ताभ्यः प्रयच्छन्तीत्यर्थः।

**समासः** - महान् आत्मा येषां ते महात्मानः। निम्नं गच्छन्ति इति निम्नगाः, नगानां निम्नगाः नगनिम्नगाः, ताः नगनिम्नगाः (ष० त०)। समानः पतिर्यासां ताः सपत्न्यः, ताः सपत्नीः।

**व्याकरणविशेषः**- अब्धिं- अप्+धा+'कर्मण्यधिकरणे च' इत्यधिकरणे किं प्रत्ययः। सपत्नी- समानः पर्तियासां ताः, समानस्य सादेशः 'नित्य सपत्न्यादिषु' इति ङीप् नकारश्च।

महाजनाः आश्रयमागतानां शत्रून् अपि अनुग्रहं कुर्वन्ति

**अलङ्कारः**- अत्र सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः इति विशेषेण महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि इति सामान्य समर्थनात् अर्थान्तरन्यासोऽलङ्कारः।

**आशयः** - शत्रुरपि यदि याचते तदा महाधनः तमनुगृह्णात्येव। महानद्यः सपत्नीरपि गिरिनिर्झरिण्यः समुद्रं प्रापयन्त्येव। अतो यौधिष्ठिरं यागमेव जुषस्व।

तर्हि सम्प्रत्युपेक्षायामपि पश्चात्प्रार्थनया पार्थमार्जवयेयमित्यत आह-

चिरादपि बलात्कारो बलिनः सिद्ध्येऽरिषु ।
छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः ॥105॥

**अन्वयः** - (हे कृष्ण!) बलिनः अरिषु बलात्कारः चिरात् अपि सिद्ध्ये (भवति, किन्तु) विमनीकृताः सुहृदः छन्दानुवृत्तिदुःसाध्याः ॥

**व्याख्या** - बलिनः= बलवतः अपि। अरिषु= शत्रुषु विषये। बलात्कारः = दण्डः। चिरादपि= चिरकालेनापि। सिद्ध्ये= स्वकार्यसाफल्याय भवति। विमनीकृताः= वैमनस्यं प्रापिताः। सुहृदः= मित्राणि। छन्दानुवृत्तिदुःसाध्याः = छन्दानुरोधे अपि न सुसाध्याः।

शत्रुर्दण्डेनापि वशो भवति, मित्रं वैमनस्येन साम्नापीति

**समासः** - बलात्करणमिति बलात्कारः। दुःखेनापि साधयितुमशक्याः इति दुःसाध्याः, छन्दस्यानुवृत्तिः, तया छन्दानुवृत्त्या दुःसाध्याः छन्दानुवृत्तिदुःसाध्याः। विषण्णं मनः येषां ते विमनसः, न विमनसः अविमनसः, अविमनसः विमनसः सम्पद्यमानाः कृताः इति विमनीकृताः। शोभनं हृदयं येषां ते सुहृदः।

**आशयः** – शूरस्य शत्रवः शनैः दण्डेनापि जेतव्याः। रुष्टाः सुहृदः प्रसादयितुमशक्याः।

ननु सुहृत्कार्यात्सुरकार्ये बलीय इत्याह-

मन्यसेऽरिवधः श्रेयान्प्रीतये नाकिनामिति ।
पुरोडाशभुजा मिष्टमिष्टं कर्तुमलन्तराम् ॥106॥

**अन्वयः** - (हे कृष्ण !) नाकिनां प्रीतये अरिवधः श्रेयान् इति मन्यसे चेत्, पुरोडाशभुजाम् इष्टं कर्तुम् इष्टम् अलन्तराम् ॥

**व्याख्या** - नाकिनां= देवानां। प्रीतये= प्रसादाय। अरिवधः= शत्रुवधः। श्रेयान्= प्रशस्ततरः। इति= इत्थं। मन्यसे= स्वीकरोषि। चेत्= यदि। पुरोडाशभुजां= हविर्भोजिनां। इष्ट= मनोभिलषितं। कर्तुं= विधातुं। इष्टं= इष्टिः। अलन्तराम्= पर्याप्तम् ।

शत्रुवधादति प्रियकरो याग एव

**समासः** - अरेः वधः अरिवध: (ष० त०) न कम् (सुखम् ) अकम् ( दुःखम् ); न विद्यमानम् अकं यस्मिन् सः नाकः, सः येषामस्ति वासत्वेन ते नाकिनः तेषां नाकिनाम्। पुरोडाशान् भुञ्जते इति पुरोडाशभुजः, तेषां पुरोभडासभुजाम् (त० पु०)।

**आशयः** - शत्रुभूतस्य शिशुपालस्य आशुवधः देवानां प्रीतिमाधास्यति, इति सत्यं, परं सुसम्पन्नः यागस्तेषां ततोऽप्यधिकां प्रीतिम् उत्पादयिष्यति।

**तथाप्यमृताशिनां तेषां देवानां किमेभिः पिष्टभक्षणप्रलोभनैरत आह-**

**अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ।**
**शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ।।107।।**

**अन्वयः** - अमृतं नाम सन्तः मन्त्रजिह्वेषु यत् जुह्वति (तत्)। मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना( तस्य) शोभा एव ।।

**व्याख्या** - अमृतं नाम= पीयूषं हि। सन्तः= विद्वांसः। मन्त्रजिह्वेषु अग्निषु। यत्= पुरोडाशादिकं। जुह्वति= हवनादिना तं तर्पयन्ति। तदेव= पुरोडाशादिकमेव। मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना = मन्दराचलरूपमन्थनदण्डमथितसागरस्य वर्णना। शोभैव= अलङ्कार एव। वाक्यार्थयोर्हेतुहेतुमद्भावाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः।

यज्ञियं हविरेव अमृतम्

**समासः** - मन्त्रा एव जिह्वा येषां ते मन्त्रजिह्वाः, तेषु मन्त्रजिह्वेषु (ब० व्री०) । मन्दर एव क्षुब्धः, मन्दरक्षुब्धः, तेन क्षुभितश्चाऽसौ अम्भोधिश्च मन्दरक्षुब्धक्षुभिताम्बोधिः, तस्य वर्णना मन्दरक्षुब्धक्षुभिताम्बोधिवर्णना (त० पु०)।

**आशयः** - यज्ञियं हविरेव अमृतम्, अब्धिमन्थनाद्यदुदपद्यत तत्तु कविरचनाचातुरीमात्रम् ।।

**यात्रायाः प्रतिबन्धः कश्चिद्दुस्तरस्तवास्तीत्याह-**

**सहिष्ये शतमागांसि सूनोस्ते इति यत्त्वया।**
**प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृस्वस्रे प्रतिश्रुतम् ॥108॥**

**अन्वयः** - प्रतीक्ष्यायै पितृस्वस्रे "ते सूनोः शतमागांसि सहिष्ये" इति यत् त्वया प्रतिश्रुतम् तत् प्रतीक्ष्यम्॥

**व्याख्या** - प्रतीक्ष्यायै= पूज्यायै। पितृस्वस्रे= पितृभगिन्यै। ते= तव। सूनोः = सुतस्य, शिशुपालस्य। शतं= शतसंख्यकान्। आगांसि= अपराधान्। सहिष्ये= सोढाहे। इति= इत्थंभूतं। यत्= यद्धि। त्वया= भवता। प्रतिश्रुतं= प्रतिज्ञातं। तत्= तदपि। प्रतीक्ष्यं= पालनीयम्। अन्यथा प्रतिज्ञाभङ्गरूपो महादोषः स्यादिति भावः।

**समासः** - प्रतीक्ष्यते या सा प्रतीक्ष्या, तस्यै प्रतीक्ष्यायै। पितुः स्वसा पितृस्वसा, तस्यै पितस्वस्रे ।

प्रतिज्ञाभङ्गः महादोषः स्यात्

**आशयः** - भवता पूर्वं पितृभगिन्याः निकटे "अहं तव सुतस्य अपराधशतं सहिष्ये" इति प्रतिज्ञातमासीत्। अतस्तद्विपरीताचरणेन ते प्रतिज्ञाभङ्गो भविता। तद्विरम महानर्थमूलाद् अस्मात् प्रतिज्ञाभङ्गरूपात् कलङ्कपङ्कात् ।।

## Summarised Overview

शिशुपालमधिकृत्य एवं कथयति - यथा वायुः अग्निसहितानि काष्ठानि झटिति भस्मसात्करोति तथैव त्वयि प्रथमत एव क्रुद्धास्ते बाणादयः स्वल्पेनैव उपजापेन अस्मत्सन्धानं भेत्स्यन्ति। यथा क्षुद्रः अपि ससहायः सन् निजं कार्यं साधयति; तथा महावीरः शिशुपालः बृहत्सहायो भूत्वा सिद्धिं न एष्यतीति। संग्रामे प्रवर्तमाने सति ये खलु चैद्यस्य सुहृदः; एवं तव शत्रवः; ते उभयेऽपि शिशुपालमेव अनुगमिष्यन्ति। अवशिष्टास्तु पुनः परिमिता एव स्त्वामनुगन्तारः। संग्रामाय समुत्सुकाः राजानः यौधिष्ठिरे यागे कथमपि न गमिष्यन्ति। इत्थं यागविघ्नं समुत्पाद्य त्वमेव अजातशत्रोः प्रथमः शत्रुः जातः। शत्रुरपि यदि याचते तदा महाधनः तमनुगृह्णात्येव। महानद्यः सपत्नीरपि गिरिनिर्झरिण्यः समुद्रं प्रापयन्त्येव। अतो यौधिष्ठिरं यागमेव जुषस्व। शूरस्य शत्रवस्त्वानायासेन जेतव्याः। रुष्टाः सुहृदः प्रसादयितुमशक्याः। शनैः शत्रुर्दण्डेनापि वशो भवति, मित्रं वैमनस्येनैव वशीकर्तुं शक्यते। शत्रुभूतस्य शिशुपालस्य आशुवधः देवानां प्रीतिमाधास्यति, इति सत्यम्। परं सुसम्पन्नः यागस्तेषां ततोऽप्यधिकां प्रीतिम् उत्पादयिष्यति। शत्रुवधादतिप्रियकरो याग एव। यज्ञियं हविरेव अमृतं, अब्धिमन्थनाद्यदुदपद्यत तत्तु कविरचनाचातुरीमात्रम्। अन्यथा प्रतिज्ञाभङ्गरूपो महादोषः स्यात्। भवता पूर्वं पितृभगिन्याः निकटे "अहं तव सुतस्य अपराधशतं सहिष्ये" इति प्रतिज्ञातमासीत् अतस्तद्विपरीताचरणेन ते प्रतिज्ञाभङ्गो भविता। तद्विरम महानर्थमूलाद् अस्मात् प्रतिज्ञाभङ्गरूपात् कलङ्कपङ्कात्।।

# Assignments

### श्लोकं व्याख्यात

1. महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।
   सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥104॥

### अलङ्कारं लिखत

1. बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
   सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥100॥

2. महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।
   सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥104॥

### व्याकरणविशेषं लिखत

1. सम्भूय
2. नृपाः
3. अब्धिम्
4. सपत्नीः

### उत्तरं लिखत

1. तान् आशु दीपयता कान्? कथामिव?
2. शिशुपालं के अनुगमिष्यन्ति?
3. के रिपून् अपि अनुगृह्णन्ति?
4. इष्टं कर्तुमलन्तरम्। स्पष्टयत।
5. प्रतिश्रुतं तत् प्रतीक्ष्यम्। केन कुतः?
6. पितृभगिन्याः निकटे कृष्णस्य प्रतिज्ञा का आसीत् ?

आशयं विशदयत ।

1. अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ।

## Suggested Readings


1. Edited by Pandit Durgaprasad and Pandit Sivadatta, The Sisupalavadha of Magha with The Commentary(Sarvankasha) of Mallinatha, , Fourth Edition, Nirnaya sagara press, Bombay, 1905
2. आचार्यः श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वारणासी, 1985


## References


1. डो. शारदा चतुर्वेदी, शिशुपालवधमहाकाव्यम्, द्वितीयसर्गः, आशुबोधिनी संस्कृत-हिन्दीव्याख्यातोपेतम्, चौखम्बा कृष्णदास अकादमी, वारणासी, 2000
2. डा. गणेशदत्तशास्त्रिशुक्लः, शिशुपालवधमहाकाव्यम्, संसकृत-हिन्दी व्याख्योपेतम्, शारदा संस्कृत संस्थन जगतगंज, वारणसी
3. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
4. Pandit Durga Prasad & Pandit Sivadatta (Ed.) Sisupalavadha of Magha, Tukaram Javaji, Nirnayasagar Press, Bombay 1905
5. Ram Chandra Kak and Harabhatta Shastri (Edited),Makhabatta's Shishupalavadha with the commentary (sandeha-vishaushadhi) of Vallabhadeva, Srinagar, Kashmir, 1935


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are

developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# द्वितीयसर्गे 109 -118 श्लोकाः

## Learning Outcomes

- महाकाव्यविषये परिचयं लभेयुः।
- काव्यानां व्याकरणविशेषज्ञानम्।
- महाकाव्येतिवृत्तपरिचयः।
- श्लोकपरिचयः।
- श्लोकव्याख्याननैपुण्यम्।
- महाकाव्यव्याख्यानपरम्परापरिचयः

## Background

क्रुद्धास्ते बाणादयः स्वल्पेनैव उपजापेन अस्मत्सन्धानं भेत्स्यन्ति। शिशुपालस्य सुहृदः राजानः श्रीकृष्णस्य शत्रवः अपि शिशुपालम् अनुगमिष्यन्ति। विश्वासघातः बन्धुद्रोहश्च भविष्यति। शत्रुभूतस्य शिशुपालस्य आशुवधः देवानां प्रीतिमाधास्यति। प्रतिज्ञाभङ्गमहान् कलङ्कः एव। पितृभगिन्यै कृष्णस्य प्रतिज्ञा।

## Keywords

अरुन्तुदा, सोष्म, प्रणिधियः, विद्विषदम्भसः, अपस्पशा, शब्दविद्या, उभयवेतनै, उद्दृष्य, उपायज्ञैः, तरलाः, वैरायितारः, सहसंवृद्धियुजोऽपि, बलिपुष्टकुलाद्, सहजचापलदोषसमुद्धतः, असुहृद्गणः, अनुगतनयमार्गा, विशकलितार्थाम्, अर्गलाम्।

# Discussion

सत्यमस्ति प्रतिश्रुतं, किंत्वस्योन्मत्तत्वादौद्धत्यादपि जिहासितमत आह-

तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत् ।
नोपतापि मनः सोष्म वागेका वाग्मिनः सतः ।।109।।

**अन्वयः** - सतः बुद्धिः तीक्ष्णा (स्यादिति विद्धि। तथापि) अरुन्तुदा न (स्यात्) कर्म प्रतापवत् (भवेत् तथापि) शान्तं (स्यात्)) मनः सोष्म (तथापि) उपतापि न। वाग्मिनः वाग् एका।।

**व्याख्या** - सतः= सत्पुरुषस्य। बुद्धिः= धीः। तीक्ष्णा= निशिता। (स्यादिति विद्धि)। (तथापि) अरुन्तुदा= मर्मच्छेदिनी। न= नैव सतः। कर्म= व्यापारः। प्रतापवत्= तेजस्वि ( भवेत् तथापि ) शान्तं= अक्षोभकरं (स्यात्) मनः - चित्तम्। सोष्म= अभिमानोष्णम् स्यात् (तथापि) उपतापि= अग्न्यादिवत् परसन्तापि। न= नैव भवेत्। वाग्मिनः= वक्तुः। वाक्= वाणी। एका= एकरूपा। स्यादिति शेषः। वाग्मी सत्यमेव वदेदित्यर्थः।

**समासः** – अरुं स्तुदतीति अरुन्तुदा। उष्मणा सहितं सोष्म। उपतापयतीति उपतापि। प्रतपति अनेनेति प्रतापः, सोऽस्ति यस्मिन् तत् प्रतापवत् ।

**अलङ्कारः**- अत्र प्रकृतायाः वाचोऽप्रकृतानां बुद्धिकर्ममनसां च तुल्यधर्मादौपम्यावगतेर्दीपकालङ्कारः।

शिशुपालसम्बन्धे यत्त्वया प्रतिज्ञातं तदेव प्रतिपालय

**आशयः** - साधूनां व्याहृतं सत्यं, अतः शिशुपालसम्बन्धे यत्त्वया प्रतिज्ञातं तदेव प्रतिपालय, मनसः उपतापित्वं, बुद्धेररुन्तुदत्वं, कर्मणश्च भयंकरत्वं प्रशमय।

अशक्यश्च काले चैद्यवध इत्याह-

स्वयङ्कृतप्रसादस्य तस्याह्नो भानुमानिव ।
समयावधिमप्राप्य नान्तायालं भवानपि ।।110।।

**अन्वयः** - ( हे कृष्ण !) अह्नः भानुमान् इव स्वयंकृतप्रसादस्य तस्य अन्ताय समयावधिम् अप्राप्य भवान् अपि न अलम् ।।

**व्याख्या** - (किञ्च) अह्नः= दिनस्य। भानुमान्= सूर्यः। इव= यथा। स्वयंकृतप्रसादस्य= स्वयं विहितानुग्रहस्य। तस्य= चैद्यस्य। अन्ताय= विनाशाय। समयावधिं= नियतकालावसानं। अप्राप्य= अनधिगम्य। भवान् अपि= त्वम् अपि। न अलं= न समर्थः।

**समासः** - स्वयं कृतः प्रसादो यस्य सः स्वयङ्कृतप्रसादः, तस्य स्वयङ्कृतप्रसादस्य (ब० व्री०)। सम्यक् अयते गच्छतीति समयः, समयस्य अवधि: समयावधिः तम् समयावधिम् (त० पु०) । भानवः सन्ति यस्य सः भानुमान् ।

**व्याकरणविशेषः**- अप्राप्य- नञ्+प्र+आप्+क्त्वा+ल्यप्। अह्नः- अहन्+ङस् 'अल्लोपोऽनः' इति अल्लोपः।

युधिष्ठिरस्य आह्वानं स्वीकुरु

**आशयः** - स्वीयां प्रतिज्ञामपेक्ष्य शिशुपालवधे समयप्रतीक्षा समुचिता, तत् युधिष्ठिरस्य आह्वानं स्वीकुरु ।।

तर्हि किमयमुपेक्ष्य एव नेत्याह-

कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधियः पदम् ।
विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः ।।111।।

**अन्वयः** - कृत्यविदः प्रणिधियः तीर्थेषु अन्तः पदं कृत्वा महतः विद्विषदम्भसः तलं विदाङ्कुर्वन्तु ।।

**व्याख्या** - कृत्यविदः= कार्यज्ञाः, विधिज्ञाश्च। प्रणिधियः= गूढपुरुषाः। तीर्थेषु= मन्त्र्याद्यष्टादशस्थानेषु। जलपक्षे= जलावतारेषु च। अन्तः= अभ्यन्तरम्। पदं= स्थानं, पादप्रक्षेपश्च। कृत्वा= विधाय। महतः= दुरवगाहस्य, पूज्यस्य च। विद्विषदम्भसः= अरिरूपसलिलस्य। तलं= स्वरूपं। विदाङ्कुर्वन्तु= जानन्तु ।

**समासः** - कृत्यं विदन्ति इति कृत्यविदः। तरन्ति एभिरिति तीर्थानि, तेषु तीर्थेषु। प्रणिधीयन्ते इति प्रणिधयः। विद्विषन् एव अम्भः विद्विषदम्भः, तस्य विद्विषदम्भसः।

शत्रुबलं बोधयन्ति

**अशयः**- यथा नाविकाः अतिगभीरस्य अपि जलस्य अन्तः प्रविश्य तलस्पर्शं कर्तुं समर्थाः भवन्ति, तथैव चाराः अपि छन्नरूपाः सन्तः शत्रोः अन्तः प्रविश्य तेषां सकलमपि रहस्यं सुखेन अवगन्तुं शक्ताः, अतस्त्वयाऽपि प्रथमम् एतदेव अनुष्ठेयम्।।

अनुत्सूत्रपदन्यासासद्वृत्तिः सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ।।112।।

**अन्वयः** - अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना राजनीतिः, अपस्पशा शब्दविद्या इव नो भाति ।।

**व्याख्या** - अनुत्सूत्रपदन्यासा= नीतिशास्त्रविरुद्धपदन्यासरहिता, नीतिपूर्वकसर्वव्यवहारेत्यर्थः। सद्वृत्तिः = भृत्यामात्यादीनाम् उत्तमा

जीविका। शास्त्रपक्षे काशिकाख्यसूत्रव्याख्यानरूपग्रन्थविशेषसहिता। सन्निबन्धना= अनुजीविभ्यः प्रदत्तपारितोषिकरूपगोहिरण्यादिसहिता। अन्यत्र- भाष्यादिग्रन्थरूपसन्निबन्धनयुता (एवम्भूताऽपि)। राजनीतिः= राजवृत्तिः। अपस्पशा= अपगतचरा, गुप्तचररहिता। शास्त्रपक्षे- उपोद्घात सन्दर्भरूपग्रन्थरहिता। शब्दविद्या= व्याकरणविद्या। इव= यथा। न भाति = न शोभते ।

**समास:-** सूत्राणि उत्क्रान्तः उत्सूत्रः, न उत्सूत्र: अनुत्सूत्रः, पदानां न्यास: पदन्यासः, अनुत्सूत्र: पदन्यासः यस्यां सा अनुत्सूत्रपदन्यासा। शब्दविद्यापक्षे-सूत्राणि उत्क्रान्तानि उत्सूत्राणि, न उत्सूत्राणि अनुत्सूत्राणि, तानि, पदानि यस्मिन् सः अनुत्सूत्रपदः, अनुत्सूत्रपदः न्यासो यस्यां सा अनुत्सूत्रपदन्यासा। सती वृत्तिर्यस्यां सा सद्वृत्तिः। निबध्यतेऽनेनेति निबन्धनम्, सत् निबन्धनं यस्यां सा सन्निबन्धना (ब० व्री०)। राज्ञां नीतिः राजनीति: (त० पु०)। अपगतः स्पशो यस्यां साऽपस्पशा। शब्दविद्यापक्षे - अविद्यमानः पस्पशो यस्यां सा अपस्पशा । "शब्दानां विद्या शब्दविद्या (त० पु०)।

राजनीतिः चारविरहिता सती न शोभते

**आशयः** - राजनीतिः चारविरहिता सती न शोभते। अतश्चरा अवश्यं स्थापनीयाः, परराष्ट्रे प्रेषणीयाश्च। अन्यथा राजा विकलाङ्गो भूत्वा किमपि कर्तुं न प्रभवति ॥

न केवलं चारमुखेन वृतान्तज्ञानम्, अपि तूपजापश्च कर्तव्य इत्याह-

**अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः।**
**भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ।।113।।**

**अन्वयः** - अज्ञातदोषैः दोषज्ञैः अभिव्यक्तशासनैः उभयवेतनैः शत्रोः सामवायिकाः उद्दूष्य भेद्याः॥

**व्याख्या** - अज्ञातदोषैः= परैः अज्ञातनिजकर्मभिः। दोषज्ञैः = स्वयं पर-रहस्यज्ञैः। अभिव्यक्तशासनैः= अभिव्यक्तैः भेद्यस्य अग्रे प्रकटिततदमात्याद्यविश्वासकरकूटलिखितैः। उभयवेतनै= शत्रुतः स्व स्वामितश्च जीविकाग्राहिभिः। शत्रोः= शत्रुसम्बन्धिनः। सामवायिकाः= अमात्यादयः। उद्दूष्य= भृशं दूषयित्वा। भेद्याः= विघट्टनीयाः।

**समासः** - न ज्ञातः, अज्ञातः, अज्ञातः दोषो येषां तैः अज्ञातदोषैः (नञ् त० पु० गर्भ ब० व्री०)। दोषान् जानन्ति इति दोषज्ञाः, तैः दोषज्ञः। उभयत्र उभयतो वा वेतनं येषां ते उभयवेतनाः, तैः उभयवेतनैः (ब० व्री०)। अभिव्यक्तानि शासनानि यैस्ते अभिव्यक्तशासनाः, तैः अभिव्यक्तशासनैः (ब० व्री०)। समवायं– समूहम्, समवयन्ति= प्रविशन्ति इति सामवायिकाः।

गूढपुरुषैः शत्रुराष्ट्रे जीविकां उपजीवं कुरु

**आशयः** - न केवलं चारमुखेन शत्रुवृत्तान्तज्ञानं अपितु तेष्वेव परस्परं उपजापः कर्तव्यः। अतः प्रच्छन्नावेषैः भवतां गूढपुरुषैः शत्रुराष्ट्रे जीविकाम् उपजीव्य तेषां सरहस्यानि कार्याणि सम्यगभिज्ञाय मन्त्रिवर्गेषु भेदो विधेयः॥

**उपेयिवांसि कर्तारः पुरीमाजातशात्रवीम् ।**
**राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥114॥**

**अन्वयः** - (हे कृष्ण!) उपायज्ञैः तव चरैः एकार्थानि राजन्यकानि आजात शात्रवीं पुरीम् उपेयिवांसि कर्त्तारः॥

**व्याख्या** - उपायज्ञैः= कार्यसाधनोपायकुशलैः। तव= भवतः। चरैः- गूढचारिभिः पुरुषैः। एकार्थानि= त्वया सह एक प्रयोजनानि। राजन्यकानि= राजन्यानां समूहाः। अजातशात्रवीं पुरीं= युधिष्ठिरस्य इमां इन्द्रप्रस्थनगरीं। उपेयिवांसि= प्राप्नुवन्ति। कर्तारः= करिष्यन्ते। 'इन्द्रप्रस्थेऽस्माक महत्कार्यं भविष्यति, तद् यज्ञयात्राव्याजेन सन्तद्धैर्भवद्भिरागन्तव्यम्' इति गूढं सन्दिश्य सर्वे राजानस्तत्र मेलयितव्याः इत्यर्थः।

**समासः** - उपायं जानन्ति इति उपायज्ञाः तैः उपायज्ञैः। एकः अर्थो येषां तानि एकार्थानि (ब० व्री०)। अजातशत्रोः इयम् आजातशात्रवी, ताम् आजातशात्रवीम्। राज्ञः अपत्यानि राजन्याः, राजन्यानां समूहाः राजन्यकानि।

**व्याकरणविशेषः**- उपायज्ञैः- उपाय+ज्ञा+अतोऽनुपसर्गे कः इति कः प्रत्ययः। आजातशात्रवीं- आजातशात्रु+अण्+ङीप्।

सर्वे राजानः गूढं सन्देष्टव्याः ते च तत्र मिलिष्यन्ति

**आशयः** - तैः एव चरैः "इन्द्रप्रस्थे अस्माकं महत् कार्यं भविष्यति तद् अध्वरयात्राव्याजेन सन्नद्धैर्भवद्भिरागन्तव्यम्" इति सर्वे राजानः गूढं सन्देष्टव्याः ते च तत्र मिलिष्यन्ति ॥

**ननु तत्रध्वरकर्मणि को युद्धावकाश इत्याशङ्क्य तत्रैव महत्कलहबीजं सम्पादयति-**

**सविशेषं सुते पाण्डोर्भक्तिं भवति तन्वति ।**
**वैरायितारस्तरलाः स्वयं मत्सरिणः परे ॥115॥**

**अन्वयः** - (हे कृष्ण !) पाण्डोः सुते भवति सविशेषं (यथा भवति) भक्तिं तथा तन्वति ( सति ) तरलाः मत्सरिणः परे, स्वयं वैरायितारः॥

**व्याख्या** - पाण्डोः= पाण्डुराजस्य। सुते= पुत्रे युधिष्ठिरे। भवति= त्वयि। सविशेषं= भृशं यथा तथा। भक्तिं= अनुरागं, सत्कारलक्षणमित्यर्थः।

तन्वति= विस्तारयति। (सति) तरला:= चञ्चला:। मत्सरिण:= विद्वेषिण:। परे= शत्रव:। स्वयं वैरायितार:= वैरं कर्त्तार:। अत्र सविशेषग्रहणं तेषामपमानितां द्योतयति। सविशेषत्वञ्चाक्षमा:।

**समास:** - विशेषेण सह वर्तमानं यथा तथा सविशेषम् । मत्सर: अस्ति येषां ते मत्सरिण:। वैरं कर्तार: वैरायितार:।

चञ्चला: विद्वेषिण: शत्रव: वैरं कर्त्तार:

**आशय:** - इन्द्रप्रस्थ एव यदा धर्मराजो युधिष्ठिर: भवन्तं सादरं पूजयिष्यति तदैव सर्वे च ते मत्सरिण: विहितां भवत: पूजां न मर्षयिष्यन्ति, प्रत्युत कलहं विधास्यन्ति।।

किं तेऽपि सर्वे वैरायिष्यन्ते नेत्याह-

**या इहात्मविदो विपक्षमध्ये सहसंवृद्धियुजो भूभुज: स्यु: ।**
**बलिपुष्टकुलादिवान्यपुष्टै: पृथगस्मादचिरेण भाविता तै: ।।116।।**

**अन्वय:** - (हे कृष्ण!) इह विपक्षमध्ये सह संवृद्धियुज: अपि ये भूभुज: आत्मविद: स्यु:, तै: बलिपुष्टकुलाद् अन्यपुष्टै: इव अचिरेण अस्मात् पृथक् भाविता ।।

**व्याख्या** – इह= अस्मिन्। विपक्षमध्ये= शत्रुमध्ये। सहसंवृद्धियुजोऽपि= शिशुपालेन सह ऐश्वर्यं प्राप्ता अपि। ये भूभुज:= ये राजान:। आत्मविद:= स्वाभिजनवेदिन:। स्यु:= भवेयु:। तै:= भूभुग्भि: नृपै:। बलिपुष्टकुलाद्= काककुलात्। अन्यपुष्टै:= कोकिलै:, परभृतै:। इव= तुल्य:। अचिरेण= सद्य:। अस्मात्= विपक्षमध्यात्। पृथग्भाविता= पृथक् भविष्यते।

**समास:** - आत्मानं विदन्तीति आत्मविद:। विरुद्ध: पक्ष: येषां ते विपक्षा:, विपक्षाणी मध्यं विपक्षमध्यम् तस्मिन् विपक्षमध्ये। सह संवृद्धया युज्यन्ते इति सहसंवृद्धियुज:। बलिभि: पुष्टा बलिपुष्टा:, तेषां कुलं बलिपुष्टकुलं, तस्मात् बलिपुष्टकुलात् (त० पु०)। अन्यै: पुष्टा: अन्यपुष्टा:, तै: अन्यपुष्टै:।

बलिपुष्टकुलाद् अन्यपुष्टै: इव अचिरेण अस्मात् पृथक् भाविता

**आशय:** - नहि सर्व एव ते राजान: त्वत्त: पृथक् भविष्यन्ति, किन्तु अन्यपुष्टा: समये उड्डीय काककुलं परित्यज्य यथा स्वकुलमेवाश्रयन्ति। तथैव शिशुपालसकाशात् अभ्युदयं आसादिता अपि, आत्माभिमानिन: स्वामिजनवेदिनश्च, ते अपि भवत: पूजाम् अनुमोदयित्वा त्वया सङ्गंस्यन्ते।।

अथ फलितं निगमयन्नाशिषं प्रयुङ्क्ते-

**सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रह:।**
**तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गण: ।।117।।**

अन्वयः - (हे कृष्ण !) सहजचापलदोषसमुद्धतः चलितदुर्बलपदपरिग्रहः असुहृद्गणः तव दुरासदवीर्यविभावसौ शलभतां लभताम् ।।

**व्याख्या** - सहजचापलदोषसमुद्धतः = स्वाभाविकदुर्विनीतत्वरूपदोषदृप्तः। चलितदुर्बलपक्षपरिग्रहः = अस्थिरनिर्बलपक्षपरिग्रहः। असुहृद्गणः अरिवर्गः। तव = भवतः। दुरासदवीर्यविभावसौ = दुःसहतेजोवह्नौ। शलभतां = पतङ्गत्वं। लभताम् = गच्छतु।

**समासः** - चपलस्य भावः चापलम्, सह जातं सहजम् सहजं तच्चापलं, च सहजचापलम् तदेव दोषः तेन समुद्धतः सहजचापलदोषसमुद्धतः। दुर्बलश्चासौ पक्षश्चदुर्बलपक्षः (क० धा०), तस्य परिग्रहः दुर्बलपक्षपरिग्रहः (त० पु० गर्भ ब० व्री०)। दुःखेन आसाद्यते इति दुरासदम्, दुरासदं च तद् वीर्यं च दुरासदवीर्यम् (क० धा०), तदेव विभावसुः तस्मिन् - दुरासदवीर्यविभावसौ (त० पु०)। शलभस्य भावः शलभता, ताम् शलभताम् ।

**अलङ्कारः**- अत्र चापलमेव दोषः, तथा 'वीर्यमेव विभावसुः' इति रूपणात् रूपकालङ्कारः। द्रुतविलम्बितं वृत्तम् 'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात्।

दुर्बलास्ते शत्रवः सुखेनैव त्वया समुच्छिद्येरन्

**आशयः** - एवं शिशुपालपक्षं विहाय यदा राजानः त्वाम् आश्रयिष्यन्ति सदा दुर्बलास्ते शत्रवः सुखेनैव त्वया समुच्छिद्येरन् ॥

**इति विशकलितार्थामौद्धवीं वाचमेना**
**मनुगतनयमार्गामंगलां दुर्नयस्य ।**
**जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरः**
**स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान् सः ॥118॥**

**अन्वयः** - सः इति विशकलितार्थाम् अनुगतनयमार्गाम् दुर्नयस्य अर्गलां (अतएव) जनितमुदम् उच्छ्रितोरःस्थलनियतनिषण्णश्रीश्रुताम् औद्धवीम् एनां वाचं शुश्रुवान् उच्चकैः उदस्थात् ।

**व्याख्या** - सः= हरिः, श्रीकृष्णः। इति= इत्थम्। विशकलितार्थाम्= विवेचितार्थाम्। अनुगतनयमार्गाम् = अनुसृतनीतिपदवीं, नीतिमार्गानुसारिणीम् इत्यर्थः। दुर्नयस्य= बलभद्राद्युक्तिरूपदुर्नीतेः। अर्गलां= निवारयित्रीं। (अतएव) जनितमुदं= हरेः कृतानन्दाम्। उच्छ्रितोरःस्थलनियतनिषण्णश्रीश्रुतां = उन्नतवक्षःस्थले अविश्रान्तमाश्रितया लक्ष्म्या श्रुतां। औद्धवीं - उद्धवसम्बन्धिनीं। एनां= पूर्वोक्तां। वाचं= वाणीं। सुश्रुवान्= श्रुतवान्। उच्चकैः= उन्नतः सन्। उदस्थात्= उत्थितवान्।

**समासः** - विशकलितः अर्थो यस्याः सा, ताम् विशकलितार्थाम् (ब० व्रि०)। नीयते अनेनेति नयः, नयस्य मार्गः नयमार्गः (ष० त०), अनुगतः नयमार्गः यया सा, ताम् अनुगतनयमार्गाम् (त० पु० गर्भ ब० व्री०)। जनिता मुत् यया सा जनितमुत्, ताम् जनितमुदम् (ब० व्री०)। उच्छ्रितं च तत् उरःस्थलं च उच्छ्रितोरःस्थलम् (क० धा०), तत्र नियतं निषण्णा सा चासौ श्रीश्चेति उच्छ्रितोरःस्थलनियतनिषण्णश्रीः, तया श्रुता सा, ताम् उच्छ्रितोरःस्थलनियतनिषण्णश्रीश्रुताम् (त० पु०)। उद्धवस्य इयम् औद्धवी, ताम् औद्धवीम्।

उद्धवस्य भाषणं श्रुत्वा श्रीकृष्णः आनन्देन उत्थितः

**आशयः** – एवं भूतां वाचं उक्त्वा उद्धवः विरराम, बलरामस्य चिन्तितं सप्रतिबन्धं बभूव। आनन्देन उत्फुल्लनयनो हरिः एनाम् औद्धवीं वाचम् आकर्ण्य स्वासनादुत्तस्थौ ॥

एवंप्रकारेण शिशुपालवधस्य द्वितीये सर्गे वर्णितश्लोकेषु यत्किमपि राज्ञः विषये वर्णितं, तत्सर्वमेव साम्प्रतमस्माकं भारते सर्वकारस्य ये प्रमुखाधिकारिणः सन्ति तेषां कृते बहुमहत्वपूर्णं वर्तते। राज्ञः गुणाः एतादृशाः तु अधिकारिणः गुणा अपि तथैव भवेयुरिति भावः। एवम् अस्मद् देशं सम्यक्प्रकारेण संचालयितुं षड्गुणाः शक्तित्रयं सामाद्युपायाश्च एतेषां प्रयोगः नितान्तमावश्यकम्। देशकालपरिस्थित्यनुसारम् एतेषां शिशुपालवधमहाकाव्ये विशेषतः द्वितीयसर्गस्य प्रयोगवर्णनं नूनमेव अस्य सर्गस्य प्रासङ्गिकत्वं सिद्धीक्रियते।

इति द्वितीयः सर्गः समाप्तः।

## Summarised Overview

साधूनां व्याहृतं सत्यं, अतः शिशुपालसम्बन्धे यत्त्वया प्रतिज्ञातं तदेव प्रतिपालय, मनसः उपतापित्वं बुद्धेररुन्तुदत्वं कर्मणश्च भयंकरत्वं प्रशमय। स्वीयां प्रतिज्ञामपेक्ष्य शिशुपालवधे समयप्रतीक्षा समुचिता, तत् युधिष्ठिरस्य आह्वानं स्वीकुरु। शत्रुबलं बोधयन्ति - यथा नाविकाः अतिगभीरस्य अपि जलस्य अन्तः प्रविश्य तलस्पर्शं कर्तुं समर्थाः भवन्ति, तथैव चाराः अपि छन्नरूपाः सन्तः शत्रोः अन्तः प्रविश्य तेषां सकलमपि रहस्यं सुखेन अवगन्तुं शक्ताः, अतस्त्वयाऽपि प्रथमं एतदेव अनुष्ठेयम्। राजनीतिः चारविरहिता सती न शोभते, अतश्चराः अवश्यं स्थापनीयाः, परराष्ट्रे प्रेषणीयाश्च। अन्यथा राजा विकलाङ्गो भूत्वा किमपि कर्तुं न प्रभवति। न केवलं चारमुखेन शत्रुवृत्तान्तज्ञानम् अपितु तेष्वेव परस्परम् उपजापः कर्तव्यः। अतः प्रच्छन्नवेषैः भवतां गूढपुरुषैः शत्रुराष्ट्रे जीविकाम् उपजीव्य तेषां सरहस्यानि कार्याणि सम्यगभिज्ञाय मन्त्रिवर्गेषु भेदो विधेयः। तैः एव चरैः "इन्द्रप्रस्थे अस्माकं महत् कार्यं भविष्यति तद् अध्वरयात्राव्याजेन सन्नद्धैर्भवद्भिरागन्तव्यम्" इति सर्वे राजानः गूढं सन्देष्टव्याः ते

च तत्र मिलिष्यन्ति। इन्द्रप्रस्थ एव यदा धर्मराजो युधिष्ठिरः भवन्त सादरं पूजयिष्यति, तदैव सर्वे च ते मत्सरिणः विहितां भवतः पूजां न मर्षयिष्यन्ति प्रत्युत कलहं विधास्यन्ति। एवं शिशुपालपक्षं विहाय यदा राजानः त्वाम् आश्रयिष्यन्ति सदा दुर्बलास्ते शत्रवः सुखेनैव त्वया समुच्छिद्येरन्।

# Assignments

### श्लोकं व्याख्यात

1. कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधियः पदम् ।
   विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः ॥111॥

2. सविशेषं सुते पाण्डोर्भक्तिर्भवति तन्वति ।
   वैरायितारस्तरलाः स्वयं मत्सरिणः परे ॥115॥

### अलङ्कारं लिखत

1. सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः।
   तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गणः ॥117॥

### व्याकरणविशेषं लिखत

1. अप्राप्य।
2. अह्नः।
3. उपायज्ञैः।
4. अजातशात्रवीम्।

### उत्तरं लिखत

1. सतः बुद्धिः कीदृशी?
2. कथं कलहं विधास्यन्ति?
3. प्रणिधियः कथं भवेयुः?

### प्रबन्धं रचयत

1. शिशुपालवधस्य द्वितीयसर्गस्य महत्वं उपन्यस्यत।

2. शिशुपालवधस्य द्वितीयसर्गस्य कथासारांशं लिखत।

## Suggested Readings


1. Pandit Durgaprasad and Pandit Sivadatta, The Sisupalavadha of Magha with The Commentary(Sarvankasha) of Mallinatha(Edited), Fourth Edition, Nirnaya sagara press, Bombay, 1905
2. आचार्यः श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वारणासी, 1985


## References


1. डो. शारदा चतुर्वेदी, शिशुपालवधमहाकाव्यम्, द्वितीयसर्गः, आशुबोधिनी संस्कृत-हिन्दीव्याख्यातोपेतम्, चौखम्बा कृष्णदास अकादमी, वारणासी, 2000
2. डा. गणेशदत्तशास्त्रिशुक्लः, शिशुपालवधमहाकाव्यम्, संसकृत-हिन्दी व्याख्योपेतम्, शारदा संस्कृत संस्थन जगतगंज, वारणसी
3. Sisupalavadha of Magha, M S Bhandare Messrs Gopal Narayan & Co Book Sellers and Publishers, Bombay 1982
4. Pandit Durga Prasad & Pandit Sivadatta, Sisupalavadha of Magha, Tukaram Javaji, Nirnayasagar Press, Bombay 1905
5. Ram Chandra Kak and Harabhatta Shastri, Makhabatta's Shishupalavadha with the commentary (sandeha-vishaushadhi) of Vallabhadeva, Srinagar, Kashmir, 1935


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**…………… Reg.NO** **QP CODE………………**

**…………………… Name**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 2 - M23SN02DC- महाकाव्यम्**

**(CBCS- PG)**

**2023 - Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

**सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या। (Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a word or Sentence)**

1. सुकुमारकविमधिकृत्य विशदयत।
2. बृहत्रयी इत्यत्र केषां काव्यानां परिगणना ।
3. नयति अयुग्मच्छदगन्धिः। व्याकरणविशेषं लिखत।
4. 'अनार्यसंगमात् महात्मभिः विरोधः अपि वरम्'। आशयं लिखत।
5. स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किंप्रभुः।
   सदानुकूलेषु च कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः। अलङ्कारविशेषं प्रतिपादयत।
6. स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति च ।
   बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत् ॥ श्लोकं व्याख्यात।
7. 'करकल्पजनान्तराद्विधेः शुचितः प्रापिस हि प्रतिग्रहः'। आशयं लिखत ।

8. ‘जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात्’। आशयं लिखत ।

## SECTION –B
## (द्वितीयो भागः)

**II. केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any six Questions)**

9. ‘कान्यकुब्ज ईश्वरात् ताम्बूलद्वयम् आसनं च लभते’ इति कस्य कवेः प्रशंसायां वर्णितम्? विशदयत।

10. पञ्चमहाकाव्यानि कानि? विशदयत।

11. भट्टिकाव्यम्।

12. सुन्दरी सा जिष्णुरेव। का? स्पष्टयत।

13. “क्षणे-क्षणे यन्नवतामुपैति, तदेव रुपं रमणीयतायाः” विशदयत।

14. ‘विचित्ररूपाः खलु चित्तवृत्तयः’। आशयं विशदयत।

15. युधिष्ठिरां प्रति वनेचरस्य उक्तिं संक्षिप्य लिखत।

16. हंसस्य स्वागमनकारणम्।

17. हंसोक्तदिशा दमयन्तीसौन्दर्यम्।

18. नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्।। सन्दर्भं विशदयत।

## SECTION – C
## (तृतीयो भागः)

**III. द्वयोः प्रश्नयोः केषाञ्चित् निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. महाकाव्यप्रस्थानम् अधिकृत्य निबन्धं रचयत।

20. युधिष्टिरं प्रति वनेचरस्य सम्भाषणं विशदयत।

21. नैषधीयचरितस्य द्वितीयसर्गरीत्या दमयन्तीवर्णनम् प्रतिपादयत।

22. उद्धभाषणं विशदयत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**:...............Reg.NO** **QP CODE.......................**

**:........................ Name**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE – 2 – M23SN02DC- महाकाव्यम्**

**(CBCS- PG)**

**2023-24 – Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या। **(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section- A

**(प्रथमो भागः)**

**IV.** एकेन पदेन वाक्येन वा केषाश्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5 x 2=10)**

**(Answer any five Questions in a word or Sentence)**

1. 'सर्गबन्धो महाकाव्यमुच्यते' । विशदयत ।
2. 'मेघे माघे गतं वयः' इति कस्य महाकाव्यस्य लोकप्रियतां सूचयति? विशदयत।
3. द्विषां <u>विघाताय</u>। व्याकरणविशेषं लिखत ।
4. चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान्।

   पशुनाऽप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः।। अलङ्कारविशेषं प्रतिपादयत।
5. यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।

   कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥ श्लोकं व्याख्यात।
6. "अहो दुरन्ता बलवद्विरोधिता ।" सन्दर्भं लिखत।
7. 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः'। विशदयत।
8. 'पृथुरित्थमथाऽणुरस्तु सा न विशेषे विदुषामिह ग्रहः'।

## SECTION –B

(द्वितीयो भागः)

**V. केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions)**

9. महाकाव्यलक्षणं किम्?

10. "नवसर्गगते माघे नवशब्दो न विद्यते" भणितेरस्याः सार्थकत्वं समुपपादयत।

11. नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः। विशदयत।

12. दुर्योधनस्य प्रजापरिपालनरीतिं ग्रन्थोक्तदिशा लिखत।

13. "नेषधे पदलालित्यम्"। समर्थत।

14. दमयन्त्याः नामधेयं तद्व्युत्पतिः च निरूपयत।

15. "तेजः क्षमा वा नैकान्तं' कालशस्य महीपतेः" - सन्दर्भं विशदयत ।

16. राजनैतिकमहत्वम् उपन्यस्यत।

17. द्रौपदी युधिष्टिरं युद्धार्थं प्रेरयति। कथम् ? विशदयत।

18. नलं प्रति हंसस्य कृतज्ञताप्रकाशनं विशदयत।

## SECTION – C

(तृतीयो भागः)

**VI. द्वयोः प्रश्नयोः केषाञ्चित् निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. महाकाव्यस्यास्य विशेषतां निरूपयत।

20. "भारवेरर्थगौगवम्" इत्युक्तिः पाठभागानुसारं समर्थयत।

21. "नैषधं विद्वदौषधम्" इत्युक्तिः ग्रन्थदिशा सप्रमाणं विशदयत।

22. "माघे सन्ति त्रयो गुणाः" पाठभागस्य उदाहरणसहितं समर्थयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres

### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

# महाकाव्यम्

Course Code: M23SN02DC

SREENARAYANAGURU
OPEN UNIVERSITY

ISBN 978-81-966907-8-6

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841